हे गणेश्वरि! इससे अधिक श्रेष्ठ अन्य कोई भी मन्त्र नहीं है। साधक केवल रात्रि में एक बार हविष्यान्न का भोग करता हुआ स्थिर चित्त होकर पवित्र हुआ दिन के समय मन्त्र का जप करे। इस तरह जप करने से ही उसे मन्त्र-सिद्धि की प्राप्त होगी। मन्त्र-जप काल (पुरश्चरण काल) में साधक को भूमि पर शयन करना चाहिए तथा स्त्री-सङ्ग का दिन में परित्याग कर देना चाहिए। प्रातः काल जप करके ही मुख शुद्धि करनी चाहिए। रात्रि में हविष्यान्न का भोजन करके ब्रह्म-पुष्प द्वारा हवन करना चाहिए। जप काल में पत्नी-संसर्ग का भी परित्याग कर देना चाहिए। विष्णु से सम्बन्धित पूजन-प्रयोगादि तथा तुलसी का सर्वथा प्रयोग नहीं करना चाहिए। जपकाल में हाथ (पैर) धो लेना ही शुद्धि करण (शारीरिक शुद्धि) माना जाता है। इस साधना में मात्र भक्ति को प्रधानता है, अतः सभी साधनात्मक क्रियायें भक्तिपूर्वक करनी चाहिए। काली, तारा आदि देवियों के पृथक-पृथक पूजन हेतु उनके पुष्पों(तथा अन्य उपचारों) को पृथक-पृथक पात्र में रखना चाहिए। अपने कल्याण के इच्छुक साधक को इन उपचारों को एक ही पात्र में मिलाकर नहीं रखना चाहिए। नैवेद्य रूप फल-जलादि भी सभी के लिए एक जैसा जानना चाहिए। अनेकों प्रकार के सुगन्धित पके हुए हविष्यान्न, पायस (खीर), लड्डू, दही, दूध आदि नैवेद्य क्रम से अलग-अलग पात्रों में रखना चाहिए।

॥ माला-निरूपणम्॥

मालानां च महेशानि नियमं शृणु भैरवि॥२४॥
अकस्मादीहिता सिद्धिर्महाशङ्खाख्यमालया।
पञ्चाशन्मणिभिर्माला निर्मिता सर्वकामदा॥२५॥

युद्धे मृतस्य देवेशि चाण्डालस्यास्थिकेन च।
मस्तकस्य विशेषेण महाशङ्खः प्रकीर्तितः॥२६॥
अनया मालया देवि तारामन्त्रः प्रसिद्ध्यति।
तत्संस्कारं वरारोहे शृणुष्वैकमनाः प्रिये॥२७॥
सूत्रेण ग्रथिता माला विप्रस्त्रीसूत्रनिर्मिता।
पट्टसूत्रैः कृता माला जगद्वश्याय कल्पते॥२८॥
स्वर्णसूत्रकृता माला साक्षाद्वैश्रवणो भवेत्।
मुखे मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत्॥२९॥
गोपुच्छसदृशी माला यद्वा सर्पाकृतिर्भवेत्।
मातृकावर्णसंमिश्रेर्ग्रन्थिं कुर्याद् विधानतः॥३०॥
तत्सजातीय मेकाक्षं मेरुत्वेन प्रकल्पयेत्।
एवं क्रमेण ग्रथिता माला सर्वत्र शोभना॥३१॥

हे महेशानि! अब माला के नियम (निर्माण-विधि आदि) को सुनो। महाशंख माला द्वारा (तारा) मन्त्र जप करने से साधक को अकस्मात (सहज) ही सिद्धि की प्राप्ति हो जाती है। इसके लिए पचास मणियों से निर्मित माला सभी कामनाओं को पूरी करने वाली होती है। युद्ध में मरे हुए व्यक्ति अथवा मृत चाण्डाल मनुष्य के मस्तक के एक विशेष भाग की अस्थियों द्वारा निर्मित मणि से बनी हुई माला महाशंख माला कही जाती है। इस माला के द्वारा जपने से ही तारा के मन्त्रों की सिद्धि होती है। हे प्रिये! वरारोहे! अब उस माला के संस्कार (निर्माण आदि) की प्रक्रिया को एकाग्र होकर सुनो। किसी ब्राह्मणी स्त्री द्वारा निर्मित कपास-सूत्र द्वारा माला बनानी चाहिए। रेशम (अथवा कपास) सूत्र (धागे) से ग्रथित मालाजगद्वशी करण के लिए प्रयोग करनी चाहिए। स्वर्ण-सूत्र रचित माला से जप करने वाला साधक साक्षात् कुबेर के तुल्य हो जाता है। मणियों को सूत्र में ग्रन्थित करते समय उनके मुख परस्पर सम्मुख होने चाहिए, यही स्थिति उनके पुच्छ (पृष्ठ) भाग की भी होनी चाहिए। माला को गो-पुच्छ अथवा सर्पाकार (प्रारम्भ में मोटी तथा क्रमशः पतली होती हुई अन्त में सबसे पतली) होनी चाहिए। मणियों को धागे में पिरोते समय प्रत्येक मणि के साथ क्रमशः एक-एक मातृका वर्ण का उच्चारण करते रहना चाहिए। फिर विधि पूर्वक ग्रन्थि (गाँठ) लगानी चाहिए। जिस मणि की माला हो उसी के सजातीय मणि द्वारा सुमेरु निर्मित करना चाहिए। इस प्रकार विधिवत् दीर्घ से लघु होते मणियों द्वारा क्रमशः बनी हुई माला श्रेष्ठ होती है।

एवं सा ग्रथिता माला मन्त्रसिद्धिप्रदायिनी।
एकैकं मणिमादाय ब्रह्मग्रन्थिं विनिर्दिशेत्।।३२।।
अनुलोमविलोमेन मातृकान्तर्गतं जपेत्।
तेन सर्वगुणोपेता जायते सिद्धिभागिति।।३३।।
कुल्लुकां च ततो नत्वा मालापूजां विधाय च।
गृहणीयाद् दक्षिणेनाथ नच वामेन संस्पृशेत्।।३४।।
नाभितश्च शिरोदेशे कुल्लुकां परिकल्पयेत्।
पट्टसूत्रकृता माला देव्याः प्रीतिकरी सदा।।३५।।
अभावे चापि शङ्खस्य स्फाटिक्या मालया जपेत्।
मालाविशेषं देवेशि भैरवि प्राणवल्लभे।।३६।।

एक-एक मणि को ग्रहण करते हुए अनुलोम विलोम मातृका वर्णों के मध्य मंत्रबीज को जपते हुए ब्रह्म ग्रन्थि लगानी चाहिए। इस प्रकार ग्रन्थित माला सर्वगुण सम्पन्न होती है तथा साधक को सभी सिद्धियाँ प्रदान करने वाली होती है। इसके बाद कुल्लुका का जप करके माला का पूजन कर उसे दक्षिण हाथ में ग्रहण करे। वाम हस्त से माला का स्पर्श नहीं करना चाहिए अर्थात् बांये हाथ में लेकर जप नहीं करना चाहिए। नाभि से लेकर शिर स्थान तक कुल्लुका का ध्यान करके (शिर में कुल्लुका का न्यास करके) मन्त्र जप करना चाहिए। रेशमी धागे से निर्मित माला देवी के लिए अति-प्रीतिकारक होती है। हे देवेशि! भैरवि! प्राणवल्लभे! महाशंख की माला के अभाव में स्फटिक की माला से जप करना चाहिए। यह मैंने तुमसे माला की विशेषता का वर्णन किया।

यया जप्तेन देवेशि सिद्धो भवति तत्क्षणात्।
अनया सदृशी विद्या त्रैलोक्ये नास्ति सुन्दरि।।३७।।
कृपया परमेशानि तव स्नेहात् प्रकाश्यते।
परमं शृणु चार्वङ्गि शृणु पार्वति तत्त्वतः।।३८।।
येन विज्ञानमात्रेण मन्त्राः सिध्यन्ति तत्क्षणात्।
अनुलोमविलोमेन मन्त्रमा(न्तविर्भे?त्रार्णभे)दतः।।३९।।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितं मनुम्।
कुर्यान्मन्त्रमयीं मालां सर्वमन्त्रप्रदीपनीम्।।४०।।
चरमार्णं मेरुरूपं न लङ्घयेच्च सर्वदा।
एतत्परं रहस्यं च मयोक्तं ते यशस्विनि।।४१।।
त्वया गुप्ततरं कार्यं नाख्येयं यस्य कस्यचित्।

इस विद्या (जप-विधि ज्ञान) के समान त्रिलोकी में भी अन्य कोई विद्या नहीं है। इस प्रकार से मन्त्र जप करने पर साधक शीघ्र ही सिद्ध हो जाता है। हे चार्वङ्गि (सुन्दर अङ्गों वाली) परमेशानि! तुम्हारे प्रति प्रेम के कारण ही मैं इसे तत्वतः (समुचित रूप से)प्रकाशित कर रहा हूँ, सुनो! इसके क्रियात्मक ज्ञान मात्र से ही तत्क्षण मन्त्र सिद्ध हो जाते हैं। पहले अनुलोम विधि से (अ से क्ष तक) फिर विलोम विधि से (क्ष से अ तक) एक-एक वर्ण को मन्त्र से सम्पुटित करके जप करे। तत्पश्चात् पुनः अनुलोम तथा विलोम विधि से एक-एक मातृका वर्ण द्वारा मन्त्र को सम्पुटित करके माला द्वारा जप करे। इस प्रकार मन्त्रमयी की हुई माला सभी मन्त्रों को प्रदीप्त (जागृत-सिद्धि प्रदान के सामर्थ्य युक्त) करने में सक्षम होती है। मातृका का अन्तिम वर्ण 'क्ष' मेरु रूप होता है, इसका उल्लंघन नहीं करना चाहिए अर्थात् मेरु वर्ण क्षकार को सम्पुटित करके अथवा इसके द्वारा मन्त्र को सम्पुटित कर जप नहीं करना चाहिए। हे यशस्विनी मैंने तुमसे यह रहस्य की बात कही है। तुम्हें इसे भली-भाँति गुप्त ही रखनी चाहिए। हर किसी के सामने इसे प्रकट नहीं करना चाहिए।

।। मालायां प्राण-प्रतिष्ठा विधिः।।

शुभ काले शुभे लग्ने शुभर्क्षे च शुभे तिथौ।।४२।।
प्रतिष्ठां कारयेद्विद्वान स्वयं वा गुरुणापि वा।
अश्वत्थपत्रनवकं पद्माकारेण पातयेत्।।४३।।
तत्र संस्थापयेन्मन्त्री मातृकामन्त्रमुच्चरेत्।
वह्निं संस्कृत्य देवेशि हुनेत् सुरगणार्चिते।।४४।।
हुतशेषं प्रतिहुतौ प्रद्द्याद् देवताधिया।
तत्र देवीं समभ्यर्च्य ग्रहणेऽपि च पूजयेत्।।४५।।
अनुलोविलोमेन मातृकार्णेन मन्त्रयेत्।
मेरुं प्रेतेन संमन्त्र्य तां नयेद् देवतात्मताम्।।४६।।
एवं सर्वगुणोपेता जायते सर्वसिद्धये।
स्मृतिसूत्रं वीतिहोत्रमावृत्तित्रितयं ततः।।४७।।
दिवानिशाकरौ प्रोक्तौ तस्मात्तेजस्त्रयी शुभा।
गोप्तव्या ह्यनिशं सूत्रे जपमालेप्सिताप्तये।।४८।।
मातृमेयप्रमाणेन बिन्दुनादकलात्मिकाम्।
उच्चरेदनुसंस्कृत्य कुण्डलीयोगतः प्रिये।।४९।।

तेन विद्या लभेत् सिद्धिं नात्र कार्या विचारणा।
कण्ठदेशे स्थिता मन्त्राः केवला वर्णरूपिणः।।५०।।
सौषुम्णाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति हि।
ईदृश्या च स्रजा यस्तु कुरुते जपमुत्तमम्।।५१।।
अपमृत्युकलिभ्यां च मुच्यते नात्र संशयः।

शुभ लग्न, नक्षत्र, तिथि, मासादि युक्त शुभ काल का निर्णय कर विद्वान साधक स्वयं अथवा स्वगुरु द्वारा माला की प्राण-प्रतिष्ठा करे (कराये)। पीपल के नव (९) पत्रों को कमलदल की भाँति बिछाकर उस पर मातृकावर्णों का उच्चारण करते हुए साधक माला को रखे। फिर कुण्ड अथवा वेदी पर अग्नि स्थापित कर उसका संस्कार करके मातृका के एक-एक वर्णों से घृत द्वारा हवन करे तथा प्रत्येक बार हुत-शेष (स्रुवा से टपकने वाले) घृत को देवता बुद्धि से माला पर अर्पण करे। फिर उस माला पर देवी का पूजन करके नवग्रहों का भी पूजन करे। इसके बाद प्रत्येक मणि पर अथवा पूरी माला पर अनुलोम-विलोम रूप से मातृका वर्णों का जप करे। मेरु को प्रेत मन्त्र 'ह्सौः' द्वारा अभिमन्त्रित करे (उस पर १०८ बार जप करे)। इस प्रकार माला को देवता स्वरूपता प्रदान करे। इस प्रकार सर्वगुण सम्पन्न माला से जप करने से अवश्य ही सिद्धि की उपलब्धि होती है। माला निर्मित करते समय पहले सूत्र को त्रिगुणित करे फिर पुनः उसे त्रिगुणित करे, इस प्रकार नव गुणित (9 सूत्र युक्त) माला का सूत्र बनाना चाहिए। इस प्रकार की त्रिगुणित माला में अग्नि, सूर्य, तथा चन्द्र रूप तीनों तेजों का वास होने से माला त्रितेज युक्त शुभ कही जाती है। सिद्धि की इच्छा वाले साधक को सदैव माला को गुप्त रखना चाहिए। माला को पुनः कुण्डलिनी योग द्वारा संस्कारित करना चाहिए। इसके लिए मूलाधार से कुण्डलिनी को उठाकर सहस्रार में स्थित कर (स्थित रूप से ध्यान करते हुए) माला पर अनुस्वार युक्त मातृका वर्णों का (सुषुम्ना मार्ग द्वारा उच्चारित होता हुआ अनुभव करते हुए) पचास बार जप करना चाहिए। इस प्रकार से सिद्ध माला द्वारा जप करने से साधक को विद्या (मन्त्र) की सिद्धि निश्चित रूप से प्राप्त होती है, इस विषय में किसी भी प्रकार के संशय की संभावना नाममात्र भी नहीं करनी चाहिए। कण्ठ-स्थान से स्थित (वहाँ से उच्चारित) मन्त्र केवल वर्ण रूप ही होते हैं, परन्तु सुषुम्ना मार्ग द्वारा उच्चारित होने पर यही मन्त्र वर्ण देवता स्वरूप होकर सिद्धि प्रदान करने में समर्थ हो जाते हैं। इस प्रकार से संस्कारित माला द्वारा जो साधक जप करता है, वह इस कलियुग में अकाल मृत्यु से सर्वथा मुक्त हो जाता है।

।। कर मालायां अङ्गुलीनां निर्णयम्।।

अथ वक्ष्ये महेशानि अङ्गुलीनां च निर्णयम्।।५२।।
पर्वद्वयमनामायाः परिवर्तेन वै क्रमात्।
पर्वत्रयं मध्यमायास्तर्जन्येकं समाचरेत्।।५३।।
शक्तिमाला समाख्याता सर्वमन्त्रप्रदीपनी।
व्यग्रचित्तेन यज्जप्तं यज्जप्तं मेरुलङ्घने।।५४।।
तत्सर्वं निष्फलं याति इत्याहः परमेश्वरि।
पर्वद्वयं हि तर्जन्या मेरुं तद्विद्धि पार्वति।।५५।।
सिद्धये साधको जप्यान्मेरुं नत्वा पुनः पुनः।
तर्जन्यग्रं तथा मध्यं यो जपेत् सोऽपि पापकृत।।५६।।
नित्यं जपं करे कुर्यान्नतु काम्यं कदाचन।

हे महेशानि! अब मैं करमाला द्वारा जप करते समय किस प्रकार अङ्गुलियों का प्रयोग किया जाता है, इसके विषय में कहूँगा। अनामिका के दूसरे (मध्य) पर्व से प्रारम्भ करके दक्षिणावर्त क्रम से जपते हुए (कनिष्ठा तथा) मध्यमा के तीनों पर्वों तथा तर्जनी के एक पर्व (मूल पर्व) तक जप शक्ति माला रूप जप कहा जाता है, इस प्रकार के जप से सभी मन्त्र तेजस्वी हो जाते हैं।

[सिद्धान्त सार के अनुसार अनामिका के मूल से प्रारम्भ करके दक्षिणावर्त रुप से मध्यमा के मूल (आठ पर्वों) तक अथवा तर्जनी के मूल (नव पर्वों) तक जप शक्ति मन्त्रों में करना चाहिए।]

जप करते समय यदि चित्त विक्षिप्त (व्याकुल अथवा चञ्चल) होता है तथा मेरु का उल्लंघन किया जाता है, तो हे परमेश्वरि! इस प्रकार का जप कर्म निष्फल होता है। हे पार्वति! तर्जनी के ऊपर के दो पर्वों को सुमेरु के रूप में जानना चाहिए। जप करते समय सिद्धि के इच्छुक साधक को हर बार सुमेरु पर पहुँचने पर प्रणाम करना चाहिए। तर्जनी के अग्रभाग तथा मध्य पर्व पर जो साधक जप करता है, वह पाप का भागी होता है। करमाला द्वारा (किसी कारणवश अक्षमाला की अनुपस्थिति में) जप केवल नित्य-जप कर्म में ही करना चाहिए। काम्य-कर्म में करमाला द्वारा जप नहीं करना चाहिए।

।। कुल्लुका ज्ञानस्यानिवार्यताम्।।

कुल्लुकां च ततो नत्वा मालापूजां विधाय च।।५७।।
श्रीगु(रु?रो)श्चर(णं?णौ)ध्यात्वा मालाया मन्त्रमुच्चरेत्।

कुल्लुकां च न जानाति महामन्त्रं जपेन्नरः॥५८॥
पञ्चत्वं जायते तस्य अथवा वातुलो भवेत्।
तारिणीचण्डिकायाश्च मन्त्रः कुल्लुकवर्जितः॥५९॥
मतिमान् यो द्विजातीनां नोपादेयः कथञ्चन।
कुल्लुकां शिरसि धृत्वा सर्वयज्ञफलं लभेत्॥६०॥
नान्यो विचारः सर्वत्र विरूपाक्षस्य संमतः।
कुल्लुके वर्जिते पुंसां यद्येनोपस्थितिर्भवेत्॥६१॥
मम पूजा सदा व्यर्था मम यज्ञस्तथैव च।
तारामन्त्रस्य जानीयात् त्र्यक्षरं मन्त्रमुत्तमम्॥६२॥
न जानाति च यो मूढः कुल्लुकां तारिणीं जपेत्।
यावज्जीवं महेशानि न सिद्ध्यति कदाचन॥६३॥
महामन्त्रं परित्यज्य पूजयेद्यस्तु तारिणीम्।
पञ्चत्वं जायते तस्य अथवा वातुलो भवेत्॥६४॥

मन्त्र जप करने से पहले कुल्लुका (मन्त्र) का शिर में न्यास करना चाहिए। इसके पश्चात् माला की सविधि पूजा करके श्री गुरुदेव के चरणों का ध्यान (एवं प्रणाम) करके माला मन्त्र का उच्चारण करना चाहिए। जो साधक कुल्लुका का बिना ज्ञान प्राप्त करे (कुल्लुका को बिना जपे) तारा के महामन्त्र का जप करता है, उसकी या तो मृत्यु हो जाती है अथवा वह प्रलापी पागल हो जाता है। तारा, काली आदि मन्त्रों को, बिना कुल्लुका का जप किए, जो साधक जप करता है, वह बुद्धिमान होते हुए भी द्विजातियों में गणना के योग्य (ब्राह्मण कहलाने योग्य) नहीं है। मन्त्र जप से पूर्व कुल्लुका का शिर में न्यास करने वाले साधक को सभी यज्ञों (सत्कर्मों) का फल प्राप्त होता है। ऐसा विरूपाक्ष शिव का मत है, इस विषय में इसके विपरीत किसी अन्य विचार की आवश्यकता नहीं है। यदि साधक कुल्लुका के ज्ञान से रहित (जपादि के समय उसका प्रयोग न करने वाला) है, तो उसके द्वारा की गई मेरी सारी पूजा तथा सभी यज्ञ (हवन, तर्पण, दानादि) व्यर्थ हो जाते हैं। तारा मन्त्र के तीन बीजाक्षरों (ह्रीं स्त्रीं हूँ) वाले श्रेष्ठ मन्त्र को ही कुल्लुका मन्त्र के रूप में जानना चाहिए। जो इस कुल्लुका को बिना जाने तारा-मन्त्रों का जप करता है। हे महेशानि! जीवन भर (मन्त्र जपने पर भी) उसके मन्त्र की सिद्धि नहीं होती। इस कुल्लुका रूप महामंत्र का परित्याग कर जो तारा की पूजा (जपादि) करता है, उसकी अवश्य ही शीघ्र मृत्यु हो जाती है अथवा वह अनर्गल प्रलाप करने वाला पागल सा हो जाता है।

।। कुल्लुका निरूपणं विद्या जपं तदन्तरकार्यवर्णनञ्च।।

कुल्लुका नाम सा देवी अनुभावस्वरूपिणी।
सवामकर्त्रिहस्ता च चतुर्बाहुसमन्विता।।६५।।
नीलोत्पलबपुः श्यामा सर्वालङ्कारभूषिता।
लिखेत् तत् त्र्यक्षरं मन्त्रं हरिद्राचन्दनेन वा।।६६।।
यावज्जीवं तु मन्त्रार्णं शिखायां धारयेत् सदा।
महतीविद्यया प्राप्तं जपेन्मन्त्रं त्रिलक्षकम्।।६७।।
लक्षमेकं जपेद्विद्वां हविष्याशी जितेन्द्रियः।
उ(च्छ?च्च)स्थानेषु देवेशि तदासनस्य संस्थितिः।।६८।।
पूर्वोक्तं पूजनं कृत्वा विप्राराधनतत्परः।
अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्।।६९।।
जपान्ते प्रत्यहं मन्त्री होमयेत् तद्दशांशतः।
तर्पणं चाभिषेकं च तत्तद्दशांशतो मनोः।।७०।।
प्रत्यहं भोजयेद् विप्रान् न्यूनाधिक्यप्रशान्तये।
अथैवं सर्वसंपूर्णं होमादिकमथाचरेत्।।७१।।

कुल्लुका नाम वाली जो देवी है वह मन्त्र के ऐश्वर्य शक्ति (सामर्थ्य शक्ति) की संकेत स्वरूपिणी है अथवा मन्त्र में निहित शक्ति स्वरूपा है। इस देवी का शरीर नीलकमलवत् श्यामवर्ण है। सभी आभूषणों से यथोचित आभूषित यह चार भुजाओं वाली है तथा वाम हाथ में कर्त्तरी लिए हुए है। हल्दी तथा चन्दन के मिश्रण से इसके त्र्यक्षरी मन्त्र को लिखकर जब तक तारा की साधना करने वाला साधक जीवित रहे उसे अपने शिर पर धारण करना चाहिए। अत्यधिक ज्ञान प्राप्ति के लिए इस विद्या का तीन लाख जप करना चाहिए।

ब्राह्मणों की सेवा (पूजा) में संलग्न रहते हुए साधक पूर्वोक्त रूप से कुल्लुका का शिर पर न्यास करके तारा विद्या (मन्त्र) का एक लाख जप करे। इसके पश्चात् दशांश क्रम से हवनादि अन्य कर्म करना चाहिए। जहाँ तक सम्भव हो साधक प्रतिदिन जितना जप करे उसी दिन हवन तर्पण आदि क्रिया तद्दशांश क्रम से सम्पन्न कर ले। ब्राह्मणों को भी प्रतिदिन मार्जन की दशांश संख्या में अथवा सामर्थ्यानुसार एक अथवा अधिक संख्या में, कर्म में न्यूनता अथवा आधिक्य रूप आये दोषों की शान्ति के लिए भोजन प्रदान करे। जप संख्या एक लाख पूरी हो जाने पर भी इसी भाँति हवनादि कर्म करे।

रात्रौ बलिःसम(दाय?र्प्यस्तु) सर्वसिद्धिमभीप्सुभिः।
बिना दीपकमन्त्रेण अग्रे शून्यं न चार्चयेत्॥७२॥
विनानया महादेवि विना रुधिरवेदनैः।
त्रिवर्णमय्या दीपन्या मन्त्रिणी सा च कथ्यते॥७३॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः।
शतकोटिजपेनापि कथं सिद्धिर्वरानने॥७४॥
गुप्तजीवाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये।
मन्त्राश्चैतन्यसहिताः सर्वसिद्धिकराः सदा॥७५॥
मन्त्रोच्चारे कृते यादृक् स्वरूपप्रथ(मं?नं)भवेत्।
शते सहस्रे लक्षे वा कोटिजापे न तत्फलम्॥७६॥

हवन के पश्चात् सभी सिद्धियों की कामना वाले साधक को रात्रि में बलि प्रदान करना चाहिए। बिना दीपनी मन्त्र का जप किए देवता के आगे तथा खाली भूमि पर पूजन करके बलि नहीं देना चाहिए। बिना अन्नमय भोज्य पदार्थ तथा उसे कुङ्कुम आदि के द्वारा बिना रक्तिम किये (अथवा बिना रक्त के) भी बलि नहीं देना चाहिए। त्रिवर्ण मयी दीपनी मंत्र जिसे मन्त्रिणी कहा जाता है, इसके द्वारा बलि स्थान पर दीपक प्रदान करना चाहिए। जो साधक मन्त्र के अर्थ को, मन्त्र चैतन्य करने की विधि को तथा योनि मुद्रा को नहीं जानता है, सैकड़ों करोड़ मन्त्र का जप करने पर भी उसे अभीष्ट-सिद्धि की प्राप्ति नहीं हो सकती। सभी मन्त्र प्रारम्भ में गुप्त (सुप्त) प्राण वाले चेतना शक्ति रहित (फल प्रदान करने की ऊर्जा से हीन) होते हैं। जब कुण्डलिनी योग द्वारा जप करके इन्हें चैतन्य कर लिया जाता है तब ही जप करने पर ये मन्त्र साधक को फल प्रदान करने में समर्थ होते हैं। चैतन्य मन्त्र का उच्चारण (जप) करने पर उसका जैसा प्रभाव प्रकट होता है वैसा प्रभाव सामान्य रूप से चैतन्यता रहित मन्त्र को सैकड़ों, हजारों, लाखों यहाँ तक कि करोड़ों बार जपने पर भी प्रकट नहीं होता और न ही वे चैतन्य मन्त्रों की भाँति फल देने में भी समर्थ होते हैं।

॥ चैतन्य मन्त्र माहात्म्यं तर्पणाभिषेकादि निरूपणञ्च॥

हृदये ग्रन्थिभेदश्च सर्वावयवभेदनम्।
आनन्दाश्रूणि पुलको देहावेशः कुलेश्वरि॥७७॥
गदग्दोक्तिश्च सहसा जायते नात्र संशयः।
सकृदुच्चारिते चैवं मन्त्रे चैतन्यसंयुते॥७८॥

दृश्यते च महादेवि पारंपर्य तदुच्यते।
एवं जपं यथा कृत्वा दशांशमसितोत्पलैः।।७९।।
आज्याक्तैर्जुहुयान्मन्त्री तद्दशांशेन तर्पणम्।
कालागुरुद्रवोपेतैर्विमलैर्गन्धवारिभिः ।।८०।।
तर्प(येत्) तां परां देवीं तत्प्रकारमिहोच्यते।
जले चावाह्य विधिवत् पाद्याद्यैरुदकात्मकैः।।८१।।
संपूज्य विधिवद् देवीं परिवारान् सकृत्सकृत्।
संतर्प्य विधिवद्भक्त्या दशांशं तर्पयेत ततः।।८२।।
पुनरेकैकं संतर्प्य परिवारांस्तथा पुनः।
तारिणीमभिषिञ्चामि नमो मूर्ध्नि विनिःक्षिपेत्।।८३।।
अभिषेकोऽयमाख्यातः सर्वपापनिकृन्तनः।
अभिषेकदशांशेन साधकानां च भोजनम्।।८४।।
सुवासिनीं कुमारीं च भोजयेत् तदनन्तरम्।
क्षीरखण्डाज्यभोज्यैश्च मन्त्रसिद्धिर्भवेद् ध्रुवम्।।८५।।
गुरवे दक्षिणां दद्याद् बहुमानपुरःसरम्।
होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः।।८६।।
मन्त्रान्ते नाम चोच्चार्य तर्पयामि ततः परम्।
स्वाहान्ते तर्पणं त्वेवमभिषेकं शृणुष्व मे।।८७।।
मन्त्रान्ते नाम चोच्चार्य सिञ्चामीति पदं ततः।
तद्दशांशं ब्राह्मणानां भोजनं च समाचरेत्।।८८।।
इत्येवं सिद्धमन्त्रः सन् सर्वान् कामांश्च साधयेत्।
विल्वपत्रं महेशानि दशांशं जुहुयात् ततः।।८९।।
अथ चैवं तिलाज्येन होमयेद्वाथ सुन्दरि।
सर्वस्वं गुरवे दद्यात् तदर्धं वा तदर्धतः।।९०।।
अज्ञात्वा कुल्लुकां देवीमजप्त्वा गुरुपादुकाम्।
न दत्त्वा दक्षिणां सम्यगकृत्वा चक्रपूजनम्।
योऽस्मिस्तन्त्रे प्रवर्तेत तत्स्वं पीडयते ध्रुवम्।।९१।।

जिस समय एकाग्रचित्त से देवता के ध्यान सहित साधक चैतन्य मन्त्र का जप करता है, उस समय (कुछ काल के निरन्तर अभ्यास के पश्चात्) कुण्डलिनी जागरण सहित सभी चक्रों तथा रूद्र, ब्रह्म एवं विष्णु ग्रन्थि भेद सहित हृदय ग्रन्थि का भेदन होने पर उसके सारे संशयों एवं अज्ञान का

विनाश (सा) हो जाता है। उसके सारे कर्म संस्कार के बन्धन छिन्न-भिन्न हो जाते हैं। सारा शरीर मन्त्र की ऊर्जा तथा हर्ष से व्याप्त हो जाता है, शरीर में रोमाञ्च तथा नेत्रों में आनन्द से अश्रु छलकने लगता है। उसकी वाणी गद्गद (अस्पष्ट सी) हो जाती है। ये लक्षण अचानक ही किसी दिन अवश्य ही प्रकट हो जाते हैं, फिर तो कभी भी एक बार भी चैतन्य मन्त्र का उच्चारण करते ही उस साधक की ऐसी ही अवस्था हो जाती है। हे महादेवि! चैतन्ययुक्त मन्त्र का बार-बार निरन्तर अभ्यास करने वाले साधक की ऐसी ही अवस्था की प्राप्ति देखी जाती है। इस प्रकार चैतन्य मन्त्र का अभीष्ट संख्या में जप करके सफेद कमल को घी में भिगोकर जप के दशांश संख्या में हवन तथा हवन की दशांश संख्या में तर्पण साधक को करना चाहिए। काला अगुरु तथा और भी सुगन्धित पदार्थों के रस से युक्त शुद्ध सुगन्धित जल में जिस प्रकार उस परा देवी का तर्पण करना चाहिए उसे मैं कहता हूँ। जल में देवी का आवाहन करके जलरूप पाद्यादि उपचारों द्वारा देवी का पूजन करके परिवार देवताओं का एक-एक बार तर्पण करे। फिर दशांश की संख्या में देवी का तर्पण करके पुनः परिवार देवताओं का भी एक-एक बार तर्पण करना चाहिए। इसके बाद साधक स्वयं को देवीरूप अनुभव करता हुआ 'तारिणीं अभिषिञ्चामि नमः' बोलते हुए अपने सिर का सिञ्चन (मार्जन) करे। यह अभिषेक संज्ञक क्रिया सभी पापों का विनाश करने वाली है। इस अभिषेक के दशांश की संख्या में देवी के साध कों (ब्राह्मणों) को भोजन कराना चाहिए । इसके पश्चात् सौभाग्यवती स्त्रियों तथा कुमारी कन्याओं को भी भोजन के रूप में घृतयुक्त खीर आदि मिष्ठान प्रदान करना चाहिए जिससे साधक को मन्त्रसिद्धि की प्राप्ति होती है। ससम्मान स्वगुरु को भी सामर्थ्यानुसार यथेष्ट दक्षिणा प्रदान करनी चाहिए। होम के समय साधक को मन्त्र के पश्चात् 'स्वाहा' तथा तर्पण के समय द्वितीयान्त देवता नाम सहित 'तर्पयामि स्वाहा' (अमुकं तर्पयामि स्वाहा) का प्रयोग करना चाहिए। न्यास तथा पूजन के समय 'नमः' का प्रयोग करना चाहिए। अभिषेक (मार्जन) में मन्त्र के पश्चात् देवता का नाम तत्पश्चात् 'सिञ्चामि' (अमुकं सिञ्चामि) बोलना चाहिए।

इस प्रकार पुरश्चरण क्रिया के बाद मन्त्र के सिद्ध हो जाने के बाद सभी अभीष्ट काम्य कर्मों को करना चाहिए। सकाम कर्मों में भी यथेष्ट जप के पश्चात् उसके दशांश की संख्या में घृत-युक्त बेल के पत्तों द्वारा अथवा घृत मिश्रित तिल द्वारा हवन करना चाहिए। यदि सम्भव हो तो साधक यथाविधि तर्पण, मार्जन तथा ब्राह्मण भोजन भी कराये जिससे काम्य कर्म की सिद्धि शीघ्र होती है। (मन्त्र दीक्षा के पश्चात्) साधक को स्वगुरु को अपनी

समस्त सम्पत्ति अथवा आधा अथवा एक चौथाई भाग गुरु-दक्षिणा के रूप में अर्पित करना चाहिए। इसी प्रकार किसी काम्य कर्म की समाप्ति पर भी स्वगुरु को यथोचित दक्षिणा देनी चाहिए।

जो साधक कुल्लुका के ज्ञान से रहित है, गुरु पादुका मन्त्र का जप नहीं करता है, गुरु को यथाविधि दक्षिणा प्रदान नहीं करता तथा चक्र-पूजन भी नहीं करता वह यदि इस साधना मार्ग का अनुसरण करता है तो निश्चित ही स्वयं को पीड़ित करने का कार्य करता है।

।। परदाराभिगमन विषये जिज्ञासा।।

श्रीदेव्युवाच

कथितं परमेशान परदारविधौ मयि।
न पापं जायते सुभ्रु परदारविधौ मम।।९२।।
परस्य दारान् संस्पृश्य जप्यते यदि साधकैः।
तदैव महती सिद्धिर्नात्र कार्या विचारणा।।९३।।
कालीकल्पप्रकाशे च कथितं यन्महेश्वर।
अत्रैव सम्यगाख्यानं कुरुष्व हृदयप्रिय।।९४।।

हे समस्त सृष्टि के परम शासक प्रभु! कालीकल्प के प्रकटीकरण (वर्णन) के समय परदार विधि के आख्यान में आपने मुझसे कहा था कि सुभ्रु (मनोहर स्वरूप वाली)! परदाराभिगमन रूप कर्म से मुझे कोई पाप नहीं लगता। पर स्त्री का स्पर्श करते हुए यदि साधकों द्वारा मन्त्र जप किया जाता है तो उसे महान सिद्धि की प्राप्ति होती है। अतः हे मेरे प्राणप्रिय! इस विषय को मुझसे आप स्पष्ट रूप से कहें कि ऐसा क्यों है?

।। परदाराभिगमन-व्यवस्था।।

श्री भैरव उवाच

शृणु देवि महाभागे आपदुद्धारकारिणि।
अकथ्यं यन्महादेवि तव स्नेहात् प्रकाश्यते।।९५।।
परदारविधौ वेदनिन्दावादः प्रवर्तते।
तासां सङ्गान्महेशानि तामिस्रं नरकं भवेत्।।९६।।
वेदार्थमिति विज्ञाय कथं कुर्याच्च साधकः।
परदारान् नैव गच्छेद्, गच्छञ्जपेच्चेति वेदः।।९७।।
श्रुतिद्वयविरोधित्वाद्गच्छेरन् परयोषितः।
तस्माच्छृणु वरारोहे वेदार्थं कथयामि ते।।९८।।

स्वभक्तों की विपत्तियों से रक्षा करने वाली हे महादेवि! सुनो, जो वर्णन के अयोग्य होने के कारण कहने योग्य नहीं है, उस विषय को तुम्हारे प्रति अपने प्रेम के कारण मैं कहता हूँ। जो मनुष्य वेदों की निन्दा करने वाले हैं उन्हीं के द्वारा ही यह पर स्त्री सम्बन्ध की क्रिया प्रचलित की हुई है। 'जो मनुष्य पर-स्त्रियों का सङ्ग करता है, वह तामिस्र नरक का भागी होता है' वेदों में कहे गये इस अर्थ को जानने वाला भला कोई साधक कैसे पर स्त्री सम्बन्ध कर सकता है। 'पर स्त्री के पास नहीं जाना चाहिए (उससे सम्बन्ध नहीं करना चाहिए)' तथा 'पर स्त्री से सम्बन्ध करते हुए जप करना चाहिए' इस प्रकार पर स्त्री सम्बन्ध के विषय वेद की दो परस्पर विरुद्ध श्रुतियाँ प्राप्त होती हैं। अतः वेद (श्रुतियों) का वास्तविक अर्थ (भाव) क्या है, हे वरारोहे! तुमसे कहता हूँ, सुनो!

।। वेदोत्पत्ति-कर्तादि विषये जिज्ञासा।।

श्रीदेव्युवाच

को वेदः कुत आयाति को वा तस्य प्रकाशकः।
कः कर्ता तस्य वेदस्य तत्सर्वं कथयस्व मे।।९९।।

हे देव! वेद किसे कहते हैं? इसकी उत्पत्ति कहाँ से हुई है, इसको प्रकट करने वाला तथा इसकी रचना करने वाला कौन है, ये सभी बातें आप मुझे बतायें।

श्री भैरव उवाच

एको वेदश्चतुर्धाभूद् यजुःसाम-ऋगादयः।
वेदो ब्रह्मेति साक्षाद्वै जानेऽहं नगनन्दिनि।।१००।।
स्वयं प्रवर्तते वेदस्तत्कर्ता नास्ति सुन्दरि।
स्वयंभूरीशो भगवान् वेदो गीतज्ञत(या?था)पुरा।।१०१।।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः।
प्रकाशका भवन्त्येते कृष्णाद्यास्त्रिदिवौकसः।।१०२।।
वैदिकप्रतिपाद्यश्च अर्थो धर्मः प्रकीर्तितः।
विपरीतं महेशानि अधर्मो भवति प्रिये।।१०३।।
परदारागमं वेदे तन्निषिद्धं सुरेश्वरि।
यद्धि वैधेतरं देवि तन्निषिद्धं महेश्वरि।।१०४।।

हे पर्वतराज हिमालय की पुत्रि! वेद वास्तव में एक ही है। उसी एक ही वेद के ऋग्वेद, यजुःवेद, सामवेद तथा अथर्ववेद नाम से चार भाग हो गये हैं। वेद साक्षात् ब्रह्मस्वरूप है, ऐसा मैं जानता हूँ। वेद का प्रचलन (प्राकट्य) स्वयं ही होता है। हे सुन्दरि! इस वेद का रचनाकार कोई भी (यहाँ तक कि ईश्वर भी) नहीं होता है। अनादि अज निर्गुण निराकार ब्रह्म

के स्वयं ही सगुण साकार रूप हुए परमात्मा के मुख से स्वाभाविक रूप से निःश्वासवत् वेद का प्राकट्य प्राचीन काल (सृष्टि के आदि) में होता है। इसके पश्चात् होने वाले शिव से लेकर ऋषि पर्यन्त सभी इसके केवल स्मरण कर्ता होते हैं न कि रचनाकार। कृष्ण द्वैपायन (व्यास) तथा देवतागण भी वेद के प्रकाशक ही होते हैं। वेदों में जिन अर्थों का प्रतिपादन (कर्म-विधियों तथा निर्देशों का उल्लेख) किया गया है वे ही वास्तविक धर्म कहे जाते हैं। इसके विपरीत व्यवहार करना अधर्म कहा जाता है। वेद में परस्त्रीगमन का निषेध किया गया है। जो निषिद्ध कर्म हैं वही कुछ विशेष स्थितियों में वैध (उचित) भी हो जाता है।

परस्त्रियं महेशानि मनसा भावयञ्जपेत्।
तदैव सर्वसिद्धिः स्यान्नात्र कार्या विचारणा॥१०५॥
इति सिद्धान्तविद्भिश्च ज्ञेयं तन्त्रोपदेशिकम्।
महाचीनद्रुमलतावेष्टनेन च यत्फलम्॥१०६॥
तत्फलं नास्ति देवेशि त्रैलोक्ये सुरवन्दिते।
यस्मिन् मन्त्रे य आचारस्तत्र धर्मस्तु तादृशः॥१०७॥
कृतार्थस्तेन जायेत स्वर्गो वा मोक्ष एव च।
भ्रान्तिरत्र न कर्तव्या सिद्धिर्भवति निश्चितम्॥१०८॥
तस्मादनेन देवेशि पापं नास्ति महेश्वरि।
तस्मात् कुर्यात् साधकेन्द्रः परदारगमं शुभे॥१०९॥
अथान्यत् संप्रवक्ष्यामि मन्त्रसिद्धेश्च लक्षणम्।
मातृकापुटितं कृत्वा स्वमन्त्रं प्रजपेत् सुधीः॥११०॥
क्रमोत्क्रमाच्छतावृत्त्या तदन्ते केवलं मनुम्।
एवं तु प्रत्यहं जप्याद् यावल्लक्षं समाप्यते॥१११॥
निश्चितं मन्त्रसिद्धिः स्यादित्युक्तं तन्त्रवेदेभिः।
पुरश्चर्याशतेनापि प्रयोगविधिना तथा॥११२॥
कल्पकोटिजपेनापि पूजायाः शतकेन च।
न सिद्धिर्जायते सुभ्रु! यदि भावो न जायते॥११३॥

इति श्री बृहन्नीलतन्त्रे भैरवभैरवीसंवादे (पुरश्चर्याविधिनिरूपणं) चतुर्थः पटलः॥४॥

मन्त्र का जप करते समय केवल मानसिक रूप से पर स्त्री का चिन्तन करना चाहिए। इसी से ही सभी सिद्धियों की प्राप्ति हो जाती है, इसके विषय

में कोई अन्यथा विचार अथवा सन्देह नहीं करना चाहिए। ऐसा तन्त्र के उपदेशकों तथा उसके सिद्धान्तों (मूल तत्वों) को जानने वाले विद्वानों द्वारा समझा गया है। हे सुरों द्वारा पूजित देवि! महाचीन क्रम साधना मार्ग में 'वृक्ष-लता आलिङ्गन रूप' लता साधना द्वारा जिस उत्तम फल की प्राप्ति होती है, वैसे फल की प्राप्ति अन्य किसी साधना द्वारा त्रिलोकों में भी नहीं है। जिस मन्त्र की साधना में जैसे आचरण नियमों (कर्म विधानों) का निर्देश है, वैसा ही व्यवहार करना, उस मन्त्र की साधना में साधक के लिए धर्मरूप है। इस साधना द्वारा साधक स्वर्ग (स्वर्गीय भोग) तथा मोक्ष (अथवा इच्छानुसार स्वर्ग अथवा मोक्ष) रूप फल प्राप्त कर कृतार्थ (अभीष्ट को उपलब्ध) हो जाता है। इसमें किसी प्रकार से सन्देह नहीं करना चाहिए क्योंकि इसमें अभीष्ट की सिद्धि अवश्य ही होती है। इसलिए श्रेष्ठ साधकों को इस शुभ परस्त्रीगमनरूप साधना को अवश्य करना चाहिए। हे देवेशि! इससे साधक को किसी भी प्रकार का पाप नहीं लगता है।

अब मैं मन्त्र की सिद्धि के लिए दूसरी विधि को कहता हूँ। अनुलोम विलोम रूप मातृका वर्णों द्वारा अपने अभीष्ट मन्त्र को सम्पुटित करके सौ बार जपना चाहिए। इसके बाद केवल मन्त्र का ही जप करना चाहिए। इस प्रकार प्रतिदिन जप करते हुए, जप की संख्या एक लाख पूरी होने पर निश्चित रूप से मन्त्र सिद्ध हो जाता है। ऐसा तन्त्र के विद्वानों द्वारा कहा गया है। हे सुभ्रु! यदि साधक के चित्त में (श्रद्धा-विश्वास सहित) देवत्व भाव की जागृति नहीं होती है तो सैकड़ों पुरश्चरणों, प्रयोग विधियों सैकड़ों बार करने वाली पूजाओं तथा करोड़ों कल्पों तक मन्त्र जप की साधनाओं द्वारा भी मन्त्र सिद्धि की प्राप्ति नहीं होती है।

।। श्री बृहन्नील तन्त्र के भैरव भैरवी संवाद में पुरश्चर्या विधि निरूपण संज्ञक चतुर्थ पटल की 'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

* * *

॥ पञ्चमः पटलः॥

(नैमित्तिकार्चन-पीठतदीश्वरीवर्णनम्)

॥ काम्यार्चन-निरूपणम्॥

श्री भैरव उवाच

नित्यार्चनरतो मन्त्री कुर्यान्नैमित्तिकार्चनम्।
नैमित्तिकार्चने सिद्धिः कुर्यात् काम्यमखण्डितम्॥१॥
मासार्धमथवा मासं द्विगुणं त्रिगुणं तथा।
यावत्फलाप्तिभाग् योगी तावदेवं समाचरेत्॥२॥
नैमित्तिके च काम्ये च फलाप्तिर्मण्डलावधिः।
नचेत्तु द्विगुणीकृत्य यथा स्यात् फलभाक् सुधीः॥३॥
अष्टम्यां च चतुर्दश्यां पूजयेच्च प्रयत्नतः।
यद्यत् प्रार्थयते मन्त्री तत्तदाप्नोति नित्यशः॥४॥
लभते मञ्जुलां वाणीमष्टम्यां च ततो जपेत्।
मध्याह्नसमये देव्याः पूजनं सिद्धिदायकम्॥५॥
प्रातःकाले महादेवि पूजा कार्या विधानतः।
सायाह्ने च महादेवि पूजा च शस्यते बुधैः॥६॥

स्वेष्ट देवता का नित्य अर्चन करने वाले साधक को पर्वों के अनुसार नैमित्तिक अर्चन भी करना चाहिए। नैमित्तिक अर्चन सिद्धि की प्राप्ति में उपयोगी होता है। इसी भाँति आवश्यकतानुसार सकाम जप-पूजन भी देवता का अखण्ड रूप से करना चाहिए। अर्धमास, एकमास अथवा दो-तीन मास जब तक कि कर्म के फल की प्राप्ति न हो जाए तक तक नित्य अखण्ड रूप से काम्यार्चन करते रहना चाहिए। सामान्यतः नैमित्तिक तथा काम्य कर्मों की फल प्राप्ति चालीस दिनों में (अथवा उसके बाद ही) हो जाती है, परन्तु यदि ऐसा न हो तो पुनः चालीस दिनों तक अनुष्ठान करना चाहिए जिससे साधक अवश्य ही फल प्राप्ति का भागी होता है। अष्टमी तथा नवमी को देवी का विशेष रूप से प्रयत्नपूर्वक पूजन करना चाहिए, ऐसा करने पर साधक भगवती से जो भी कामना करता है, उसे अवश्य ही नित्य निरन्तर प्राप्त करता रहता है। अष्टमी को देवी का पूजन-जप करने वाला साधक मधुर,

मनोहर तथा सर्वजन आकर्षक वाणी को प्राप्त कर लेता है। दिन के तीनों कालों में, सम्भव हो तो देवी की अर्चना करनी चाहिए। प्रातः काल की पूजा पूरे विधि-विधान से करनी चाहिए। मध्याह्न के समय की गई पूजा सिद्धि-दायक होती है। विद्वानों द्वारा सायं काल की पूजा प्रशंसनीय मानी गई है।

अष्टम्यां पूजनं देव्याः सर्वकामफलप्रदम्।
रम्भापुष्पं बीजपूरं सुगन्धिपरिमिश्रितम्॥७॥
मिश्रीकृत्य बलिं दद्यादष्टम्यां च विशेषतः।
स्वर्णमालां महादेव्यै दद्याद् गन्धैर्विशेषतः॥८॥
फलं क्षीरं तथा दद्यादधिकं शर्करान्वितम्।
तस्मात् सर्वप्रयत्नेन संपत्त्यै पूजयेच्छिवाम्॥९॥
सूक्ष्मतण्डुलसिद्धार्थान् देव्यै दद्यात् प्रयत्नतः।
अष्टम्यां च चतुर्दश्यां पूजयेच्च यथाविधि॥१०॥
आज्ञासिद्धिमवाप्नोति ज(वा?पा)पुष्पं च वर्कराम्।
चन्दनं चार्ककुसुमं दद्यात् श्वेतापराजिताम्॥११॥
अर्घ्यं दद्याद्विशेषेण नित्यपूजा(च?सु) सर्वदा।
अष्टोत्तरशतं जप्यं यावज्जीवितसंख्यया॥१२॥

अष्टमी तिथि को देवी का पूजन करना समस्त इच्छित फलों को देने वाला होता है। पूजन के पश्चात् रम्भा, पुष्प, बीजपुर तथा अनेक सुगन्धित पदार्थों को मिश्रित कर विशेष रूप से अष्टमी को देवी को बलि प्रदान करना चाहिए। सुवासित स्वर्ण (निर्मित पुष्पों की) माला (अभाव में सुगन्धित पीले पुष्पों की माला) देवी को विशेष रूप से प्रदान करना चाहिए। ऋतु के अनुरूप फल, घृत-शक्कर युक्त खीर, महीन चावलों से पका भात तथा अन्य भोज्य पदार्थ आदि देवी को प्रदान करते हुए तारारूपिणी शिवा की हर प्रकार से अपने सामर्थ्यानुसार ऐश्वर्य मयी पूजा करनी चाहिए। अष्टमी तथा चतुर्दशी को विशेष रूप से सविधि यथोचित पूजन करना चाहिए। इस पूजन में देवी को जपा-पुष्प तथा वन-तुलसी प्रदान करने से साधक को आज्ञा-सिद्धि की प्राप्ति होती है। देवी को पूजन में रक्त चन्दन, आक(मदार) पुष्प तथा श्वेत अपराजिता भी अर्पित करना चाहिए। नित्य पूजा में विशेष रूप से सदैव अर्घ्य प्रदान करना चाहिए। साधक जब तक जीवित रहे उसे नित्य मन्त्र का एक सौ आठ बार जप करना चाहिए।

।। दुर्गा महाष्टमी प्रपूजन-माहात्म्यं तत्र आसव सहित बलि निरूपणञ्च।।

यस्तु संपूजयेद् दुर्गा महाष्टम्यां प्रयत्नतः।
स त्रिजन्मार्जितं पापं तत्क्षणादेव नाशयेत्।।१३
ये जपन्ति महामायां ज्ञात्वा तत्त्वेन भैरवम्।
मधुना पायसं चैव क्षीरमाज्यं च शर्कराम्।।१४।।
बलिं दद्याच्च गोधां वै चासवं च प्रशस्यते।
अत्रासवमवश्यं च ब्राह्मणस्तु विशेषतः।।१५।।
आसवं च महेशानि शृणुष्वैकमनाः प्रिये।

जो साधक दुर्गा महाष्टमी (वसन्त तथा शरद् की नवरात्रियों की अष्टमी, विशेष रूप से शरदष्टमी) को भगवती का विधिपूर्वक भव्य पूजन करता है। उसका तीन जन्मों का संग्रहीत समस्त पाप उसी क्षण नष्ट हो जाता है। इसी भाँति जो भी साधक महामाया रूपिणी देवी के परम तत्व को उनके भैरव के स्वरूप सहित भली-भाँति जानकर उनका जप करता है, उसके भी जन्मजन्मान्तर के सारे पाप नष्ट हो जाते हैं। पूजन के पश्चात् महामाया को मधु सहित दुग्ध, घृत तथा शकर सहित खीर, गोधा का माँस तथा आसव बलि के रूप में प्रदान करना चाहिए। बलि के साथ, विशेष रूप से ब्राह्मण साधक देवीको आसव अवश्य अर्पित करे। हे महेशानि! आसव अर्पण के विषय में मेरे कथन को एकाग्रचित्त होकर सुनो।

।।आसवं प्रति देव्याः जिज्ञासा।।

श्रीभैरव्युवाच

भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु।
केन रुपेण देवेश दद्याद् विप्रोऽथ चासवम्।।१६।।
विशेषं कथयस्वाग्रे सारात् सारतरं यतः।
कैतवं च परित्यज्य यदि स्नेहोस्ति मां प्रति।।१७।।
केन पेयमासवं च केनापेयं वदस्व मे।
अपेयं तन्महाबाहो पेयं वा तद्वदस्व मे।।१८।।
यस्मान्मे परमेशान दूरीभवति संश(व?यः)।
कोटीनां तिसृणां देव तन्त्राणां सारमुत्तमम्।
तस्मादत्र प्रकथ्यं ते सत्यं सुरगणार्चित।।१९।।

हे भगवन! समस्त शास्त्रों तथा आगमों में वर्णित धर्म के सर्वस्वरूप को जानने वाले देवेश! ब्राह्मण को किस प्रकार देवी को आसव अर्पित करना

चाहिए। यदि आपका मेरे प्रति प्रेम है तो इस विषय को मेरे समक्ष बिना कोई छल-कपट किए स्पष्ट रूप से अत्यन्त संक्षेप में कहिए। किन लोगों के लिए सुरा अपेय (पीने योग्य नहीं) है तथा कौन इसे पीने का पात्र है एवं जो सुरा अपेय कही गयी है वह किस प्रकार से पेय (पीने के योग्य) हो जाती है। हे महाबाहो! परमेशान! आप इस विषय में मेरे सन्देह का भली-भाँति निवारण करें। हे देवगणो द्वारा नित्य पूजित देव! तीन करोड़ तन्त्र शास्त्रों का जो अन्तिम सार रूप सर्वोत्तम तत्व (सुरा के विषय में है) उसे वास्तविक रूप से आप इस समय मुझसे कहें।

।।सुरायाः पेयत्वापेयत्वं तस्याः भेदानि च।।

श्रीभरैव उवाच

शृणु देवि महाभागे सर्वशास्त्रार्थगामिनि।
जिज्ञासितं परं तत्त्वं तन्मे निगदितं शृणु।।२०।।
"मद्यमदेयमपेयमनिर्ग्राह्यं चेति, जपे पेयं चेति।"
सुरा वै मलं सत्त्वानां पाप्मा तु मलमुच्यते।
तस्माद् ब्रह्मणराजन्यौ वैश्यश्च न सुरा पिबेत्।।२१।।
अस्यां शृणु वरारोहे सुरां सुगणार्चिताम्।
गौडी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा।।२२।।
पातव्या हि महाभागे नतु कैश्चित् द्विजोत्तमैः।
पनसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम्।।२३।।
माक्षिकं तालमा(ध्वि?ध्वी)कं मैरेयं नारिकेलजम्।
समान्येव विजानीयान्मद्या(न्ने?न्ये)कादशैव तु।।२४।।

सभी शास्त्रों के तत्वार्थ को जानने वाली महाभागे हे देवि! तुमने जिस परम तत्व को जानने की अभिलाषा व्यक्त की है, सुरा विषयक उस ज्ञान को मैं कहता हूँ। सुनो! "मद्य अदेय अपेय तथा अग्राह्य (न किसी को देने योग्य, न पीने योग्य और न ही अन्य किसी भी प्रकार से ग्रहण करने योग्य) है" (परन्तु) "जप काल में पेय है", इस प्रकार सुरा के विषय में दो प्रकार के कथन हैं। सुरा सत्वमय पदार्थों अन्नादि का मल रूप है, और जो अपवित्र-पाप स्वरूप (जिसके सेवन से पाप की उत्पत्ति होती है) है, उसे ही मल कहा जाता है। इसलिए ब्राह्मण, क्षत्रिय तथा वैश्य को सुरापान नहीं करना चाहिए। देवताओं द्वारा पूजित (सेवित) इस सुरा के विषय में हे वरारोहे! और भी सुनो! गौड़ी (गुड़ से बनी), पैष्टी (चावल, जौ आदि अन्न

को पीस कर बनाई गई) तथा माध्वी (पुष्प-परागों अथवा फलों के रस से बनी) ये तीन प्रकार की विशेष सुरा जाननी चाहिए। किसी भी द्विज (पूर्व के त्रिवर्ण) को इसे नहीं पीना चाहिए। इसके अतिरिक्त पनस (कटहल), द्राक्षा (बड़ा अङ्गूर), महुआ, खजूर, ताड़फल, गन्ने के रस, शहद, ताड़ वृक्षों के रस, माधवी लता, मैरेय तथा नारियल के जल से निर्मित, ये ग्यारह प्रकार की सामान्य सुरा जाननी चाहिए।

।। अमन्त्रित सुरापाने दोषः तत्र शुक्रोपाख्यानम्।।

सुरापानविधौ देवि निन्दा केषां च संमता।
विशेषं शृणु देवेशि तव स्नेहात् प्रकाश्यते।।२५।।
तन्निषिद्धा महादेवि या च वैधेतरा भवेत्।
अमन्त्रितसुरापाने प्रायश्चि(तो?त्तं) विधीयते।।२६।।
शृणु देवि महाभागे पुरावृत्तं मनोहरम्।
शुक्रो दैत्यगुरुः पू(र्वे?र्वं) सिद्ध्यर्थं कृतवाञ्जपम्।।२७।।
कल्पकोटिजपेनापि नासिद्ध्यत कदाचन।
पीत्वासवं महादेवि प्रत्यहं जपतत्परः।।२८।।
चित्तोन्मादं तदा तस्य जातं परमकौतुकम्।
जपभ्रष्टोऽभवत्तत्र सस्मार वनितां शुभाम्।।२९।।
तथोर्वशी च स्वर्वेश्या तत्र गत्वा मनोरमम्।
वाक्यं सर्वरसस्वादु कथयित्वा सुशोभने!।।३०।।
शुक्रेण सार्धं देवेशि रमयामास चोर्वशी।
शुक्रोत्पत्तिश्च जायेत ज्ञानं य(ज)ज्ञे ततः परम्।।३१।।

हे देवि! किस प्रकार से सुरापान करना निन्दनीय है तथा किस विधि से पीना शास्त्र सम्मत (उचित) है, इस विषय को विशेष रूप से तुम्हारे प्रेम के कारण कह रहा हूँ, सुनो! जो सुरापान सामान्य रूप से निषिद्ध कहा गया है, वही विशेष परिस्थिति में विधेय (उचित, योग्य) हो जाता है। सुरा को (विशेष मन्त्रों द्वारा) बिना अभिमन्त्रित किये पीने पर प्रायश्चित करने का विधान किया गया है। हे देवि महाभागे! प्राचीन काल के एक वृतान्त (घटना, कथा) को मैं तुमसे कहता हूँ, सुनो! पूर्व काल में दैत्यगुरु शुक्राचार्य ने सिद्धि प्राप्ति के लिए मन्त्र-जप (करना प्रारम्भ) किया। कल्पान्त तक जप करने पर भी उन्हें किसी भी प्रकार से सिद्धि की प्राप्ति नहीं हुई। हे महादेवि! तब उन शुक्राचार्य ने सुरापान करते हुए प्रतिदिन मन्त्र जप करना प्रारम्भ कर दिया। उस सुरापान के कारण उनका चित्त विक्षिप्त (असन्तुलित) हो गया तब एक अति आश्चर्यजनक

(मनोरञ्जक) घटना घटित हुई। उन्होंने जप-कर्म का परित्याग कर एक सुन्दर स्त्री का स्मरण (कामना) किया। तब स्वर्ग की अप्सरा उर्वशी उनके पास आकर सुरुचिपूर्ण मधुर रस पूर्ण वचनों द्वारा वार्तालाप करने लगी। हे सुशोभने! फिर उस उर्वशी ने शुक्राचार्य के साथ आनन्दपूर्वक रमण किया। वीर्य स्खलन होने के बाद उन्हें अपनी इस (साधन-पतित) अवस्था का ज्ञान हुआ।

तत्त्वं ज्ञात्वा ततः शुक्रः शशापासवमुत्तमम्।
तेन शापेन देवेशि शप्तं चासवमुत्तमम्।।३२।।
ततः प्र(भू?भृ)ति तद् देवि सिद्धये नच जायते।
एवं क्रमेण देवेशि शतवर्षं गतं प्रिये।।३३।।
ततः सा च भगवती काली कालस्वरूपिणी।
उवाच सादरं वाक्यं काली दैत्यगुरुं प्रति।।३४।।
शृणु वत्स महद्वाक्यं सावधा(ना?नो)ऽवधारय।
कथं शप्तं महाभाग चासवं देवदुर्लभम्।।३५।।

अपनी इस अवस्था का कारण सुरा को मानते हुए उसे सदोष जानकर शुक्राचार्य ने उस श्रेष्ठ सुरा को श्राप दे दिया। उसी शाप के कारण सुरा शप्त (शापित) कही जाती है। उसी समय से हे देवि! उन्हें सिद्धि की भी प्राप्ति नहीं हुई। इस प्रकार साधना करते-करते सौ वर्ष व्यतीत हो गये। तब हे देवि! वह कालस्वरूपिणी भगवती काली उन शुक्राचार्य के सम्मुख प्रकट होकर उनसे आदर सहित यह वचन बोली - हे पुत्र! मेरे वचन को ध्यान से सुनो, हे महाभाग! तुमने इस देव दुर्लभ सुरा को क्यों शाप दिया है।

।। श्रीशुक्राचार्येण देव्याः स्तुति।।

श्रीशुक्र उवाच

सर्वेशे सर्वभूतेशे सर्वभूतसमावृते।
ब्रह्मेशविष्णुनमिते प्रणमामि सदा शिवे।।३६।।
ब्रह्मविष्णुशिवानां च प्रसूते करुणामयि।
जडानां ज्ञानदे देवि त्राहि मां शरणागतम्।।३७।।
तारिणी त्वं महादेवि चात्र पूर्णा युगागमे।
अस्माकं ज्ञानदात्री च विष्णुमातर्नमोऽस्तु ते।।३८।।
त्वं श्रीस्त्वं(हि?चैव)सावित्री सती च त्वं सुरेश्वरि।
आद्ये भवाद्ये सर्वेशे विश्वमातर्नमोऽस्तु ते।।३९।।
शिवे शिवात्मिके घोरे सर्वविद्यानिधे शुभे।
प्रसन्ना भव सर्वज्ञे सर्वमन्त्रप्रकाशने।।४०।।

प्रसीद देवि चास्माकं महाकालीं करालिनीम्।।४१।।
दण्डवत् प्रणिपत्यादौ पुनराह गरीयसीम्।
आसवं च मया शप्तं कारणं शृणु भैरवि।।४२।।
पीत्वासवं महादेवि न सिद्धिर्जायते मम।
तस्माच्छप्तं महेशानि सर्वं निगदितं शृणु।।४३।।

देवी भगवती महाकाली को इस प्रकार अपने सम्मुख उपस्थित देखकर तथा उनके प्रश्न करने पर शुक्राचार्य ने पहले उनको प्रसन्न करने के लिए इस प्रकार से स्तुति करना प्रारम्भ किया – सभी देवताओं तथा सृष्टि के समस्त चराचर भूतों की स्वामिनी, सभी भूतों में व्याप्त रहने वाली तथा ब्रह्मा, विष्णु एवं रुद्र द्वारा प्रणम्य हे शिवे! मैं आपको सदा प्रणाम करता हूँ। आप ही ब्रह्मा, विष्णु तथा शिव (सहित समस्त देवों) को उत्पन्न करने वाली हैं, आप करुणामयी तथा अज्ञानियों को ज्ञान प्रदान करके उनका कल्याण करने वाली हैं। हे देवि! मैं आपकी शरण में हूँ, आप मेरी रक्षा करें। हे महादेवि! आप ही तारिणी हैं। युग के प्रारम्भ में आपको ही पूर्णा कहा जाता है। हम सभी (अज्ञानी) प्राणियों को ज्ञान देने वाली विष्णु (को प्रकट करने के कारण उनकी) माता स्वरूपा आपको मेरा प्रणाम है। हे सुरेश्वरि! आप ही श्री (विष्णु शक्ति लक्ष्मी), सावित्री (ब्रह्मा की शक्ति), सती (रुद्र-शक्ति), आद्या परम शक्ति, सृष्टि का आदिकारण तथा समस्त सृष्टि की सञ्चालिका-प्रशासिका-स्वामिनी हैं। हे! विश्व की मातृस्वरूपा आपको प्रणाम है। हे शिवे (कल्याण रूपिणी)! शिव स्वरूपिणी! भयंकर स्वरूप वाली, सभी विद्याओं की आधार भूमि, सदा सौभाग्य प्रदान करने वाली, 'सर्व' अर्थात् सृष्टि रूपा तथा 'ज्ञ' अर्थात् शुद्ध ज्ञान स्वरूपा तथा सभी मन्त्रों (एवं तन्त्रों) को प्रकट करने वाली हे देवि! आप मुझ पर प्रसन्न हों। सभी जीवों पर कृपा करने वाली हे देवि! हम पर प्रसन्न हों। इस प्रकार स्वयं के द्वारा की हुई स्तुति से प्रसन्न हृदया कालस्वरूपा महाकाली को दण्डवत् प्रणाम करके शुक्राचार्य पुनः उनसे बोले-हे भैरवि! मैंने सुरा को क्यों शाप दिया इसका कारण सुनें। हे देवि! आसव का पान करने पर भी मुझे सिद्धि की प्राप्ति नहीं हुई, इसलिए हे महेशानि! मैंने सुरा को शाप दे दिया। मैंने आपसे सब कुछ स्पष्ट रूप से कह दिया है, अब आपकी जैसी इच्छा हो वैसा करें।

।।महाकाल्याः शुक्राचार्यं प्रति-वचनम्।।

उवाच सा महासाध्वी काली कालस्वरूपिणी।
प्रहसन्तीव सा देवी शुक्रं दैत्यगुरुं प्रति।।४४।।

अमन्त्रिता सुरा वि(प्रो?प्र!) पीता परमदुर्लभा।
तेनैव हेतुना सिद्धिर्न जाता तव सुन्दर।।४५।।
अमन्त्रित सुरा पाने प्रायश्चित्तं विधीयते।
आयसे भाजने भद्रे स्वर्णे रूप्ये तथैव च।।४६।।
ब्राह्मणो वेदवांश्चव पिबेच्च वारुणीं शुभाम्।
तप्तां सुरां पिबेच्चैव नान्यथा सिद्धिमाप्नुयात्।।४७।।
इति ते कथितं दिव्यं सावृत्तान्तमुत्तमम्।
अपेया सा निषिद्धा सानाघ्रेया चेति च क्रमात्।।४८।।
अनिर्ग्राह्या च सा देवि या वै वैधेतरा भवेत्।
तस्माज्जपविधौ ज्ञेया सिद्धिकरी मता।।४९।।

शुक्राचार्य के कथन को सुनकर वह महासाध्वी, कालरूपिणी, महाकाली हंसती हुई सी उनसे बोली – हे सुन्दर! विप्र! आपने परम दुर्लभ सुरा को बिना अभिमंत्रित किए पान किया था, इसीलिए सुरा पान करके जप करने पर भी आपको सिद्धि की प्राप्ति नहीं हुई। बिना अभिमन्त्रित किये सुरा का पान करने वाले मनुष्य को प्रायश्चित करने का विधान कहा गया है। लोहा, सोना अथवा चाँदी किसी भी धातु द्वारा निर्मित पात्र से सुरा पान करने पर वेद के विद्वान ब्राह्मण को प्रायश्चित करना पड़ता है। इसके लिए अति सन्तप्त सुरा को उसे पान करना पड़ता है, अन्यथा उसे सिद्धि की प्राप्ति कभी भी नहीं होती है। हे भैरवि! यह मैंने पूर्वकाल में घटित श्रेष्ठ घटनाक्रम को संक्षिप्त रूप से तुमसे वर्णन किया है। सामान्य रूप से सुरा को पीना, उसे सूंघना अथवा अन्य किसी भी प्रकार से ग्रहण करना निषिद्ध है। परन्तु वही सुरा अभिमन्त्रित होकर ग्रहण के योग्य हो जाती है। इसलिए मन्त्र–जप के समय (अभिमन्त्रित) सुरा का पान सिद्धि प्रदान कारक कहा गया है।

।।आसवानुकल्पं, होमं, विशेष तिथि पूजन फलञ्च।।

सर्ववर्णमहेशानि देया च त्रिविधा सुरा।
अथवासवसंभूत्यै दद्याद्वापि गुडार्द्रकम्।।५०।।
तक्रं वा गुडसंमिश्रं दद्याद् देव्यै प्रयत्नतः।
नारिकेलोदकं कां(श्ये?स्ये)ताम्रे वा विसृजेन्मधु।।५१।।
तारामन्त्रेण काल्याश्च अत्र पूर्णाविधौ तथा।
अनुकल्पं चासवं च दद्यादतिमनोहरम्।।५२।।
रम्भाफलं शालमत्स्यं जुहुयान्मन्त्रवित्तमः।
सर्वां सिद्धिमनुक्रम्य अन्ते मोक्षमवाप्नुयात्।।५३।।

साज्यस्य बिल्वपत्रस्य होमेन जगती वशे।
सहस्रहोमे देवेशि लभते सिद्धिमुत्तमाम्।।५४।।
लभते मञ्जुलां वाणीं महाष्टम्यां च साधकः।
कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः।।५५।।
योगिनीपूजनं तत्र साधनं कुलपूजनम्।
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः।।५६।।
तथा कुलतिथौ शक्तिः पूजिता वरदायिनी।
कुलवारे चतुर्दश्यामष्टम्यां च विशेषतः।।५७।।
शङ्खस्थितं तोयपूर्णं ज(वा?पा)पुष्पं च बर्बरा।
चन्दनं चार्ककुसुमं शुक्ला चैवापराजिता।।५८।।
अ(न्न?र्घ्य)दानं विशेषेण नित्यपूजाक्रमः स्मृतः।
अष्टोत्तरशतं जप्यं यावज्जीवितसंख्यया।।५९
सहस्रं वा जपेन्मन्त्रं नित्यपूजाविधौ प्रिये।
महोग्रायाः सदा पूज्या पूजने कुल्लुका परा।।६०।।

देवी के पूजन में सभी वर्ण के मनुष्यों द्वारा पूर्वोक्त प्रमुख तीनों प्रकार की सुरा (में से कोई भी एक प्रकार की सुरा) देवी को अर्पित करना चाहिए अथवा आसव के समकक्ष माने गये गुड़ तथा अदरक (रस) का मिश्रण अथवा मट्ठा तथा गुड़ के मिश्रण को (अनुकल्प के रूप में) अर्पित करना चाहिए। कांसे के अथवा ताँबे के पात्र में रखा हुआ नारियल का जल तथा मधु भी सुरा के अनुकल्प के रूप में तारा, काली तथा पूर्णा के पूजन में उन्हें मन्त्र सहित अर्पण करना चाहिए। पूजन तथा जप के पश्चात् मन्त्रज्ञ साधक को केला तथा शालमत्स्य द्वारा हवन करना चाहिए (नैवेद्य के रूप में अर्पित करना चाहिए)। इस प्रकार साधक क्रमशः समस्त सिद्धियों को क्रमशः प्राप्त कर उनके फलों का भोग करके अन्त में मोक्ष को प्राप्त करता है।

अभीष्ट (शास्त्र द्वारा अनुमोदित) संख्या में मन्त्र जप के पश्चात् घृत सहित बिल्व पत्र द्वारा एक हजार (अथवा जप संख्या का दशांश) हवन करने से साधक को श्रेष्ठ सिद्धियों की प्राप्ति होती है तथा संसार उसके वशवर्ती हो जाता है। उसे मनोहर वाणी की भी प्राप्ति होती है। जिस प्रकार विष्णु के पर्वों तथा तिथियों में विष्णु का पूजनादि करने से अभीष्ट फल की प्राप्ति होती है, उसी प्रकार महाष्टमी, कुलाष्टमी, चतुर्दशी तथा देवी-दिनों एवं विशेष-विशेष देवी तिथियों में योगिनी पूजन सहित देवी की साधना करना तथा सौभाग्यवती स्त्रियों एवं कन्याओं का पूजन करना साधक को मनोवाञ्छित

सिद्धि देने वाला होता है। कुल तिथियों में पूजन साधक को यथेष्ट वर देने वाला होता है। कुलवारों मङ्गल तथा शुक्रवार को जल-पूरित शंख में जपा पुष्प, पीला चन्दन (वन-तुलसी), आकपुष्प तथा श्वेत अपराजिता डालकर नित्य पूजन क्रमानुसार देवी को अर्घ्य प्रदान करना चाहिए। साधक को जीवन भर देवी का नित्य पूजन तथा पूजनोपरान्त एक हजार आठ अथवा एक सौ आठ बार मन्त्र जप अवश्य करना चाहिए। पूजन न होने की स्थिति में भी एक सौ आठ बार मन्त्र जप जीवन भर तो अवश्य ही करते रहना चाहिए। महोग्रा रूप तारिणी के पूजन में कुल्लुका का जप-पूजन (शिर में न्यास) सदैव करना चाहिए।

।। अनुष्ठानादि कथनं पीठार्चनञ्च।।

स्तोत्रमन्त्रव्रतादीनामनुष्ठानं शृणु प्रिये।
अननुष्ठानतस्तस्याः सर्वं तन्निष्फलं भवेत।।६१।।
महाविद्यां च सुन्दर्या वासुदेवं च योऽर्चयेत्।
प्राप्नोति तत्फलं सर्व हरिसायुज्यतां व्रजेत्।।६२।।
वासुदेवो हरिर्ब्रह्मा तारिणी प्रकृतिः सदा।
एकमूर्तिः सदा चिन्त्या एकमूर्तिः सदा स्थिता।।६३।।
स्वर्गमोक्षप्रदा देवी धनविद्याप्रदायिनी।
धनविद्यायशोलक्ष्मीरायुरारोग्यवर्द्धिनी ।।६४।।
तस्मात्तां पूजयेद् देवीं गन्धपुश्पैश्च धूपकैः।
नैवेद्यैर्विविधैर्भक्तया पूजयेत् तारिणीं सदा।।६५।।
आषाढे शयनं कुर्यात् सिंहे च परिवर्तनम्।
अश्विने बोधयेद् देवीं पशुपायसभोजनैः।।६६।।
रात्रौ पवित्रेण वरं जायते सुरसुन्दरि।
दिवा प्रबोधेऽपि तथा स्वप्नेऽपि च कदाचन।।६७।।
शुक्लाष्टम्यां घटाष्टम्यां घटस्य च विशेषतः।
माघमासस्य च विधो रात्रौ संपूजयेत् सुधीः।।६८।।

हे प्रिये! अब देवी के स्तोत्र, मन्त्र, व्रत तथा अनुष्ठानादि के विषय में सुनो। जो साधक समय-समय पर होने वाले देवी के विशेष अनुष्ठान-पूजन को नहीं करता उसके द्वारा किये जाने वाले अन्य जप-पूजन आदि कर्म प्रायः निष्फल से (अल्प फल देने वाले) हो जाते हैं। जो साधक महाविद्या स्वरूपा तारा, त्रिपुर सुन्दरी तथा वासुदेव का अर्चन करता है, वह सभी अभीष्ट फलों को इसी जीवन में प्राप्त करता हुआ अन्त में हरि के साथ सायुज्य (रूप मोक्ष) को प्राप्त करता है। वासुदेव, हरि, तारा, मूल प्रकृति (आदि) ये सभी

एक ही मूर्ति अर्थात् सच्चिदानन्द रूप एक ही तत्व के भिन्न-भिन्न काल्पनिक (उपासना भेदानुसार) नाम व रूप हैं। इनको सदैव एक ही रूप मानकर चिन्तन (ध्यान) करना चाहिए। इन सभी की एकात्म मूर्तिरूप देवी (तारिणी) धन, विद्या, यश, लक्ष्मी, आयु, आरोग्य आदि को प्रदान करने वाली सदैव वृद्धि करने वाली तथा इच्छानुसार साधक को मोक्ष अथवा स्वर्ग रूप फल देने वाली है। इसलिए उस देवी तारा की गन्ध-पुष्प-धूप-दीप तथा अनेकों प्रकार के नैवेद्य सहित योग्य पदार्थों द्वारा भक्ति सहित नित्य पूजन करना चाहिए।

भगवती के साधक को आषाढ़ मास में देवी का शयनोत्सव तथा सूर्य के सिंह राशि मे प्रवेश करने पर परिवर्तन (करवट बदलने का) उत्सव मनाना चाहिए। आश्विन मास में देवी का प्रबोधन उत्सव करके पशु, खीर आदि भोज्य पदार्थ पवित्र भाव से रात्रि में प्रदान करना चाहिए। ऐसा करने पर देवी जागरण काल में प्रत्यक्ष अथवा स्वप्न में साधक को वर प्रदान करती है। माघ मास की शुक्ला अष्टमी -घटाष्टमी को रात्रि में साधक को विशेष रूप से घट में चन्द्रमा का पूजन करना चाहिए।

पीठार्चनं महादेवि यत्र सिद्धिरनुत्तमा।
पीठानां परमं पीठं कामरूपं महाफलम्।।६९।।
तत्र यत् क्रियते पूजा सकृद्वापि महेश्वरि।
विहाय सर्वपीठानि तस्य देहे वसाम्यहम्।।७०।।
तस्माच्छतगुणं प्रोक्तं कामाख्यायोनिमण्डलम्।
तेषां फलं महेशानि वक्तुं किं शक्यते मया।।७१।।
तत्र कोटिगुणैः सार्धमाद्या वसति तारिणी।
मत्पीठं ब्रह्मणो वक्त्रं गुप्तं सर्वसुखावहम्।।७२।।
यतो देवाश्च वेदाश्च मुनयश्चैव भावजाः।
सर्वेऽप्याविर्भवन्त्येते तेन गुप्तं सदा कुरु।।७३।।
द्विविधं चैव यत्पीठं गौप्तव्यं तन्महेश्वरि।
व्यक्ताद् गुप्तं महापुण्यं दुरापं साधकाधमैः।।७४।।
गुप्तं सर्वत्र देशे तु लभ्यते कुलसुन्दरि।
पीठप्रसङ्गाद् देवेशि पीठानि शृणु भैरवि।।७५।।

हे महादेवि! अब पीठार्चन के विषय में सुनो। जहाँ पूजन करने से साधक को सर्वोत्तम सिद्धि की प्राप्ति होती है। सभी पीठों में सर्वश्रेष्ठ पीठ कामरूप पीठ है। हे महेश्वरि! यहाँ एक बार भी की गई भगवती की पूजा अपार फल देने वाली होती है। जो साधक सभी पीठों को छोड़कर इस पीठ

में विशेष रूप से मेरा पूजन करता है, उसके शरीर में मैं निवास करती हूँ। इसीलिए कामाख्या योनि मण्डल (पीठ-क्षेत्र) अन्य सभी पीठों से सैंकड़ों गुना अधिक श्रेष्ठ तथा फलदायक कहा जाता है। यहाँ पूजन के फलस्वरूप प्राप्त होने वाले फलों का वर्णन करने में मैं ही क्या, कोई भी समर्थ नहीं है। उस कामाख्या पीठ में आद्या शक्ति तारिणी अपने करोड़ों गुणों (सामर्थ्य) सहित निवास करती है। वहाँ गुप्त रूप से स्थित ब्रह्ममुख मेरा पीठ है जो सभी सुखों का आधार है। जिससे इन सभी देवता, वेद, मुनि, (ब्रह्मा के) मानस से उत्पन्न ऋषि आदि सभी का अविर्भाव (प्राकट्य) होता है, उसे इसी कारण से सदा गुप्त रखा जाता है। गुप्त तथा व्यक्त दो प्रकार पीठ कहे गये हैं, दोनों ही महापुण्य दायक हैं। इन्हें गुप्त ही रखना चाहिए। अधम साधकों के लिए ये दोनों ही अति दुर्लभ हैं। हे कुलसुन्दरि! जो गुप्त पीठ है, वह सभी स्थानों पर प्राप्य है। इस पीठ चर्चा में अब हे भैरवि! पीठों के नाम मैं कहता हूँ, सुनो!

।।सिद्धिप्रद स्थान (पीठ) नामानि।।

श्रृणु तानि महाप्राज्ञे श्रेष्ठस्थानानि यानि च।
सिद्धिप्रदानि साधूनां महद्भिः सेवितानि च।।७६।।
पुष्करं च गयाक्षेत्रमक्षया(द्य?दि)वटं तथा।
वराहपर्वतं चैव शिवं चामरकण्टकम्।।७७।।
नर्मदा यमुना गङ्गा गङ्गाद्वारं तथा प्रिये।
गङ्गासागरसङ्गं च कुशावर्तं च बिल्वकम्।।७८।।
श्रीनीलपर्वतं चैव कलम्बकुब्जके तथा।
भृगुतुङ्गं च केदारं सर्वप्रियमहालयम्।।७९।।
ललिता च सुगन्धा च शाकम्भरीपुरं प्रियम्।
कर्णतीर्थं महागङ्गा तिलिकाश्रममेव च।।८०।।
कुमाराख्यप्रभासौ च तथा धन्या सरस्वती।
अगस्त्याश्रममिष्टं मे काण्वाश्रममतः परम्।।८१।।
कौशिकीसरयूशोणज्योतिःसरःपुरःसरम् ।
कामोदकं प्रियं श्रीमत् प्रियमुत्तरमानसम्।।८२।।
मतङ्गवापी सप्तार्चिरन्यद्विष्णुपदं महत्।
वैद्यनाथं महातीर्थं प्रियः कालञ्जरो गिरिः।।८३।।

हे महाप्राज्ञे! उन श्रेष्ठ पीठ स्थानों के नाम सुनो, जो सभी सिद्धियों को देने वाले तथा सत्पुरुषों एवं साधुजनों से सदा सेवित हैं। पुष्कर, गया क्षेत्र, अक्षयवट, वाराह पर्वत, शिव क्षेत्र अमरकन्टक, नर्मदा, यमुना तथा गंगा तट, हरिद्वार, गङ्गासागर, कुशावर्त, बिल्व क्षेत्र, श्री नीलाचल, कलम्ब, कुब्जिका

क्षेत्र, भृगुतुङ्ग, सर्वप्रिय विशाल क्षेत्र केदारनाथ, ललितापुरी, सुगन्धापुरी, शाकम्भरी पुरी, कर्ण तीर्थ, महागङ्गा, तिलकाश्रम, कन्याकुमारी, प्रभास, श्रेष्ठ सरस्वती तट, अगस्त्याश्रम, कण्वाश्रम, कौशिकी, सरयू तट, शोण तट, ज्योतिष्पुर, ज्योतिःसर, कामोदक क्षेत्र, वैभवशाली प्रिय, मानसोत्तर क्षेत्र (मान सरोवर), मतङ्ग-वापी, सप्तार्चि, विष्णु पद, महातीर्थ वैद्यनाथ तथा प्रिय कालञ्जर गिरि।

वामोच्छेदं हरोच्छेदं गर्गोच्छेदं महानलम्।
भद्रेश्वरं महातीर्थं लक्ष्मणोच्छेदमेव च॥८४॥
जानीहि प्रियसृष्टा च कावेरी कपिलोदका।
सोमेश्वरं शुक्लतीर्थं कृष्णवीण्या प्रभेदकः॥८५॥
पाटला च महाबोधिर्नागतीर्थं मदन्तिका।
पुण्यं रामेश्वरं देवि तथा मेघवनं हरेः॥८६॥
ऐलं रमणकं चैव गोवर्द्धनमतिप्रियम्।
हरिश्चन्द्रं पुरश्चन्द्रं पृथूदकमतिप्रियम्॥८७॥
इन्द्रनीलं महानादं तथैव प्रियमेनकम्।
पम्पासरः पञ्चवटी वटीपर्वतिका तथा॥८८॥
गङ्गाबिल्वं च प्रासङ्गः प्रियनादवटस्तथा।
गङ्गावामाचलं चैव तथैव ऋणमोचनम्॥८९॥
गौतमेश्वरतीर्थं च वसिष्ठतीर्थमेव च।
हारीतकं तथा देवि ब्रह्मावर्तं शिवप्रदम्॥९०॥
कुशावर्तमतिश्रेष्ठं हंसतीर्थं तथैव च।
पिण्डावकरणं ख्यातं हरिद्वारं तथैव च॥९१॥

वामोच्छेद, हरोच्छेद, गर्गोच्छेद, महानल, महातीर्थ, भद्रेश्वर, लक्ष्मणोच्छेद तीर्थ, प्रिय सृष्टा, कावेरी, कपिला तट, सोमेश्वर, शुक्ल तीर्थ, कृष्ण वेणी तट, प्रभेदक, पाटलापुरी, महाबोधि क्षेत्र, नागतीर्थ, मदन्तिका, पुण्यतीर्थ रामेश्वर, द्वारिका क्षेत्र मेघवन, ऐल तीर्थ, रमणक तीर्थ (सरोवर), अत्यन्त प्रिय (कृष्ण क्षेत्र) गोवर्धन पर्वत, हरिश्चन्द्र, पुरश्चन्द्र क्षेत्र, अतिप्रिय पृथूदक तीर्थ, इन्द्रनील, महानाद, एनक क्षेत्र, पम्पासर, पञ्चवटी, पर्वतिका वटी क्षेत्र, गंगाबिल्व (गोमुख), प्रासङ्ग, प्रिय नादवट, गङ्गावामाचल, ऋणमोचन तीर्थ, गोतमेश्वर तीर्थ, वशिष्ठ तीर्थ, हारीत तीर्थ, शिवप्रद ब्रह्मावर्त तीर्थ, सर्वश्रेष्ठ कुशावर्त तीर्थ, हंस तीर्थ, पिण्डावकरण तीर्थ तथा प्रसिद्ध हरिद्वार।

तथैव बदरीतीर्थं वामतीर्थं तथैव च।
जयन्तं विजयन्तं च सर्वकल्याणदं प्रिये॥९२॥

विजया शारदातीर्थ भद्रकालीश्वरं तथा।
अश्वतीर्थ सुविख्यातं तथा वेदशिरः प्रियः।।९३।।
ओघवती नदी चैव तीर्थमत्रिपदं तथा।
छागलिङ्गं मातृगणं करवीरपुरं तथा।।९४।।
सप्तगोदावरं तीर्थं सर्वधर्मफलप्रदम्।
अयोध्या मथुरा माया दुर्गा द्वारावती हरेः।।९५।।
विद्यापुरमवन्ती च काञ्ची मङ्गलकोटकम्।
कालीघट्टं गुप्ततीर्थ सिद्धाख्यं सर्वमोहनम्।।९६।।
किरीटमुत्तरातीर्थ दक्षिणातीर्थमुत्तमम्।
विशालातीर्थ काल्याश्च वनं वृन्दावनं तथा।।९७।।
ज्वालामुखी हिङ्गुला च महातीर्थं गणेश्वरम्।
जानीहि सर्वसिद्धीनां हेतुस्थानानि सुन्दरि।।९८।।

इसी तरह बदरीतीर्थ (बदरिकाश्रम), वामतीर्थ, सर्वकल्याणप्रद जयन्त तीर्थ, विजयन्त तीर्थ (नर–नारायण तीर्थ), विजयशालिनी शारदा तीर्थ, भद्रकालीश्वर तीर्थ, अश्व तीर्थ, अतिप्रसिद्ध प्रिय वेदशिर तीर्थ, ओघवती नदीतट क्षेत्र, अत्रिपद तीर्थ, छागलिङ्ग तीर्थ, मातृगण तीर्थ, करवीरपुर, समस्त धर्मों (कर्मों) का फल देने वाला गुप्त गोदावरी तीर्थ, अयोध्या, मथुरा, मायापुरी, दुर्गा, द्वारावती (द्वारिका), विद्यापुर, अवन्तिका (उज्जैन), काञ्चीपुर, मङ्गलकोट, कालीघट्ट (कालीकट), गुप्त तीर्थ, सर्वमोहक सिद्धाश्रम क्षेत्र, किरिट तीर्थ, उत्तरा तीर्थ, उत्तम दक्षिणातीर्थ, विशाला (पुरी) तीर्थ, कालीवन, वृन्दावन, ज्वालामुखी, हिङ्गुलाज तथा महातीर्थ गणेश्वर हे सुन्दरि! इन सभी तीर्थों–क्षेत्रों को सभी सिद्धियों के कारण रूप स्थानवत् (सभी सिद्धियों को प्रदान करने वाले सिद्ध स्थान के रूप में) जानो।

।।पीठानां माहात्म्यम्।।

अत्र सन्निहिता नित्यं सर्वे देवा महर्षयः।
पितरो योगिनश्चैव ये च सिद्धिपरायणाः।।९८।।
आशु सिद्ध्यन्ति कार्याणि श्रद्धाभक्तिमतां प्रिये।
पुण्यकाले पठेद् यस्तु तत्पुण्यमक्षयं भवेत्।।१००।।
श्राद्धकाले पठेद् यस्तु शृणुयाद्वापि भक्तितः।
अक्षयं तद्भवेद्वाक्यं पितृणां परमं सुखम्।।१०१।।
अस्मिन् स्थाने जपेद्यस्तु सिद्धिर्भवति तत्क्षणात्।
अथ वक्ष्ये महेशानि यत्र या देवता शृणु।।१०२।।

इन सभी तीर्थ-क्षेत्रों में सभी देवता तथा महर्षि नित्य गुप्त रूप से निवास करते हैं। सभी पितर योगिनियाँ तथा सिद्धि प्राप्त मनुष्य (सिद्धेश्वर) भी यहाँ गुप्त भाव से रहते हैं। जो भी साधक श्रद्धा तथा भक्तिपूर्वक यहाँ जप-पूजन आदि करते हैं, उनके कार्यों को ये देवता आदि शीघ्र ही सिद्धि प्रदान करते हैं। पुण्य काल में (विशेष नैमित्तिक अथवा काम्य कर्मों के पूजन आदि के समय) जो भी मनुष्य इन तीर्थ (पीठ) नामों का पाठ करता है, उसे अक्षय पुण्य की प्राप्ति होती है। श्राद्ध के समय भक्ति सहित इसका पाठ अथवा श्रवण करने वाले साधक की वाणी अकाट्य (अनुल्लंघनीय) हो जाती है तथा उसके पितरों को परम सुख की प्राप्ति होती है। इन स्थानों पर मन्त्र का जप करने से साधक को अतिशीघ्र ही सिद्धि की प्राप्ति हो जाती है। हे महेशानि! अब मैं इन तीर्थों में वास करने वाले देवताओं के नाम का वर्णन करूँगा, उसे तुम सावधान होकर सुनो।

।। पीठ-देवता-नामानि।।

यत्र ते यानि नामानि कथयिष्यामि तच्छृणु।
मग्नोऽहं परमानन्दे त्वत्कथामृतवारिधौ।।१०३।।
पुष्करे कमलाक्षी च गयायां च गयेश्वरी।
अक्षयाऽक्षयवटकेऽमरेशामरकण्ठके ।।१०४।।
वराहपर्वते च त्वं वाराही धरणीप्रिया।
दुर्मदा नर्मदायां च कालिन्दी यमुनाजले।।१०५।।
शिवामृता च गङ्गायामम्बा तु तिलिकाश्रमे।
कुमारधाम्नि कौमारी प्रभासे सुरपूजिता।।१०६।।
काश्यां चैवान्नपूर्णा च द्राविडे च सरस्वती।
महाविद्या मत्तमेधा अगस्त्याश्रमके तथा।।१०७।।
कौशिकीति प्रियं नाम कोशिकामृतकौशिके।
शारदा सरयूतीरे शोणे च कनकेश्वरी।।१०८।।

परमानन्द प्रदान करने वाले तुम्हारे कथा रूप अमृत समुद्र में डूबा हुआ मैं, जहाँ जिस क्षेत्र में जो देवता है, उनके नामों को कहता हूँ, सुनो! पुष्कर में कमलाक्षी, गया में गयेश्वरी, अक्षया अक्षय वट में तथा अमर कण्टक में अमरेशा का वास है। वाराह पर्वत में तुम ही धरणी प्रिया वाराही के रूप में बसती हो। नर्मदा (नदी) क्षेत्र में दुर्मदा (नर्मदा), यमुना में कालिन्दी पवित्र अमृतरूपिणी जल वाली गङ्गा में शिवामृता, तिलिकाश्रम में अम्बा, कन्याकुमारी में कौमारी, प्रभास क्षेत्र में सुरपूजिता, काशी में अन्नपूर्णा, द्राविड (दक्षिण) में सरस्वती तथा अगस्त्य आश्रम में महाविद्या मत्तमेधा वास करती है। कौशिकी में प्रिय कौशिकामृता सरयू में शारदा तथा शोण तट क्षेत्र में कनकेश्वरी वास करती है।

स्वप्रकाशवशाद् देवि ज्योतिष्मतीह सङ्गमे।
श्रीवहा श्रीगिरौ चैव काली कालोदके तथा॥१०९॥
महादेवि! महाबुद्धिर्नीला चोत्तरमानसे।
मातङ्गी स्यात् मतङ्गे च गुप्तार्चिर्विष्णुपादके॥११०॥
स्वर्गङ्गा स्वर्गमार्गे च गोदावर्यां गवेश्वरी।
विमुक्तिश्चैव गोमत्यां विप्रभावा महाबला॥१११॥
शतप्रभा शतरूपा चन्द्रभागा च तत्र वै।
ऐरावत्यां च ईर्नाम सिद्धिदा सिद्धितीरके॥११२॥
दक्षपञ्चनदे चैव दक्षिणा त्वं प्रकीर्तिता।
औजिसे वीर्यदा त्वं च सङ्गमा तीर्थसङ्गमे॥११३॥
बाहुदायामसन्ता(?) त्वं कुरुक्षेत्रे वपेक्षणा।
तपस्विनी पुण्यतमा भारती भरताश्रमे॥११४॥
सुकथा नैमिषारण्ये पाण्डौ च पाण्डवानना।
विशाल्यां च विशालाक्षी मुण्डपृष्ठे शिवात्मिका॥११५॥
श्रद्धा कनखले तीर्थे शुद्धबुद्धिर्मुनीश्वरे।
सुवेशा सुमना गौरी मानसे च सरोवरे॥११६॥
नन्दापुरे महानन्दा ललिता ललितापुरे।
ब्रह्माणी ब्रह्मशिरसि महापातकनाशिनी॥११७॥
पूर्णिमा चेन्दुमत्याद्यैः सिञ्चयन्ती प्रिया सदा।
जा(ह्नि?ह्न)वीसङ्गमे तृप्तिः स्वधा त्वं पितृतुष्टिदा॥११८॥

हे देवि! स्वप्रकाश से ही प्रकाशमान ज्योतिष्मती शोण तथा ज्योतिसर सङ्गम में, श्री गिरि पर श्री वहा, कालोदक में काली, उत्तर मानसरोवर में महाबुद्धिमती नीला, मतङ्गाश्रम में मातङ्गी, विष्णुपद में गुप्तार्चि, स्वर्माग में स्वर्गङ्गा, गोदावरी में गवेश्वरी, गोमती में विशेष प्रभाव तथा महाशक्तियुता विमुक्ति, चन्द्रभागा में अमिट प्रभावशाली शतरूपा, इरावती में 'ई' संज्ञका तथा सिद्ध तीर्थ में सिद्धिदा का निवास है। दक्षिण पञ्चनद क्षेत्र में तुम ही दक्षिणा (नाम से वास करने वाली) कही जाती हो, औजिस क्षेत्र में वीर्यदा तथा तीर्थसङ्गम में सङ्गमा नाम से तुम ही वास करती हो। बाहुदा में अनन्ता तथा कुरुक्षेत्र में तुम वपेक्षणा नाम वाली हो। भरताश्रम में पुण्यशीला तपस्विनी भारती, नैमिषारण्य में सुकथा तथा पाण्डु क्षेत्र में पाण्डवमुखी (पाण्डुरमुखी), विशालापुरी में विशालाक्षी तथा मुण्डपृष्ठ पर शिवात्मिका निवास करती है। कनखल में श्रद्धा तथा मुनि क्षेत्र में शुद्ध बुद्धिरूपा निवास करती है। मानस

सरोवर में सुन्दर वेश तथा मनवाली गौरी, नन्दापुर में महानन्दा, ललितापुरी में ललिता, ब्रह्मशिर में महापापनाशिनी ब्रह्माणी, पूर्णिमा तथा इन्दुमती आदि के द्वारा सदा सिञ्चित जाह्नवी सङ्गम में तृप्ति तथा पितृ क्षेत्र में पितरों को तुष्टि प्रदान करने वाली स्वधा रूपा तुम ही हो।

पुण्याहा वेणुवत्यां च प्रपायां पापनाशिनी।
शङ्खसंहारिणी घोररूपा चैव महोदरी॥११९॥
गर्गोच्छेदे महारात्रिः प्रबला च महावने।
भद्रा च भद्रकाली च भद्रेश्वरीश्वरप्रिया॥१२०॥
भद्रेश्वरे रमा विष्णुप्रिया विष्णुपदे तथा।
दारुणा नर्मदोच्छेदे कावेर्यां कपिलेश्वरी॥१२१॥
भेदिनी कृष्णवेण्यायां संभेदे शुभवासिनी।
शुद्धा वै शुक्लतीर्थे च प्रभा रामेश्वरे तथा॥१२२॥
महाबोधौ महाबुद्धिः पाटले पाटलेश्वरी।
सुरसा नागतीर्थे च नागेशी नागवन्दिता॥१२३॥
मदन्ते च मदन्ती च प्रमदा च मदन्तिका।
मेघस्वना मेघवने विद्युत्सौदामिनीच्छटा॥१२४॥
रामेश्वरे महा(वि?सि)द्धिर्वीरा चैलापुरे सती।
प्रिया रमणके दुर्गा सुवेशा सुरसुन्दरी॥१२५॥
कात्यायनी महादेवी गोवर्द्धनेऽम्बिका तथा।
शुभेश्वरी हरिश्चन्द्रे पुरश्चन्द्रे पुरेश्वरी॥१२६॥
पृथूदके महावेगा मेनाकेऽखिलवर्द्धिनी।
इन्द्रनीले महाकान्ते रत्नवेशा सुशोभना॥१२७॥

वेणुवती में पुण्यवहा, प्रपा(कुण्ड) में पापनाशिनी शंख हारिणी घोररूपा महोदरी, गर्गोच्छेद में महारात्रि, महावन में प्रबला, भद्रेश्वर में भद्रेश्वर प्रिया भद्रेश्वरी, भद्रा में भद्रकाली, विष्णुपद में विष्णुप्रिया रमा, नर्मदा में दारुणा, कावेरी में कल्पेश्वरी, कृष्ण वेणी में भेदिनी, संभेद में शुभवासिनी, शुक्लतीर्थ में शुद्धा, रामेश्वर में प्रभा, महाबोधि तीर्थ में महाबुद्धि तथा पाटल में पाटलेश्वरी, नागतीर्थ में नागवन्दिता नागेश्वरी सुरसा, मदन्त में मदन्ती प्रमदा मदन्तिका, मेघवन में आकाशीय विद्युत के समान कान्ति वाली मेघस्वना, रामेश्वर में महासिद्धि, एलापुर मे सती, रमणक में प्रिया, दुर्गा क्षेत्र में सुरसुन्दरी सुवेशा, गोवर्धन में अम्बिका कात्यायनी, हरिश्चन्द्र तीर्थ में शुभेश्वरी, पुरश्चन्द्र में पुरेश्वरी, पृथूदक में महावेगा, मेनाक पर अखिल वर्धिनी तथा महाकान्तिमान इन्द्रनील पर रत्नवेशा सुशोभना का वास है।

माहेश्वरी महानादे महातेजा महाबला।
पम्पासरसि शारङ्गा पञ्चवट्यां तपस्विनी॥१२८॥
वटीपर्वतिकायां च पञ्चवर्गा सुरङ्गिणी।
सङ्गमे विन्ध्यसङ्गायां विन्ध्यश्रीर्विन्ध्यवासिनी॥१२९॥
महानन्दा नन्दतटे गङ्गावामाचले शिवा।
आर्यावर्ते महार्या त्वं विमुक्तिर्ऋणमोचने॥१३०॥
अट्टहासे च चामुण्डा तन्त्रेशी गौतमेश्वरे।
वेदमयी ब्रह्मविद्या वशिष्ठे त्वमरुन्धती॥१३१॥
हारीते हरिणाक्षी च ब्रह्मावर्ते व्रतेश्वरी।
गायत्री चैव सावित्री कुशावर्ते कुशप्रिया॥१३२॥
हंसीश्वरी हंसतीर्थे परहंसीश्वरीति च।
पिण्डावकरणे धन्या सुरसा सुखदायिनी॥१३३॥
नारायणी वैष्णवी सा गङ्गाद्वारे विमुक्तिदा।
श्रीविद्या बदरीतीर्थे वामतीर्थे महाधृतिः॥१३४॥
जयन्ते च जयन्ती त्वं विजयन्तेऽपराजिता।
विजयायां महाशुद्धिः शारदायां च शारदा॥१३५॥
सुभद्रा भद्रदा भव्या भद्रकालीश्वरे तथा।
महाभद्रे भद्रकाली हयतीर्थे गिरीश्वरी॥१३६॥

महानाद में अति तेजस्विनी शक्तिमयी माहेश्वरी, पम्पासार में शारङ्गा, पञ्चवटी में तपस्विनी, पर्वतिका वटी में पञ्चवर्गा सुरङ्गिनी, विन्ध्यसङ्गा सङ्गम में विन्ध्यवासिनी, नंदा तट पर महानन्दा, गङ्गावामाचल में शिवा, आर्यावर्त में महार्या (महाआर्या), ऋणमोचन में विमुक्ति, अट्टहास में चामुण्डा, गौतमेश्वर में तन्त्रेशी, वशिष्ठाश्रम में वेदमयी ब्रह्मविद्यारूपिणी तुम ही अरुन्धती रूप से स्थित हो। हारीत आश्रम में हरिक्षाणी, ब्रह्मावर्त में व्रतेश्वरी, कुशावर्त में गायत्री-सावित्री रूपिणी कुशप्रिया, हंसतीर्थ में हंसीश्वरी (परम हंसीश्वरी), पिण्डावकरण में सुखदायिनी श्रेष्ठ सुरसा, गङ्गाद्वार में विमुक्तिदा वैष्णवी नारायणी, बदरीतीर्थ में श्रीविद्या, वामतीर्थ में महाधृति, जयन्त में जयन्ती, विजयन्त में अपराजिता, विजया में महाशुद्धि, शारदा क्षेत्र में शारदा, भद्रकालीश्वर में भव्य रूपिणी शुभ प्रदायिनी सुभद्रा, महाभद्र में भद्रकाली तथा हयतीर्थ में गिरीश्वरी वास करती है।

वेददा वेदमाता व वेदेशा वेदमस्तके।
ओघवत्यां महावीर्या महानद्यां महोदया॥१३७॥

चण्डा चात्रिपदे चैव छागलिङ्गे बलिप्रिया।
मातृदर्शे जगन्माता करवीरपुरे सती।।१३८।।
मलिनी रङ्गिणी वामा परमा परमेश्वरी।
सप्तगोदावरे तीर्थे देवशीर्षाखिलेश्वरी।।१३९।।
अयोध्यायां भवानी च जयदा जयमङ्गला।
माधवी मथुरायां च देवकी यादवेश्वरी।।१४०।।
वृन्दा गोपेश्वरी राधा रासवृन्दावने रसे।
कात्यायनी महामाया भद्रकाली कलावती।।१४१।।
चन्द्रमाला महाशान्तिर्महायोगिन्यधीश्वरी।
व्रजेश्वरी यशोदेति व्रजश्रीर्गोकुलेश्वरी।।१४२।।
काञ्च्यां कनककाञ्ची स्यादवन्त्यामतिपावनी।
विद्या विद्यापुरे चैव विमला नीलपर्वते।।१४३।।
राजेशे श्वेतगङ्गेशी विमला पुरुषोत्तमे।
विरजा याग(पू?पु)र्यां च भद्रेशे भद्रकर्णिका।।१४४।।

वेदमस्तक तीर्थ में वेददा वेदमाता वेदेश्वरी, ओघवती में महावीर्या, महानदी में महोदया, अत्रि पद में चण्डा, छागलिङ्ग में बलिप्रिया, मातृदर्श में जगन्माता, करवीर पुर में सती, सप्त गोदावरी तीर्थ में मलिनी, रङ्गिणी, वामा, परमा, परमेश्वरी, देवशीर्षा तथा अखिलेश्वरी, अयोध्या में जयदा जय मङ्गला भवानी, मथुरा में माधवी, यादवेश्वरी देवकी, रासस्थली वृन्दावन में वृन्दा, गोपेश्वरी राधा, ब्रज में कात्यायनी, महामाया, भद्रकाली, कलावती, चन्द्रमाला, महाशान्ति, महायोगिन्यधीश्वरी, व्रजश्री गोकुलेश्वरी व्रजेश्वरी यशोदा, काञ्ची में कनककाञ्ची, अवन्तीपुरी में अति पावनी, विद्यापुर में विद्या, नीलपर्वत में विमला, राजेश में श्वेत गंङ्गेशी, पुरुषोत्तम क्षेत्र में विमला, यागपुरी में विरजा तथा भद्रेश में भद्रकर्णिका स्थित है।

तमोलिप्ते तमोघ्नी च स्वाहा सागरसंगमे।
कुलश्रीवंशवृद्धिश्च माधवी माधवप्रिया।।१४५।।
मङ्गला मङ्गले कोटे राढे मङ्गलचण्डिका।
ज्वालामुखी शिवापीठे मन्दारे भुवनेश्वरी।।१४६।।
कालीघट्टे गुह्यकाली किरीटे च महेश्वरी।
किरीटेश्वरी महादेवी लिङ्गाख्ये लिङ्गवाहिनी।।१४७।।
साक्षात् सर्वत्र भक्तनामभक्तानां कुतोऽपि न।
अथान्यत् संप्रवक्ष्यामि सिद्धिस्थानानि सुन्दरि।।१४८।।

तमोलिप्त क्षेत्र में तमोघ्नी, सागर सङ्गम में स्वाहा, मधुवन में कुलश्री वंश को वृद्धि करने वाली माधव प्रिया माधवी, मङ्गलकोट में मङ्गला, राढ में मङ्गल चण्डिका, शिवापीठ में ज्वालामुखी, मन्दार में भुवनेश्वरी, कालीघट्ट में गुह्य काली, किरीट में महेश्वरी किरीटेश्वरी महादेवी तथा लिङ्ग संज्ञक तीर्थ में लिङ्ग वाहिनी निवास करती है। भक्तों के लिए ये देवियाँ (देवता) साक्षात् सर्वत्र निवास करते हैं परन्तु अभक्तों के लिए ये कहीं पर भी नहीं हैं। हे सुन्दरि! अब मैं अन्य प्रकार से सिद्ध स्थानों के नामों को कहता हूँ।

सर्वपापविनाशा(र्थि?य)सर्वसिद्धिप्रदानि च।
निर्मितानि शिवेनेह सि(द्ध?द्धि)स्थानानि यानि च॥१४९॥
श्रुत्वा मनसि भाव्यानि प्रकाशान्यधिकारिषु।
अमरेशमहापीठे ईश ओंकारसंज्ञकः॥१५०॥
तत्र दुर्गाद्वयं नाम चण्डिका च महेश्वरी।
प्रभासे सोमनाथादौ देवी च पुष्करेक्षणा॥१५१॥
देवदेवाधिपः शम्भुर्नैमिषे च महेश्वरः।
तत्र प्रज्ञा च देवी च भवानी लिङ्गधारिणी॥१५२॥
पुष्करे च राजगन्धिः पुरुहूता महेश्वरी।
श्रीपर्वते प्रियं नाम शङ्करस्त्रिपुरान्तकः॥१५३॥
मायापि शङ्करी तत्र भक्तानामखिलार्थदा।
जप्येश्वरे महास्थाने शङ्करी च त्रिशूलिनी॥१५४॥
त्रिशूलः शङ्करस्तत्र सर्वपापविमोचकः।
आम्रातकपुरे सूक्ष्मः सूक्ष्माख्या परमेश्वरी॥१५५॥
महाकाले महाकालो महाकाली महेश्वरी।
मध्ये शिवश्च सर्वत्र शर्वाणी परमेश्वरी॥१५६॥

ये सभी सिद्ध स्थान इस संसार में शिव द्वारा निर्मित हैं। सभी स्थान समस्त सिद्धियों को देने वाले तथा सम्पूर्ण पापों का विनाश करने वाले हैं। इनके नामों का श्रवण करने से अधिकारी भक्तों के मन में दिव्य ज्ञानरूपी प्रकाश की उत्पत्ति होती है। अमरेश नामक महापीठ में ओंकार संज्ञक ईश्वर तथा चण्डिका और महेश्वरी नाम वाली दुर्गा की दो मूर्तियां वास करती हैं। प्रभास क्षेत्र में सोमनाथ तथा देवी पुष्करेक्षणा एवं नैमिष तीर्थ में देवाधिदेव महेश्वर शम्भु और प्रज्ञा देवी तथा लिङ्ग धारिणी भवानी वास करती है। पुष्कर में राजगन्धि तथा पुरुहूता (अनेकों के द्वारा आवाहिता) महेश्वरी, श्री पर्वत पर प्रियसंज्ञक त्रिपुरारि शंकर तथा भक्तों को सर्वस्व प्रदान करने वाली माया शङ्करी भी स्थित

है। महास्थान जप्येश्वर में त्रिशूलधारिणी शंकरी स्थित है, यहाँ त्रिशूल ही सर्वपापनाशक शंकर स्वरूप है। आम्रातक पुर में सूक्ष्म संज्ञक शिव तथा सूक्ष्मा नाम वाली परमेश्वरी स्थित है। महाकाल में महाकाल शिव तथा महेश्वरी महाकाली हैं। सब स्थानों के मध्य में शिव तथा परमेश्वरी शर्वाणी वास करती है।

केदारेश्वर ईशानो देवी सन्मार्गदायिनी।
भैरवे भैरवः शम्भुभैरवी परमेश्वरी॥१५७॥
गणक्षेत्रे मङ्गलाख्या शिवोऽहं प्रपितामहः।
कुरुक्षेत्रे शिवः स्थाणुः शिवा स्थाणुप्रिया परा॥१५८॥
इष्टलाभे स्वयंभूश्च देवी स्वायम्भुवा मता।
उग्रः कनखले प्रोक्तः शिवोग्रा शिववल्लभा॥१५९॥
विमलेश्वरे विश्वस्तु विश्वा विश्वप्रिया सदा।
अट्टहासे महानन्दो महानन्दा महेश्वरी॥१६०॥
महान्तको महेन्द्रे च पार्वती च महान्तका।
भीमेश्वरो भीमपीठे शिवा भीमेश्वरी तथा॥१६१॥
वस्त्रपादे भवो नाम भवानी भुवनेश्वरी।
अद्रिकूटे महायोगी रुद्राणी परमेश्वरी॥१६२॥
अविमुक्ते महादेवो विशालाक्षी शिवा परा।
महालये हरो रुद्रो महाभागा शिवा तथा॥१६३॥
महाबलश्च गोकर्णे शिवा ज्ञेया च चण्डिका।
भद्रवर्णे महादेवो भद्रा च कर्णिका तथा॥१६४॥
सुवर्णाख्ये सहस्राक्ष उत्पला परमेश्वरी।
स्थाणुसङ्के शिवः स्थाण्वीश्वरः स्थाण्वीश्वरा शिवा॥१६५॥

केदारेश्वर में ईशान (शिव) तथा देवी सन्मार्गदायिनी, भैरव क्षेत्र में भैरव रूप शिव तथा भैरवी परमेश्वरी, गणक्षेत्र में मङ्गला देवी तथा प्रपितामह (ब्रह्मा) रूप से मैं शिव, कुरुक्षेत्र में स्थाणु शिव तथा स्थाणु प्रिया परा देवी रूप में शिवा तथा इष्ट लाभ (प्राप्ति) में स्वयम्भू (शिव) तथा देवी स्वयम्भुवा स्थित हैं। कनखल में शिव उग्र तथा शिववल्लभा उग्रा कहलाती (हुई स्थित) है। विमलेश्वर (विश्वेश्वर) में (शिव रूप) विश्व तथा विश्व प्रिया विश्वा, अट्टहास में महानन्द (रूप से शिव) तथा महेश्वरी महानन्दा, महेन्द्र (पर्वत) पर (शिवरूप) महान्तक तथा महान्तका नाम से पार्वती, भीमपीठ पर भीमेश्वर तथा भीमेश्वरी रूप शिवा, वस्त्रपाद में भव (रूप शिव) तथा भुवनेश्वरी भवानी, अद्रिकूट पर महायोगी (रुद्र) तथा परमेश्वरी

रुद्राणी वास करती है। अविमुक्ति क्षेत्र में महादेव तथा विशालाक्षी रूप शिवा, महालय में हर रूप से रुद्र (शिव) तथा महाभागा (रूप से) शिवा गोकर्ण तीर्थ में महाबल रूप शिव तथा चण्डिका नाम से शिवा, भद्रवर्ण (भद्रकर्ण) में महादेव तथा भद्रकर्णिका, स्वर्ण क्षेत्र में सहस्राक्ष (शिव) तथा परमेश्वरी उत्पला एवं स्थाणु सङ्ग में स्थाण्वीश्वर (रूप) शिव तथा स्थाण्वीश्वरी रूप (नाम से) शिवा वास करती है।

कमलालये म(हास्नाने?हेशानो)कमलाक्षो महेश्वरः।
कमलाक्षी महेशानी सकलार्थप्रदायिनी॥१६६॥
छगलाण्डे कपर्दी च प्रसरा च महेश्वरी।
ऊर्ध्वरेता द्विरण्डे च सन्ध्याख्या परमेश्वरी॥१६७॥
माकोटाख्ये महाकोटः शिवा च मुण्डकेश्वरी।
मण्डलेश्वरपीठे च शङ्करः खाण्डवी शिवा॥१६८॥
कालञ्जरे नीलकण्ठो हरकाली शिवा मता।
स्थणवीश्व(रो?रे)स्थलो नाम्ना स्थलाख्या परमेश्वरी॥१६९॥
श्रीमद्व्याघ्रपुरे साक्षाद्धरनामा सभापतिः।
शिवः सभापतिर्नाम यत्र नृत्यति शङ्करः॥१७०॥
आत्मानन्दमहामोदपूर्णानन्दमहार्णवम् ।
नृत्यन्तं यत्र देवेशं देवेशी परिपश्यति॥१७१॥
यत्र आशु महादेवो भक्तानां वरदो भवेत्।
नृत्यन्तं यत्र देवेशं वीक्ष्य लोको विमुच्यते॥१७२॥

कमलालय (कमल सरोवर) में महेशान महेश्वर (शिव) कमलाक्ष नाम से तथा सभी पदार्थों को देने वाली महेशानी कमलाक्षी नाम से स्थित है। छगलाण्ड में कपर्दी तथा महेश्वरी प्रसरा (नाम से शिवा), द्विरण्ड में ऊर्ध्वरेता (शिव) तथा सन्ध्या नाम वाली परमेश्वरी (शिवा) महाकोट में महाकोट (शिव) तथा मुण्डकेश्वरी शिवा, मण्डलेश्वर पीठ में शङ्कर तथा खाण्डवी शिवा, कालञ्जर में नीलकण्ठ तथा हरकाली (नाम से) शिवा, स्थाण्वीश्वर में स्थल (शिव) तथा स्थला (संज्ञका) परमेश्वरी (शिवा) तथा श्रीमद्व्याघ्रपुर में साक्षात् हर सभापति नाम से वास करते हैं। यहाँ सभापति नाम वाले शिव (नित्य) नृत्य करते हैं।

परमानन्दरूप आत्मानन्द से पूरित अखण्डानन्द रूप महासागर में डूबकर यहाँ देवेश (शिव) नृत्य करते हैं और देवेशी (शिवा) उन्हें देखती है। यहाँ महादेव शीघ्र ही (प्रसन्न होकर) भक्तों के लिए वरदाता हो जाते हैं। इस नृत्य स्थल तीर्थ का दर्शन कर संसार (मनुष्य) मुक्त हो जाता है।

।। तीर्थ-माहात्म्य-वर्णनम्।।

पुण्यस्थानेषु सर्वेषु स्थानमेतन्महोत्तमम्।
यत्र कर्माणि सर्वाणि अक्षयाणि भवन्ति वै।।१७३।।
अस्मिन् महोत्तमे स्थाने शिवगङ्गाख्यमद्भुतम्।
तटाकमस्ति तत्तीरे दक्षिणे नृत्यतीश्वरः।।१७४।।
तटाकेऽस्मिन् वसन् स्नात्वा सभानाथं समीक्ष्य च।
अष्टोत्तरसहस्रं तु जपेच्छ्रद्धासमन्वितः।।१७५।।
यानि ते कथितान्यत्र सदा तिष्ठन्ति देवताः।
पितरः सिद्धगन्धर्वाः सिद्धयः सर्वसिद्धिदा।।१७६।।
अत्र दत्तं हुतं जप्तं स्नानमक्षयपुण्यदम्।
यद्यत् प्रकीर्तितं नाम तेनैव परिपूज्य च।।१७७।।
प्रणवादिहृदन्तेन लभतेऽभीष्टमुत्तमम्।
भोजयेद् ब्राह्मणान् योऽत्र सोऽक्षयं फलमश्नुते।।१७८।।
इह नानासुखं भुक्त्वा हरगौरीपुरं व्रजेत्।
शोकदुःखविनाशाय करुणानिधिरीश्वरः।।१७९।।
निर्ममे सर्वसंपत्तौ पुण्यक्षेत्राणि भूतले।
अनेकपुण्यशुद्धानामनेककालसाधनैः ।।१८०।।
अस्तिकानां भवेदत्र निवासः साधनं श्रुतिः।
तस्माद्यत्नेन कर्तव्यमत्र साधनमुत्तमैः।।१८१।।

सभी पुण्यप्रद स्थानों में इस (श्रीमद्व्याघ्रपुर नामक) स्थान का महत्व सर्वोत्तम है। इस स्थान पर किये सभी सत्कर्मों का पुण्य रूप फल अक्षय होता है। इसी स्थान पर शिवगङ्गा नाम का एक अद्भुत तालाब है। इसी के दक्षिण तट पर ईश्वर शिव नृत्य करते हैं। इस तालाब के निकट निवास करते हुए नित्य स्नान तथा नृत्यरत सभानाथ का दर्शन करके मनुष्य को श्रद्धा सहित अपने अभीष्ट मन्त्र का एक हजार आठ बार जप करना चाहिए। यहाँ जिन-जिन स्थानों के नाम कहे गये हैं, वहाँ सदैव देवता, पितर, सिद्ध, गन्धर्व तथा सभी कामनाओं की पूर्ति करने वाली सिद्धियाँ निवास करती हैं। इन तीर्थ स्थानों में जो जो देवता स्थित हैं, उनके चतुर्थी युक्त नाम से पूर्व 'ॐ' तथा पश्चात् में 'नमः' जोड़कर नाम मन्त्रों (ॐ अमुक अमुकाभ्यां-शिवा शिवाभ्यां नमः रूप से) द्वारा उनका पूजन (स्नानोपरान्त) करके जो कुछ भी जप, हवन, दानादि पुण्य कर्म किया जाता है, उन सबका फल अविनाशी होता है। जो मनुष्य यहाँ ब्राह्मणों को भोजन प्रदान करता है उसे भी अक्षय फल की प्राप्ति होती है। वह पुण्यात्मा मनुष्य इस लोक में सभी सांसारिक

सुखों को भोगकर अन्त में शिव-शिवा के लोक को प्रस्थान करता है। अत्यन्त करुणाशील ईश्वर ने मनुष्यों पर कृपा करके उनके शोक तथा दुख का निवारण करने के लिए एवं सभी सम्पत्तियों (सुखों) को प्रदान करने के लिए ही इस पृथ्वी लोक में पुण्य-प्रद क्षेत्रों (तीर्थों) का निर्माण किया है। जन्म-जन्मान्तरों (तथा वर्तमान जन्म में भी) किये गये अनेकों पुण्यों तथा दीर्घकाल तक की गई साधनाओं के द्वारा शुद्ध चित्त हुए आस्तिक (ईश्वर पर आस्था रखने वाले भक्ति परायण) मनुष्य ही यहाँ निवास तथा साधन कर पाते हैं, ऐसा कहा जाता है। इसलिए उन मनुष्यों को जिन्हें यहाँ निवास करने का शुभ अवसर प्राप्त है, प्रयत्नपूर्वक श्रेष्ठ साधनों का सदैव अभ्यास करते रहना चाहिए।

॥ अक्षमालामयपीठ माहात्म्यं तन्नाम वर्णनञ्च॥

इदानीं शृणु चार्वङ्गि पीठं सर्वाङ्गसुन्दरम्।
अक्षमालामयं पीठं(ब्रूहि?विद्धि)मे परमेश्वरि॥१८२॥
यत्र सिद्धयन्ति कार्याणि स्थितिस्ते शङ्करस्य च।
विष्णोरगाधबोधस्य तत्क्रियाया महेश्वरि॥१८३॥
अन्येषां चैव देवानां युष्मत्पदनिवासिनाम्।
प्रसादो हि भवत्याशु तत्र मे प्रीतिरुत्तमा॥१८४॥
प्रिये ते कथिष्यामि अक्षमालात्मकं परम्।
सन्निध्यं यत्र सर्वेषां तस्मादादि दिवौकसाम्॥१८५॥
अस्माभिश्च महद्भिश्च यद्यत् स्थानमलंकृतम्।
तत्तन्महोत्तमं प्रोक्तं सर्वसिद्धिप्रदं प्रिये॥१८६॥
महान्तो यत्र तिष्ठन्ति साधयन्ति परं पदम्।
तत्तन्महोत्तमं स्थानं सर्व कल्याणप्रदं प्रिये॥१८७॥
अमरेशपुरं चैवसुरान्तकं पुरं तथा।
तत्तन्महोत्तमं स्थानं सर्वसिद्धिकरं नृणाम्॥१८८॥

हे सुन्दर शरीराङ्ग वाली परमेश्वरि! अब तुम मेरे द्वारा अक्षमाला स्वरूप पीठों के नाम श्रवण करो। हे महेश्वरि! इन स्थानों पर अपने अपार ज्ञान तथा क्रियाशक्ति के साथ विष्णु, शंकर तथा तुम्हारी (भी) स्थिति होने के कारण साधकों के सभी कार्य सिद्ध होते हैं। वहाँ आपके चरणों में निवास करने वाले (चरणों की सेवा में रत रहने वाले) अन्य स्थित देवताओं की कृपा से साधक के चित्त में मेरे प्रति श्रेष्ठ भक्ति उत्पन्न हो जाती है। हे प्रिये! मैं उन अक्षमाला की भाँति स्थित स्थानों को, जिनके समीप सभी देवगण सदा स्थित रहते हैं, तुमसे अब कहूँगा। मुझ जैसे श्रेष्ठ देवताओं तथा महान पुरुषों

द्वारा सुशोभित सर्वसिद्धप्रद स्थानों को कहता हूँ। इन सभी उत्तम कल्याणप्रद स्थानों पर महान शुद्ध अन्तःकरण वाले साधक निवास करते हुए साधना करते हैं और इसके फलस्वरूप परम पद को प्राप्त करते हैं। अमरेशपुर तथा वैसे ही असुरान्तकपुर आदि उन-उन सभी स्थानों को जो मनुष्यों को सभी सिद्धि प्रदान करने वाले हैं, मैं कहता हूँ।

सतीभिः साधुभिः कान्ते यद्यत् स्थानमलंकृतम्।
अम्बिकापीठमत्यन्तमनन्तपुरमेव च॥१८९॥
अनिरुद्धपुरं वेत्सि तथादितिपुरं परम्।
अणिमादिपुरं चैव अश्वमेधपुरं परम्॥१९०॥
अन्नपूर्णामहापीठमम्बुजाख्यपुरं तथा।
आदिपीठानन्दपीठौ चामोदावादिसूकरौ॥१९१॥
आशु सिद्धिपुरं चैव यथाद्यन्तपुरं मुखम्।
अकम्पादित्यपीठौ च आद्यादिनाथपीठकौ॥१९२॥
इष्टनामपुरं चैव इन्दिरापुरमेव च।
इलोदयगिरिश्चैव इलान्तेन्दुपुरे प्रिये॥१९३॥
इन्द्राणीन्द्रेश्वरश्चैव इन्द्रानन्दपुरं तथा।
पुरमिन्दुवती-नाम तथेन्दुविजयं पुरम्॥१९४॥
ईश्वरीश्वरयोगौ च ईशानन्देश्वरीपुरम्।
ईशान्यैशपुरं देवि कथितं पीठमुत्तमम्॥१९५॥
कामरूपं प्रियं वाराणसी नैपालमेव च।
पौण्ड्रवर्द्धनपीठं च पौरक्यं कान्यकुब्जकम्॥१९६॥
पुण्याद्रिमर्बुदं चैव एकाम्राम्रातकेश्वरम्।
त्रिस्रोतः कामकोटं च तथा भृगुपुरं वरम्॥१९७॥
कैलासपीठं केदारं शुभं चन्द्रपुरं तथा।
श्रीपुरं च तथा कन्यापुरं जालन्धरं तथा॥१९८॥

हे प्रिये! सदाचरणशीला साध्वियों तथा साधु पुरुषों द्वारा सुशोभित जो-जो स्थान हैं, उनके नामों को सुनो। अति उत्तम अम्बिका पीठ, अनन्तपुर, अनिरुद्धपुर तथा परम श्रेष्ठ अदितिपुर, अणिमादिपुर, परं अश्वमेघपुर, महापीठ रूप अन्नपूर्णा (पीठ), अम्बुजापुर, आदि पीठ तथा आनन्द पीठ, आमोद पीठ, आदिसूकर क्षेत्र, शीघ्र सिद्धिप्रद सिद्धिपुर, प्रसिद्ध आद्यन्तपुर, अकम्प पीठ, आदित्य पीठ, आद्या पीठ, आदिनाथ पीठ, इष्टनामपुर, इन्दरापुर, इलोदयगिरि, इलान्तपुर, इन्दुपुर, इन्द्राणी, इन्द्रयुक्त इन्द्रानन्दपुर, इन्दुवतीपुर, इन्दु विजयपुर,

ईश्वर तथा ईश्वरीयुक्त ईशानन्देश्वरीपुर, ईशान्यैशपुर जिसे उत्तम पीठ कहा जाता है। कामरूप पीठ, वाराणसी पीठ, नेपाल पीठ, पौण्ड्रवर्धन पीठ, मनोहर कान्यकुब्ज पीठ, पवित्र अर्बुद गिरि जो एकाम्रा तथा आम्रातकेश्वर से युक्त है, त्रिस्रोत युक्त कामकोट, श्रेष्ठ भृगुपुर, कैलास पीठ, केदार(नाथ), शुभ चन्द्रपुर, श्रीपुर, कन्यापुर (कन्याकुमारी) तथा जालन्धर पीठ।

मालवं बिल्वपीठं च देवीकोटं तथैव च।
गोकर्णं मारुतेशं च तथाट्टहासमेव च॥१९९॥
कोल्लानामकगोत्रं च एलापुरमतिप्रियम्।
महापथपुरं चैव ओंकारपुरमेव च॥२००॥
जयदं च जयपुरमुज्जयिनीपुरं तथा।
हरिद्रापीठकं चैव प्रियं क्षीरपुरं प्रियम्॥२०१॥
गजाह्वयपुरं चैव उड्डीशपुरमेव च।
प्रयागं च तथा षष्ठीपुरमेव शिवप्रदम्॥२०२॥
मायापुरमतिश्रेष्ठं पुरं च सौरभेश्वरम्।
श्रीशैलं मेरुपीठं च मलयं च महागिरिम्॥२०३॥
महेन्द्रपुरपीठं च तथा बलिपुरं प्रियम्।
हिरण्यपुरपीठं च महालक्ष्मीपुरं तथा॥२०४॥
चण्डीपुरमतिश्रेष्ठं तथा छायापुरं प्रिये।
ज्ञात्वा पीठमिदं देवि मद्भक्तेषु प्रकाशय॥२०५॥

मालव (अवन्तिका) पीठ, विल्व पीठ, देवी कोट, गोकर्ण क्षेत्र, मारुतेश, अट्टहास, कोल्ला नामक गोत्र (कोल्हापुर), अतिप्रिय एलापुर, महापथपुर, (स्वर्गारोहण तीर्थ), ओंकारपुर (ओंकारेश्वर), जयप्रद जयपुर, उज्जयिनी पुर, हरिद्रा पीठ, प्रिय क्षीरपुर, गजाह्वय (हस्तिना)पुर, उड्डीसपुर, प्रयाग, शिवप्रद षष्ठीपुर, अतिउत्तम मायापुरी, सौरभेश्वर, श्री शैल, मेरु पीठ, महागिरि मलयाचल, महेन्द्रपुर पीठ, प्रिय बलिपुर, हिरण्यपुर पीठ, महालक्ष्मीपुर, अतिश्रेष्ठ चण्डीपुर तथा छायापुर, हे प्रिय! इन पीठों को जानकर मेरे भक्तों में उनके कल्याण के लिए प्रकाशित (प्रकट) करो।

॥तीर्थानां प्राकट्य प्रयोजनं भक्ति स्वरूपं तत्फल निरूपणञ्च॥

समुद्धर इमाँल्लोकान् मत्सम्बन्धविधानतः।
संसारानलसंतप्तान् चिन्तावायुविघूर्णितान्॥२०६॥
कृपयामृतवर्षिण्या अभिषिच्योद्धर प्रिये।
पुण्यमस्ति महत् कान्ते यशोऽप्यस्ति महत्सुखम्॥२०७॥

महाजनप्रसादोऽस्ति मत्प्रीतिर्लोकरक्षणे।
मत्प्रसङ्गो मदालापो मत्सवो मदनुग्रहः॥२०८॥
मत्कर्म मम सम्बन्धो मन्नाम मम चिन्तनम्।
मत्कथा मदनुध्यानं मदावेशो मदर्चना॥२०९॥
मदीक्षणं मदैक्यं च मन्मतिर्मन्नतिः स्तुतिः।
मद्गानं मे पुरे नाट्यं मत्कर्मोद्योग एव च॥२१०॥
मन्नाम वै मन्मनवो मच्चेष्टा मत्प्रियस्पृहा।
एकनैव कृतार्थश्च मदनुग्रहभाग् भवेत्॥२११॥
यदिच्छेत् तीर्थपीठेषु तदाशु लभते प्रियम्।
मन्मन्त्रग्रहणादेव निष्पापो जायते पुनः॥२१२॥
साधनाल्लभते सिद्धिः सिद्धक्षेत्रेष्वदीर्घतः।
मन्मनुग्रहणं (न्यू?नूं)नं मत्तोषकारणं परम्॥२१३॥
गृहीत्वा नार्चयेद्यस्तु न जाने किं स मे पुनः।
स्वर्गतः सुरवृक्षोऽपि न वै भवति कामदः॥२१४॥
नाश्रयेद्यदि तन्मूलं को दोषस्तस्य तत् प्रिये।
चिन्तामणिर्गृहेऽप्यस्ति न तत्र कापि च स्पृहा॥२१५॥
को दोषस्तस्य यत्नेन सिध्यन्ति सकलाः क्रियाः।
तस्माद्यत कथितं तुभ्यं तत्र यत्नः फलप्रदः॥२१६॥

हे प्रिये! इस संसार के समस्त प्राणियों (मनुष्यों) की मेरे साथ भक्ति रूप सम्बन्ध से संयुक्त करके अर्थात् इन्हें मेरी भक्ति प्रदान कर, इनका उद्धार करो। ये सभी प्राणी सांसारिक दावानल से सन्तप्त (जन्म-मृत्यु रूपी कष्ट से पीड़ित) तथा आशा-कामना रूपी प्रबल झंझावात से विक्षिप्त चित्त हो रहे हैं, इन पर अपनी कृपा रुपी अमृत की वर्षा करके पूर्ण अभिषिक्त कर इनका उद्धार करो। इससे हे प्रिये! तुम्हें अति पुण्य, यश तथा महान सुख की प्राप्ति होगी। तुम्हारे इस कार्य से महान पुरुषों को प्रसन्नता होगी, यह मेरी प्रीति का कारण होगा तथा इससे लोक संरक्षण का कार्य भी सम्पन्न होगा।

मेरा संग करना अर्थात् मेरे तीर्थों में निवास करना (अथवा मेरी भक्ति करना) मेरे सम्बन्ध में वार्तालाप (मेरी कथाओं की चर्चा) करना, मेरे लिए यज्ञ पूजन तर्पणादि करना, मेरी कृपा का आकांक्षी (अथवा मेरे लिए ही कुछ ग्रहणशील) होना, मेरी प्रसन्नता के लिए ही कर्म करना, मुझसे सम्बन्धित (मेरे) नामों तथा मेरे स्वरूप का (स्मरण, चिन्तन ध्यान) करना, मेरी कथाओं को सुनना, उन पर सतत् मनन करना (अथवा मेरा निरन्तर ध्यान करना),

मुझसे सदा आवेशित रहना (स्वयं को शिवरूप-शिव से एकात्म समझना), मेरा पूजन करना, मेरा दर्शन करना, मुझसे अभेदभाव रखना, मुझमें ही अपनी मन-बुद्धि को लगाये रखना, मुझे प्रणाम तथा मेरी स्तुति करना, मेरे चरित्रों का गान, मेरे सम्मुख अभिनय, मेरे लिए ही कर्म करने का प्रयास, मेरे नाम तथा मन्त्रों का जप, मेरी प्रसन्नता के लिए ही किसी पदार्थ की अभिलाषा, यहाँ तक कि अपनी सभी शारीरिक व मानसिक क्रियाओं को मेरे लिए ही करना, इनमें से एक में भी यदि कोई मनुष्य पूर्ण रूप से सफल हो जाता है तो वह मेरी कृपा का भागी हो जाता है। ऐसा मनुष्य तीर्थ पीठों में जो भी कामना करता है उसे वह शीघ्र ही प्राप्त कर लेता है। मनुष्य मन्त्र ग्रहण करते ही पापरहित हो जाता है, फिर जब वह सिद्धि क्षेत्रों में साधना करता है तो उसे शीघ्र ही सिद्धि प्राप्त हो जाती है। किसी मनुष्य द्वारा मेरा मन्त्र (दीक्षा द्वारा) ग्रहण करना मेरी परम सन्तुष्टि का कारण होता है। परन्तु इसके बाद यदि वह मेरा अर्चन नहीं करता है तो निश्चय ही वह मेरे प्रभाव को नहीं जानता, ऐसे में मैं भला उसके लिए क्या कर सकता हूँ। स्वर्ग में स्थित कल्पवृक्ष भी तब तक अभीष्ट फल नहीं प्रदान करता जब तक कि कोई उसके मूल का आश्रय नहीं लेता अर्थात् उसके समीप नीचे नहीं आता। यदि कोई ऐसा नहीं करता तो उसमें उस वृक्ष का क्या दोष है। चिन्तामणि के घर में होने पर भी यदि किसी को उसकी इच्छा ही नहीं है तो इसमे उस मणि का क्या दोष? सत्य तो यह है कि प्रयास करने पर ही सभी क्रियाएं (साधनायें) सिद्ध होती हैं। इसलिए जो तुमसे सिद्ध क्षेत्र की बात कही है, वहाँ प्रयास करने पर ही वे फलप्रद होते हैं।

॥ दुर्भगस्य नरस्य स्थितिम्॥

बिना यत्नेन किं किं स्यान्न जाने विजये सखि।
सन्ति तीर्थानि सर्वाणि भास्करोऽयं हुताशनः॥२१७॥
तारकाश्चन्द्रमा ज्योतिर्जलदा जलमेव च।
वसुधादिग्रहा येऽन्ये दिशो विदिश एव च॥२१८॥
तुलसी ब्राह्मणाश्चैव पुराणानि बहूनि च।
शैवाश्च वैष्णवाश्चैव सारो धर्मः सनातनः॥२१९॥
मद्भक्त्यवितथश्रद्धाशरणाश्च निरन्तरम्।
उपाया विविधाः सन्ति स्वपरित्राणहेतवः॥२२०॥
तथापि न यतन्तेऽहो तथा चेच्छन्ति किल्विषम्।
राजकोपप्रशमार्थे किं किं न स्यात्तदर्थिनः॥२२१॥

हे विजये! सखि! बिना प्रयत्न (परिश्रम) किये क्या कभी कुछ प्राप्त करना संभव है, ऐसा तो मैं कुछ भी नहीं जानता। मनुष्य को स्वयं ही अपनी रक्षा के लिए के लिए, सांसारिक दुखों से मुक्त होकर सुख प्राप्ति के लिए सभी तीर्थ उपस्थित हैं, सूर्य (की उपासना), अग्नि (की उपासना), चन्द्रमा, नक्षत्र, जल, मेघ, पृथ्वी आदि ग्रहों (की उपासना), दिशाएं-अन्तर्दिशाएं, तुलसी, ब्राह्मण (वेद स्मृति) पुराणादि शास्त्रों (के धर्मोपदेश) तथा सनातन धर्म के साररूप शैव तथा वैष्णव सम्प्रदाय की प्रचलित साधना पद्धतियाँ आदि अनेकों उपाय उपलब्ध हैं, फिर भी यदि वह अपने कल्याण का उपाय न करके पाप के मार्ग का अनुसरण करता है तो यह बड़े ही दुख की बात है। उपाय के इच्छुक मनुष्यों के लिए राजकोप (स्वदुर्भाग्य) के शमन हेतु क्या-क्या साधन उपलब्ध नहीं है अर्थात् अनेकों उपाय उपस्थित हैं।

सुखदुःखोपभोगश्च देशाद् देशान्तरं तथा।
प्राप्याप्राप्ये तथा वस्तू दिवा रात्रिस्तथैव च॥२२२॥
इन्द्रियस्पर्शभोगाश्च मेध्यामेध्यं च दर्शने।
यत्नायत्नकृतं कार्यं सिक्तासिक्तमहोदधिः॥२२३॥
भुक्ताभुक्तशरीरं तु सुवेशश्च कुवेशकः।
प्रियवागप्रियवाक् च दूरं निकटमेव च॥२२४॥
सुखं दुःखं तथा यच्च नानाकर्म प्रियाप्रियम्।
सर्वेषां हासवृद्धी च वपुषां निर्गमागमौ॥२२५॥
धनानां स्थितिनाशौ च गन्धानां च क्षयस्थिति।
वयोयौवनरूपाणां प्रक्रमं सर्वमेव च॥२२६॥
पश्यन्तोऽपि न पश्यन्तो ज्ञानिनोऽज्ञानिनः सदा।
तस्माच्छ्रद्धामयं मन्त्रं(सर्वं)श्रद्धा हि भावसिद्धिदा॥२२७॥
अस्मासु भावना यस्य योऽस्मासु प्रतिपद्यते।
तस्मात् साधुपदे सद्भिर्गन्तव्यमतियत्नतः॥२२८॥

मनुष्य को अपने जीवन में अनेकों परस्पर विरुद्ध परिस्थितियों का सामना करना पड़ता है। जीवन कभी सुख रूपी प्रकाश किरण से भर जाता है तो कभी दुख का घोर अन्धकार छा जाता है। एक स्थान से दूसरे स्थान सुख की प्राप्ति के लिए अथवा विवश होकर भटकना पड़ता है। जो वस्तु प्राप्त है उसके संरक्षण तथा अप्राप्त वस्तु की प्राप्ति के उपाय में दिन-रात चिन्तामग्न रहना पड़ता है। भोगों के प्रति इन्द्रियासक्ति के कारण पवित्र-अपवित्र वस्तुओं पर दृष्टि डालनी पड़ती है। इन शुद्ध-अशुद्ध रूप इन्द्रिय-भोगों की

प्राप्ति के लिए सत् असत् मार्गों का अवलम्बन लेना पड़ता है। उचित-अनुचित कर्म रूप महासागर में डूबा हुआ मनुष्य केवल कुछ ही कर्मों के लिए प्रयत्न कर पाता है, शेष के लिए तो केवल स्वप्न देखते ही जीवन व्यतीत हो जाता है। शरीर भी कभी भोगों के अनुकूल तो कभी प्रतिकूल होता है। कभी शरीर पर सुन्दर वेश धारित होता है तो कभी कुरुचिपूर्ण परिधान होता है। कभी प्रिय वाणी बोलनी तथा सुनने को मिलती है तो कभी अप्रिय कहना और सुनना पड़ता है। स्वार्थ वश किसी स्थान अथवा व्यक्ति से दूर होना पड़ता है तो कभी किसी के समीप होना पड़ता है। सुख-दुख के हेतु भूत अनेकों प्रकार के प्रिय तथा अप्रिय कर्म है जिसे मनुष्य को इच्छा-अनिच्छा से करने ही पड़ते हैं। इन सभी परिस्थितियों तथा पदार्थों में सदैव चक्रवत न्यूनता-महत्ता का क्रम चलता रहता है और इसी तरह ही मनुष्यों के जीवन-मरण का क्रम भी निरन्तर गतिशील रहता है। बड़े-बड़े वैभवशाली धनवान मनुष्य राजा-महाराजा अपने ऐश्वर्य से पतित (रहित) होकर भिक्षुक हो जाते हैं। सुगन्धित पदार्थों (सौन्दर्य-सुषमा युक्त वस्तुओं) की सुरभि (लावण्य) समय के साथ क्षीण हो जाती है। आयु, युवावस्था, शारीरिक सौन्दर्य, सभी अपने विनाश की ओर ही क्रमशः गतिमान हैं। यह सब देखते हुए भी जो नहीं देखता अर्थात् इन्हीं विनाशशील वस्तुओं की आशा-अभिलाषा तथा प्राप्ति के साधनों में ही अपना अमूल्य जीवन नष्ट करने में लीन है, वह मनुष्य लौकिक दृष्टि से ज्ञानी होते हुए भी वास्तव में अज्ञानी ही है। इसलिए सभी मन्त्रों (जो स्वयं भी श्रद्धा रूप ही है) तथा उनकी साधनाओं (एवं मन्त्राधिष्ठित देवताओं तथा स्वगुरु) के प्रति श्रद्धा एवं विश्वास रखते हुए मुक्ति रूपी लक्ष्य की प्राप्ति के लिए निरन्तर संलग्न हो प्रयत्न करते रहना चाहिए। कहा भी गया है ''विश्वासो फलदायकः'। श्रद्धा एवं विश्वास ही वास्तव में साधना के माध्यम से साधक को फलप्रदान करता है। इसीलिए इन मन्त्रों तथा साधनाओं में जिन्हें पूर्ण विश्वास होता है वे ही इस मार्ग पर अग्रसर होते हैं। इसलिए जो सज्जन है, सद्विवेक सम्पन्न हैं उन्हें मोक्ष पद की प्राप्ति हेतु इस साधना मार्ग पर अत्यन्त उत्साह, लगन तथा परिश्रम से शीघ्र ही चल देना चाहिए।

।। मुक्त्यर्थे प्रवृत्त्युपदेशः।।

प्रमादादपि नासाधुपथे वै ज्ञानदृष्टिभिः।
इति सर्वं समालोच्य यथार्थं बुद्धय पण्डिते।।२२९।।
आचर स्वं प्रियं धर्मं प्रवर्तय शुचिव्रतम्।
मत्पदाम्बुजसेवासु व्रजन्तु मम सन्निधिम्।।२३०।।

क्रीडन्तु मज्जनैः सार्धं प्राप्नुयुः परनिर्वृतिम्।
एतैर्मदुपदेशैस्त्वं शृणु वार्तां महामते॥२३१॥
त्वत्प्रसादादिमे लोकाः सूरिणः स्युर्महाप्रिये।

ज्ञान-दृष्टि सम्पन्न सत्पुरुषों को भूलकर भी कभी असत् मार्ग का अनुसरण नहीं करना चाहिए। इस प्रकार सभी बातों पर भली-भाँति विचार करके जो मनुष्य अपने कल्याण के लिए गुरु तथा शास्त्रों के द्वारा उपदेशित मार्ग पर चलता है, वही यथार्थ ज्ञानी तथा पण्डित (सत् असत् विवेकवती बुद्धि युक्त) है। मनुष्य को चाहिए कि वह अपने प्रिय (शास्त्रानुमोदित वर्णाश्रमानुसार) धर्म का विधिवत् आचरण कर, पवित्र व्रत-नियमों का पालन करे तथा मेरे चरण कमलों की सेवा में निरन्तर संलग्न रहता हुआ मेरी समीपता (मेरे लोक की) प्राप्ति करे। मेरे भक्तों के साथ क्रीडा करते हुए (सत् साधनों को आनन्दपूर्वक क्रीडा की भाँति करते हुए मेरा ध्यान-पूजन-गुणानुवाद करते तथा आनन्द युक्त क्रीडावत् जीवन व्यतीत करते हुए) मोक्ष की प्राप्ति हेतु उपाय कर उसे उपलब्ध करे। हे महामते! महाप्रिये! मेरे इस उपदेश को सुनो और इस हमारी वार्ता (बात-चीत) को संसार में विस्तृत करो, तुम्हारी कृपा से इस संसार के सभी मनुष्य विद्वान हों तथा अपने परम लक्ष्य मुक्ति को प्राप्त करें।

॥पीठेषु देव्याः प्रिय-नाम-वर्णनम्॥

अत्र ते प्रियनामानि शृणुष्व नगनन्दिनि॥२३२॥
कामेशा कामरूपे त्वं पूर्णा काश्यां विमुक्तिदा।
नेपाले पुण्यदा पुण्या सुवेशा पौण्ड्रवर्द्धने॥२३३॥
धर्मबुद्धिः सुधा चैव सुखदा पापमोचनी।
पौरक्ये परमानन्दा ब्रह्माणी कान्यकुब्जके॥२३४॥
पुण्याद्रौ च महापुण्या पूर्णा यज्ञफलेश्वरी।
कात्यायन्यर्बुदे देवि धनदा शिववल्लभा॥२३५॥
एका चैकाम्रके देशे सुरूपेशाम्रकेश्वरे।
त्रिपुरे सुन्दरी दिव्यरूपाखिलमनोहरा॥२३६॥
कामकोटे महापीठे प्रमदा मदनालसा।
कामेश्वरी रतिश्चैव भृगुपुर्यां व्रजेश्वरी॥२३७॥
व्रजेशा च तपोलक्ष्मीः कैलासे भुवनेश्वरी।
केदारे वरदा चैवामृता चन्द्रपुरे सिता॥२३८॥
कलावती प्रभेशा च श्रीपुरे श्रीरमा प्रिया।
कुमारी ब्रह्मचर्या च कन्या च कन्यकापुरे॥२३९॥

जालन्धरे महापीठे नागर्याग्निमुखी शुभा।
ज्वालामुखी लोलजिह्वा सुवेशा च सुरङ्गिणी।।२४०।।

हे पर्वतराज हिमालय-पुत्रि! अब तुम अपने प्रिय नामों को सुनो। कामरूप में तुम कामेश्वरी, काशी में विमुक्तिदा तथा अन्नपूर्णा, नेपाल में पुण्यदा, पुण्या तथा सुवेशा, पौण्ड्रवर्धन में धर्मबुद्धि, सुधा, सुखदा तथा पापमोचनी, पौरक्य में परमानन्दा, कान्यकुब्ज देश में ब्रह्माणी, पुण्याद्रि पर महापुण्या, पूर्णा तथा यज्ञफलेश्वरी, अर्बुदगिरि पर कात्यायनी धनदा तथा शिव वल्लभा, आम्रक में एका, आम्रकेश्वर में सुरूपेशा, त्रिपुर (त्रिस्रोत) में (त्रिपुर) सुन्दरी, दिव्य रूपा तथा अखिल मनोहरा, महापीठ कामकोटि में प्रमदा, मदनालसा, कामेश्वरी तथा रति, भृगपुरी में व्रजेश्वरी, व्रजेशा तथा तपोलक्ष्मी, कैलास में भुवनेश्वरी, केदार में वरदा तथा अमृता, चन्द्रपुर में सिता, कलावती तथा प्रभेशा, श्रीपुर में श्री रमा तथा प्रिया, कन्यकापुर में कुमारी, ब्रह्मचर्या तथा कन्या, महापीठ जालन्धर में नागरी, अग्निमुखी शुभा, ज्वालामुखी, लोल जिह्वा, सुवेशा तथा सुरङ्गिणी के नाम से प्रसिद्ध हो।

मालवे च महाविद्या बिल्वपीठे च रूपिणी।
रूपवती महादेवी देवीकोटेऽखिलेश्वरी।।२४१।।
गोकर्णे प्रियपीठे त्वं रुद्राणी सर्वमङ्गला।
पवने हरपीठे च गन्धश्रीश्च सुगन्धिका।।२४२।।
अट्टहासे महापीठे भीमकाली च कालिका।
विरजे मुक्तिहेतुश्च नमः-स्वस्ति-सुधामयी।।२४३।।
जयश्री राजलक्ष्मीश्च सुवेशा राजपर्वते।
एलापुरे महासंपत् माहेश्वरी महापथे।।२४४।।
गायत्री ब्रह्मरूपा च तत्सदोङ्कारपीठके।
जया जयपुरे देवी जयदा जयमङ्गला।।२४५।।
विजया मङ्गला गौरी उज्जयिन्यां सदा शिवा।
गौरीश्वरी महादेवी हरिद्रापीठके शिवा।।२४६।।
क्षीरपीठे युगाद्या च क्षीराख्या नियमप्रभा।
राजेश्वरी महालक्ष्मीर्हस्तिनापुरवासिनी।।२४७।।
कमला विमला भक्ती रौद्री च नीलपर्वते।
यागेश्वरी त्रिवेण्यां च त्रिःस्रोता ब्रह्मरूपिणी।।२४८।।
सिन्धुस्थ(ली?ले)कामधेनुः षष्ठी षष्ठीपुरे प्रिये।
माया मायापुरे देवी सुरभी सौरभेश्वरे।।२४९।।

मालव में महाविद्या, विल्वपीठ में रूपिणी, रूपवती तथा महादेवी, देवीकोट में अखिलेश्वरी, गोकर्ण पीठ में रुद्राणी तथा सर्वमङ्गला, पवन अथवा हर पीठ में गन्ध श्री तथा सुगन्धिका, महापीठ अट्टहास में भीमकाली तथा कालिका, विराज (विरजा) में मुक्ति हेतु, नमः स्वस्ति तथा सुधामयी, राजपर्वत पर जयश्री, राजलक्ष्मी तथा सुवेशा, एलापुर में महासम्पत् तथा महापथ में माहेश्वरी, ओंकार पीठ में गायत्री, ब्रह्मरूपा तथा तत्सत्, जयपुर में जय, जयदा, जयमङ्गला तथा विजया, उज्जयिनी में मङ्गला, गौरी, सदाशिवा, हरिद्रापीठ में गौरीश्वरी, महादेवी तथा शिवा, क्षीर पीठ में युगाद्या, क्षीरा, नियमप्रभा, हस्तिनापुर में राजेश्वरी, महालक्ष्मी तथा हस्तिनापुरवासिनी, नील पर्वत पर कमला, विमला, भक्ति तथा रौद्री, त्रिवेणी में यागेश्वरी, त्रिःस्रोता तथा ब्रह्मरूपिणी, सिन्धु स्थल में कामधेनु, षष्ठीपुर में षष्ठी, मायापुर में माया तथा सौरभेश्वर में तुम सुरभी (सुरभि) के नाम से प्रसिद्ध हो।

विलासिनी महानन्दा प्रियचन्दनपर्वते।
महाव्रजेश्वरी श्रेष्ठा शमनेश्पपरपीठके।।२५०।।
भवानी भवभक्ता व श्रीशैले शिववल्लभा।
देवता या स्वर्गलक्ष्मीः कनकामरपर्वते।।२५१।।
उमा गौरी सती सत्या पार्वती हिमपर्वते।
इन्द्रेश्वरी सुराराध्या माहेन्द्रे जगदीश्वरी।।२५२।।
अल्लाभोगेश्वरी नित्या श्रीमद्बलिपुरे शिवा।
सुवर्णा कनका वामा हिरण्यपुरपीठके।।२५३।।
महालक्ष्मीर्महेशानी महालक्ष्मीपुरेऽम्बिका।
चण्डीपुरे प्रचण्डा च चण्डा चण्डवती शिवा।।२५४।।
छत्रे मेघस्वना चैव मायाच्छत्रेश्वरी तथा।
कालीघट्टे महापीठे काली कालात्मिका तथा।।२५५।।
लिङ्गाख्ये भैरवी विद्या विजया जाह्नवीतटे।
इति ते कथितं दिव्यं पीठक्रममुदाहृतम्।।२५६।।
अतिगुह्यं महेशानि कथितं देववन्दिते।
मद्भक्तेभ्यो महेशानि प्रकाशमुपपादय।।२५७।।
तेषां भाग्यवशेनैव कथितं मन्मुखोदितम्।
अकथ्यं कथितं भद्रे अतिप्रियतमे शिवे।
सारात् सारतरं सर्वं कथितं तव सुन्दरि।।२५८।।

इति श्रीब्रहन्नीलतन्त्रे भैरवभैरवीसंवादे
(नैमित्तिकार्चन-पीठ-तदीश्वरीवर्णनं) पञ्चमः पटलः।।५।।

प्रिय चन्दन पर्वत (मलयगिर) पर विलासिनी तथा महानन्दा, शमनेश्वर पीठ पर महाव्रजेश्वरी तथा श्रेष्ठा, श्री शैल पर भवानी, भवभक्ता तथा शिव वल्लभा, कनकामर पर्वत (स्वर्णशैल) पर स्वर्गलक्ष्मी, हिमालय पर उमा, गौरी, सती, सत्या तथा पार्वती, महेन्द्र गिरि पर इन्द्रेश्वरी, सुराध्या तथा जगदीश्वरी, श्रीमद् बलिपुर में अल्ला, भोगेश्वरी, नित्या तथा शिवा, हिरण्यपुर पीठ में सुवर्णा, कनका तथा वामा, महालक्ष्मीपुर में महालक्ष्मी, महेशानी तथा अम्बिका, चण्डीपुर में प्रचण्डा, चण्डा, चण्डवती तथा शिवा, छत्र क्षेत्र में मेघस्वना, माया तथा छत्रेश्वरी, कालीघट्ट महापीठ में काली तथा कालात्मिका, लिङ्ग संज्ञक क्षेत्र में भैरवी तथा जान्हवी तट पर विद्या तथा विजया नाम से आपकी स्थिति है। इस प्रकार मैंने पीठों के नाम उल्लेख सहित तुम्हारे दिव्य नामों का वर्णन किया है। ये सभी पीठ तथा तुम्हारे नाम अत्यन्त गुप्त रखने योग्य हैं। सभी देवों द्वारा वन्दनीय हे देवि! इन्हे केवल मेरे भक्तों के सम्मुख ही प्रकाशित तथा उन्हें प्रदान करें। उन भक्तों के भाग्यवश ही वर्णन के रूप में ये मेरे मुख से प्रकट हुए हैं। हे शिवे! तुम मुझे अत्यन्त प्रिय हो इसलिए गुह्य होने पर भी मैंने इसे अत्यन्त ही संक्षेप में सर्वसार रूप से तुमसे इन सब विषयों को कहा है।

।। श्री बृहन्नील तन्त्र के भैरव भैरवी संवाद में नैमित्तिकार्चन-पीठ-
तदीश्वरी वर्णन संज्ञक पञ्चम पटल की
'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

* * *

।। षष्ठः पटलः।।

(कुलपूजा-शाक्ताचारादिविधि निरूपणम्)

।। कुल पूजनस्य जिज्ञासा।।

श्रीदेव्युवाच

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद।
इदानीं श्रोतुमिच्छामि पूजनं कुलपूजनम्।।१।।
यत्कृ(ते?त्वा)साधका वीरः सद्यो मोक्षमवाप्नुयात्।
एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव।
कथयस्व महादेव यदि स्नेहोऽस्ति मां प्रति।।२।।

हे भगवन्! आप सभी शास्त्रों तथा उनमें वर्णित सकल धर्मों के ज्ञाता हैं। इस समय मैं आपसे उस कुल (शक्ति-स्त्री) पूजन के विषय में सुनना चाहती हूँ जिसको विधिवत् करके वीर साधक शीघ्र ही मोक्ष को प्राप्त कर लेता है। मेरी दृष्टि में एकमात्र आप ही समस्त कुल शास्त्रों को जानने वाले तथा पूजनीय हैं। हे भैरव! महादेव! यदि आप वास्तव में मुझसे प्रेम करते हैं तो इसके सम्बन्ध में मुझे बताएं।

।। कुल (शक्ति) पूजन-माहात्म्यम्।।

श्री भैरव उवाच।

कथितव्यं महापुण्यं विस्तरेण तपोधने।
सर्व एव सुराः पूज्याः सत्यं ब्रह्मादयः शिवे।।३।।
एका चेद्युवती तत्र पूजिता चावलोकिता।
स(वै?र्वा ए)व परादेव्यः पूजिताः कुलभैरवि।।४।।
आदावन्ते च मध्ये च सा हि पूज्या विशेषतः।
न पूजयति चेत कान्तां बहुविघ्नैर्विलिप्यते।।५।।
पूर्वार्जितफलं नास्ति का कथा परसाधने।
नवशक्तिर्महेशानि पञ्चशक्तिश्च भैरवि।।६।।
पूजिता विगुणं सर्वं सगुणं कारयेद्यतः।
पृथिवीं सस्यसंपन्नां ब्राह्मणे वेदपारगे।।७।।
दत्त्वा यत्फलमाप्नोति तत्फलं कौलिकार्चनात्।
अन्नदानं सहस्रेभ्यः शतेभ्यो यज्वनामपि।।८।।

तेषां भोजनदानेन तत्फलं कौलिकार्चनात्।
वापीकूपतडागानि कृत्वा च शिवकृष्णयोः॥९॥
दानाद् यत् फलमाप्नोति तत्फलं कौलिकार्चनात्।
यदि भाग्यवशेनैव वारमेकं प्रपूजयेत्॥१०॥
कृता(र्थो?र्था)स्ते हि निस्तीर्णा यान्ति देवीपुरे स्वयम्।

हे तपोधने (तप को ही एक मात्र वास्तविक धन मानने वाली तथा उससे समृद्ध अथवा तपस्वियों द्वारा प्राप्त की जाने वाली एक मात्र सम्पदास्वरुपा)! ब्रह्मादि त्रिदेव सहित सभी देवता पूजा के योग्य हैं, यह सत्य है, परन्तु इनके पूजन के साथ ही यदि एक भी युवती स्त्री का पूजन परिलक्षित होता है तो सभी देवियों सहित परा देवी की भी पूजा सम्पन्न हो जाती है। पराशक्ति के पूजन के आरम्भ में, मध्य में और (अथवा) अन्त में स्त्री रूप शक्ति अवश्य ही पूजनीय होती है। यदि कोई साधक स्त्री-शक्ति का पूजन नहीं करता है तो उसकी साधना में अनेकों विघ्न व्याप्त हो जाते हैं। उसे स्वयं के द्वारा ही पूर्व में किये गये सत्कर्मों से उत्पन्न होने वाले फलों की भी प्राप्ति नहीं हो पाती, बाद के सत्कर्मों (पूजनादि) की फल अवाप्ति की चर्चा करना तो व्यर्थ है। यदि साधक कन्या रूप नौ अथवा पाँच शक्तियों का पूजन परादेवी की पूजा के साथ ही करता है तो उसकी पराशक्ति के पूजन में प्रमादवश, उत्पन्न सभी दोष भी गुण में परिवर्तित हो जाता है। वेद के परम तत्व को जानने वाले ब्राह्मण को धान्य (अन्न) से सम्पन्न भूमि का दान करने से दाता को जिस फल की प्राप्ति होती है, उस फल को कौलिक कुल पूजन के द्वारा ही प्राप्त कर लेता है। हजारों मनुष्यों को अन्नदान (भोजन प्रदान) करने से, सैकड़ों यज्ञ करने से, बावड़ी, कुआँ, तालाब का निर्माण कराने से तथा शिव तथा कृष्ण (के समान उनके भक्तों) को दान देने से जिस परम फल की कर्ता (दाता) को प्राप्ति होती है, उसी फल की प्राप्ति कौलिक को कुलपूजन करने से होती है। भाग्यवश यदि एक बार भी साधक सविधि कुल पूजन कर लेता है तो वह कृत्कृत्य हो जाता है तथा संसार से मुक्त होकर देवी के धाम मणिपुर को प्रस्थान कर जाता है।

पुरश्श्चरणकालेऽपि यदि स्यात् पीठपूजनम्॥११॥
तत्रैव पीठपूजा सा मनसापि न हीयते।
देवीकोटे महाभागा उड्डियाने च भैरवी॥१२॥
योगनिद्रा कामरूपे महिषासुरमर्दिनी।
कात्यायनी कामभूमौ कामाख्या कामरूपिणी॥१३॥

जालन्धरी च पूर्णेशी पूर्णशैले च चण्डिका।
कामरूपे ततो देवी पूज्या दिक्केरवासिनी॥१४॥
अथवा कामरूपस्य दर्शनं यदि भाग्यतः।
तदा भगादिदेवीनां पूजा तत्र विधीयते॥१५॥
यदि भाग्यवशेनैव कुलदृष्टिः प्रजायते।
तदैव मानसीं तत्र तासां च संप्रकल्पयेत्॥१६॥
भगिनीं भगजिह्वां च भगास्यां भगमालिनीम्।
भगदन्ता च भगाक्षीं च भगकर्णां भगत्वचम्॥१७॥
भगनासां भगस्तनीं भगस्थां भगसर्पिणीम्।
तत्र संपूज्य गन्धाद्यैर्मानसैर्गुरुमेव च॥१८॥
नमस्कृत्य विधानेन स्वयमक्षोभितः सुधीः।
द्वादश्यां पूजयेद्विष्णुं चतुर्दश्यामुमापतिम्॥१९॥
अष्टम्यां पूजयेच्छक्तिं सर्वसिद्धिप्रदां किल।
केशसंस्कारकर्माणि कारयेत् सर्वदा प्रिये॥२०॥

पुरश्चरण काल में भी यदि पीठ पूजन का अवसर उपलब्ध हो जाय तो उसे अवश्य करना चाहिए, मन से भी उसका परित्याग नहीं करना चाहिए। देवी कोटि में महाभागा, उड्डीयान में भैरवी, कामभूमि कामरूप में योगनिद्रा (योनिमुद्रा) स्वरूपा महिषासुरमर्दिनी कात्यायनी कामरूपिणी कामाख्या की, जालन्धर पीठ पर जालन्धारी की तथा पूर्णशैल पर पूर्णेशी की एवं कामरूप स्वरूप मध्य में, (उस) युवमी में निवास करने वाली चण्डिका की पूजा करनी चाहिए। यदि भाग्यवश कामरूप का दर्शन उपलब्ध हो जाय तो वहाँ भगादि देवियों की विधिवत् पूजा करनी चाहिए। यदि भाग्यवश कुल शक्ति (योनि) का दर्शन (प्राप्ति) हो जाय तो उसमें उन भगादि देवियों की मानसिक कल्पना करके पूजन करना चाहिए।

भगिनी, भगजिह्वा, भगास्या, भगमालिनी, भगदन्ता, भगाक्षी, भगकर्णा, भगत्वक् (भगात्मिका), भगनासा, भगस्तनी, भगस्था तथा भगसर्पिणी देवियों का उसमें गन्धादि के द्वारा मानस पूजन कर गुरु का पूजन करना चाहिए। विधिवत् पूजन के पश्चात् उन्हें प्रणाम करना चाहिए। पूजन के समय बुद्धिमान साधक को उद्वेग रहित स्थिर चित्त रहना चाहिए। द्वादशी को विष्णु का पूजन, चतुर्दशी को शिव का पूजन तथा अष्टमी को कुलशक्ति का पूजन निश्चित रूप से सभी सिद्धियों को प्रदान करने वाला होता है। हे प्रिये! साधक को सदा कुल शक्ति के केशों का संस्कार कर्म भी करना चाहिए।

।। कुल-शक्ति पूजनम्।।

आदावानीय देवेशि स्वकान्तां वा परस्त्रियम्।
प्रथमं चासनं दत्त्वा पाद्यं दद्यात्ततः परम्।।२१।।
अर्घ्यं दद्यान्महेशानि यथोक्तविधिना शिवे।
आचमनीयं च तथा दद्याच्च सुधया प्रिये।।२२।।
स्नानीयं परमेशानि वौषडन्तेन दापयेत्।
गन्धं दद्यान्महेशानि गन्धानामष्टकं तथा।।२३।।
पुष्पं दद्याद्वरारोहे गन्धयुक्तं मनोहरम्।
धूपं गुग्गुलुना दद्यात् महादेव्यै मनोहरम्।।२४।।
दीपं च सर्पिषा दद्यात ताम्राधारं सुशोभनम्।
नैवेद्यं परमं दद्यात् सुस्वादु सुमनोहरम्।।२५।।
नानाद्रव्ययुतं दद्यान्नारिकेलयुतं तथा।
रम्भाफलं बीजपूरं श्रीफलं श्रीनिकेतनम्।।२६।।
मधु दद्यान्महेशानि पलद्वयमितं शुभे।
घृत दद्यान्महेशानि नूतनं पलमानतः।।२७।।
नानोपहारसंयुक्तं दधिदुग्धयुतं तथा।
ताम्बूलं परमं दद्यात् सुस्वादु च सुवासितम्।।२८।।
कर्पूरादिसमायुक्तं गुवाकेन समन्वितम्।
चर्व्यं चोष्यं तथा लेह्यं पेयं दद्यान्महेश्वरि।।२९।।
जलं दद्याद्वरारोहे कर्पूरादिसुवासितम्।
यद्यदिच्छति तस्मिन् वै काले सुरगणार्चिते।।३०।।
तत्तद् दद्याद्विशेषेण येन तुष्यति सुन्दरी।

हे देवि! सबसे पहले साधक स्वपत्नी अथवा (पूर्व निमन्त्रित) पर स्त्री (युवती) को पूजन मण्डप में लाकर उसे आसन प्रदान करे। फिर विधि पूर्वक उसे पाद्य तथा अर्घ्य प्रदान करे। अमृत रूप शुद्ध जल (अथवा मद्य) से आचमन कराकर 'वौषट्' शब्द मन्त्र के अन्त में लगाकर स्नान के लिए जल प्रदान करे (स्नान कराये)। हे महेशानि! (स्नानोपरान्त वस्त्रादि धारण के पश्चात्) अष्ट गन्ध मिश्रित गन्ध (चन्दन) प्रदान करे। सुन्दर सुगन्ध युक्त पुष्प तथा गुग्गुल का धूप प्रदान करे। तांबे के आधार पात्र में घी का दीपक प्रदान करे। सुरुचिपूर्ण परम स्वादिष्ट देखने में मनोहर नैवेद्य प्रदान करे। नारियल, केला, बीजपूर (बड़ा नींबू, चकोतरा), बेल आदि सुन्दर नाना प्रकार के सरस फलों को प्रदान करें। अनेकों व्यञ्जनों सहित दो पल मधु, एक पल

नवीन घृत, दही तथा दूध भी अर्पित करे। नैवेद्य के पश्चात् (आचमन प्रदान करके) कपूर, सुपाड़ी आदि से युक्त सुगन्धित, सुस्वाद युक्त ताम्बूल प्रदान करे। नैवेद्य (अथवा भोजन में) चर्व्य, चोष्य, लेह्य, भक्ष्य तथा पेय पाँचों प्रकार के व्यञ्जन तथा कर्पूर आदि से सुवासित जल देना चाहिए। उस समय कुल शक्ति जिस-जिस वस्तु की इच्छा करे उसे वही वस्तु विशेष रूप से प्रदान करना चाहिए, जिससे वह कुलसुन्दरी पूर्णतया सन्तुष्टि प्राप्त करे।

।।शक्त्यर्चने षोडशवर्षा श्रेष्ठा।।

सप्तवर्षाष्टवर्षा वा नववर्षा च या भवेत्।।३१।।
दशवर्षा महेशानि एकादशगता तथा।
द्वादशे वर्षे संप्राप्ता तथा त्रयोदशे शुभे।।३२।।
चतुर्दशे तथा देवि(तथा?वर्षे) पञ्चदशे तथा।
षोडशवर्षा तथा देवि श्रेष्ठा कामप्रदा तु सा।।३३।।

शक्ति पूजन में सात, आठ, नौ तथा दश वर्षीया युवती (कन्या) सामान्य होती है। ग्यारह, बारह तथा तेरह वर्षीया शुभ होती है तथा चौदह, पन्द्रह एवं सोलह वर्षीया श्रेष्ठ होती है। इनमें सोलह वर्षीया युवती का पूजन अति श्रेष्ठ माना जाता है। इसका पूजन समस्त कामनाओं को पूर्ण करने वाला होता है।

।।केश संस्करणं युवत्यङ्गेषु बीज मन्त्र लेखनञ्च।।

केशसंस्करणं कुर्यान्नानाद्रव्यैर्मनोरमैः।
ततो दद्यात् महाद्रव्यं येन तुष्यति मानवी।।३४।।
स्तनद्वन्द्वे रमाबीजं हनुद्वये भग-द्वयम्।
कक्षाधः परमेशानि लिखेत् गङ्गाधर-द्वयम्।।३५।।
योन्यधः कामिनि-युग्ममूरुद्वये लिखेत् प्रिये।
पादपद्मतले विश्वबीजं परमदुर्लभम्।।३६।।
संलिख्य विधिवद्भक्तया शिरीषवृन्तकेन वै।
भगे लिखेन्महेशानि बालाबीजं महेश्वरि।।३७।।
ओष्ठद्वये भगं चैव लेखन्या कनकस्य च।
हस्तद्वये काकिनी व लेखनीया च देशिकैः।।३८।।
रक्तवस्त्रं महेशानि दद्याद्भद्रं मनोरमम्।
रक्ताख्यचन्दनेनैव लिखेत् बीजं सुरेश्वरि।।३९।।
भगे पुष्पाञ्जलिं दत्त्वा प्रणमेद् दण्डवद्भुवि।
एवं वारत्रयं कुर्यात् यावद् दृष्टिर्न जायते।।४०।।

ताम्बूलादि अर्पण के पश्चात् उस शक्ति के केशों को सुगन्धित सुन्दर द्रव्यों से संस्कारित (शृंगार) करना चाहिए। इसके बाद उसे महाद्रव्य (संस्कारित मद्य) प्रदान करना चाहिए जिससे वह मानवी शक्ति सन्तुष्ट हो। उसके स्तनद्वय में रमाबीज (श्रीं), हनुद्वय में 'ऐं' बीज, कक्ष के नीचे (दोनों पार्श्वों में) शिव बीज 'हौं', योनि के नीचे दोनों जाँघों पर कामिनी बीज 'स्त्रीं' लिखें। पाद तलों पर परम दुर्लभ विश्व बीज 'ॐ' (अथवा भुवनेश्वरी बीज 'ह्रीं') लिखें। इन बीजों को शिरीष पुष्प (अथवा पत्र) के वृन्त से लिखना चाहिए। इसके बाद भग के दोनों ओष्ठों पर (पार्श्व भागों पर) स्वर्ण लेखनी से बाला मन्त्र के तीनों बीजों (ऐं क्लीं सौः) को लिखे। दोनों हाथों पर काकिनी मन्त्र लिखे। इन सभी बीजों को लाल चन्दन से ही लिखना चाहिए। इसके पश्चात् सुन्दर, श्रेष्ठ, रक्त-वस्त्र प्रदान करे। तत्पश्चात् भग पर पुष्पाञ्जलि अर्पित कर भूमि पर लेटकर दण्डवत् प्रणाम करे। इस प्रकार तीन पुष्पाञ्जलि प्रदान करे जब तक कि उसका दिखाई देना बन्द न हो जाय।

।। अङ्गेषु मन्त्र-जप-विधिः।।

मूलमन्त्रं महेशानि जपेत् पर्वतमस्तके।
सहस्रस्य प्रमाणेन जपेत् तत्र महेश्वरि।।४१।।
अष्टाविंशतिमानेन तदास्ये तु जपेत् प्रिये।
अष्टोत्तरशतं योनिगर्तमध्ये जपेत् प्रिये।।४२।।
तासामभीष्टसिद्ध्यर्थं कुर्यात् पर्वतमर्दनम्।
मूलं जपेन्महेशानि ताडयेद् योनिमण्डलम्।।४३।।
ततस्तत्त्वं पुरः क्षिप्त्वा सिद्धो भवति साधकः।
कालीप्रयोगमेतद्धि जानीहि सुरवन्दिते।।४४।।
काली तारा महाविद्या त्रिपुरार्णा महेश्वरी।
एतासां भैरवीणां च प्रयोगात् सिद्धिमाप्नुयात्।।४५।।

तत्पश्चात् उस युवती के स्तनों पर दृष्टि स्थिर रखते हुए (अथवा उसे स्पर्श करते हुए) मूल मन्त्र का एक हजार जप करे। इसके बाद मुख पर दृष्टि रखते हुए अट्ठाईस बार जप करे। योनि मध्य गर्त पर दृष्टि रखते हुए एक सौ आठ बार जप करे। जप के पश्चात् उस युवती की कामनापूर्ति (प्रसन्नता) के लिए उसके स्तनों का मर्दन करे। मूल मन्त्र का जप करते हुए उसकी योनि मण्डल पर आघात करे। इसके बाद 'तत्व' का प्रक्षेपण करे। इस प्रकार साधक सिद्ध हो जाता है। इस प्रकार की क्रिया पद्धति का प्रयोग काली की साधना के लिए समझना चाहिए। काली, तारा, महाविद्या

त्रिपुर सुन्दरी, अन्नपूर्णा तथा महेश्वरी (भुवनेश्वरी) इन भैरवी रूपों की साधना में इस विधि से साधक सिद्धि को उपलब्ध हो जाता है।

।। बलि-प्रदानम्।।

बलिं दद्यान्महेशानि सन्ध्याकाले शिवालये।
अदत्त्वा च महादेवि बलिं सर्वहितं प्रिये।।४६।।
शिवायै च बलिं दद्यात् सर्वयत्नपुरःस(रैः?रम्)!
अन्यथा सिद्धिहानिः स्यान्नात्र कार्या विचारणा।।४७।।
प्रान्तरे बिल्वमूले वा श्मशाने वापि साधकः।
निर्जने वा वने घोरे हर्म्ये वा प्राङ्गणेऽपि वा।।४८।।
भित्त्यधो वा महेशानि बलिं दद्याद् विधानतः।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत्।।४९।।
कालि कालीति वक्तव्ये तत्र सा शिवरूपिणी।
पशुरूपा समायाति परिवारगणैः सह।।५०।।
भुक्त्वा रौति यदैशान्यां वायव्यां सुरवन्दिते।
ऐशान्यां सुखसंपत्तिर्वायवी भोगमोक्षदा।।५१।।
तदैव मङ्गलं तेषां भवत्येव न संशयः।
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम्।।५२।।

समस्त पूजनादि क्रिया विधान के पश्चात् हे महेशानि! साधक को संध्या के समय शिवालय के समीप बलि प्रदान करना चाहिए। जो साधक इस बलि प्रदान रूप कर्म का पालन नहीं करता उसके समस्त कल्याण (सुख-सम्पत्ति, साधना-सिद्धि) का विनाश हो जाता है।

साधन क्रिया के पश्चात् शिवा (शिवाओं-मादासियारों अथवा गीदड़ों) के लिए सर्वप्रयत्न करके अवश्य ही बलि देना चाहिए। ऐसा न करने पर साधक की सारी सिद्धियाँ नष्ट हो जाती हैं। इसमें किसी प्रकार के संशय का स्थान नहीं है। जनशून्य मार्ग पर, विल्व वृक्ष के नीचे, श्मशान में निर्जन भयानक वन में अथवा किसी पुराने, मनुष्यों के वास से रहित प्रासाद-महल (जो प्रायः खण्डहर रूप से स्थित हो) के प्राङ्गण (आंगन-खुले विस्तृत क्षेत्र) में भूमि पर विधिवत् बलि प्रदान करना चाहिए। दिये जाने वाले बलि रूप नैवेद्य में माँस भी अवश्य होना चाहिए। बलि को भूमि पर रखने के बाद साधक को (हे) कालि! कालि! इस प्रकार उच्चस्वर से पुकारते हुए काली का आवाहन करना चाहिए। ऐसा करने पर वह काली पशुरूप शिवा (गीदड़ी) के रूप में अपने परिवार जनों के साथ आ जाती है। बलि ग्रहण करने के पश्चात् यदि

शिवा (शिवाएं) ईशान दिशा की ओर मुख करके आवाज निकालती हैं तो साधक को सुख-सम्पत्ति की प्राप्ति होती है और यदि वे वायव्य दिशा की ओर ध्वनि करती है तो साधक को भोग तथा मोक्ष दोनों की प्राप्ति होती है। अतः साधक को नित्य ही शिवाओं को बलि रूप से भोजन प्रदान कर उन्हें संतुष्ट करना चाहिए। इससे उसका हर प्रकार से कल्याण होता है, इसमें किसी भी प्रकार से कोई सन्देह नहीं करना चाहिए।

।। बलिदान-माहात्म्यं, अदाने हानिः।।

(नित्यश्राद्धं यथा सन्ध्यावन्दनं पितृतर्पणम्।
तथेयं कुलदेवीनां नित्यता कुलपूजने।।५३।।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने)।
जपपूजाविधानानि यत्किञ्चित सुकृतानि च।।५४।।
गृहीत्वा शापमादाय शिवा रोदिति निर्जने।
शिवारावेण तस्याशु सर्वं नश्यति निश्चितम्।।५५।।
एकया भुज्यते यत्र शिवया देवि भैरवि।
तत्रैव सर्वदेवानां प्रीतिः परमदुर्लभा।।५६।।
पशुशक्तिर्नरशक्तिः पक्षिशक्तिश्च भैरवि।
पूजिता द्विगुणं कर्म साधयेत् परमेश्वरि।।५७।।
तेन सर्वं प्रयत्नेन कर्तव्यं पूजनं महत्।

जिस प्रकार मनुष्य के लिए श्राद्ध, सन्ध्या-पूजन तथा पितृ-तर्पण रूप कर्म करना अनिवार्य है, उसी प्रकार शक्ति-पूजन के समय शिवारूपिणी इन कुल देवियों की अर्चना भी अनिवार्य कर्म है। अतः बलि प्रदान रूप कर्म द्वारा पशुरूपा शिवा की भी अर्चना करनी चाहिए। ऐसा न करने पर जप-पूजनादि के द्वारा उपलब्ध फलों सहित, साधक के और जो कुछ भी पुण्य रूप फल हैं, उन सभी को ग्रहण कर उसे शाप देती हुई शिवा निर्जन स्थान में रोती है। शिवा के इस प्रकार उच्च स्वर में रोने (चीत्कार करने) से उस साधक की सभी सिद्धियों सहित सुख-सम्पत्ति का शीघ्र ही विनाश हो जाता है। हे देवि! भैरवि! यदि एक भी शिवा, साधक के द्वारा प्रदत्त बलि को ग्रहण कर लेती है, तो उसे (साधक को) सभी देवताओं की परम दुर्लभ प्रसन्नता प्राप्त हो जाती है। हे भैरवि! (बलि प्रदान रूप अन्नदान के द्वारा) पशु शक्ति (पशु शरीर अथवा पशु आकार में स्थित पराशक्ति), नरशक्ति तथा पक्षी शक्ति की अर्चना करने पर साधक के सदोष कर्म (जप-पूजनादि) भी दोष मुक्त होकर सिद्धिप्रद हो जाते हैं। अतः साधक को सब प्रकार से बलिकर्म के लिए प्रयत्नशील रहना चाहिए।

।। बलि-मन्त्र द्वय निरूपणम्।।

राजादिभयमापन्ने देशान्तरभयादिके।।५८।।
अशुभानि च कर्माणि विचिन्त्य बलिमाहरेत्।
बलिमन्त्रं प्रवक्ष्यामि सावधानावधारय।।५९।।
येन सिद्ध्यति सर्वेशि नास्ति कालस्य निश्चयः।
आदौ कालीं समुद्धृत्य शिवे चेति ततः परम्।।६०।।
सर्वरूपधरे पश्चात् आगच्छेति पदद्वयम्।
मम-शब्दं ततो ब्रूयात् बलि-शब्दं ततः परम्।।६१।।
गृह्ण गृह्णेति द्वन्द्वं च बह्निजायावधिमनुः।
मन्त्रणानेन देवेशि बलिं दत्त्वा मनोहरम्।।६२।।
सर्वपापैः प्रमुच्येत सत्यं सत्यं महेश्वरि।
मन्त्रान्तरं प्रवक्ष्यामि बल्यर्थ यन्मनोहरम्।।६३।।
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि।
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव।।६४।।
एवमुच्चार्य दातव्यो बलिः कुलजनप्रियः।
यदा न भुज्यते देवि तदा नैव शुभं भवेत्।।६५।।
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः।
एवं ज्ञात्वा महादेवि शान्तिं स्वस्त्ययनं चरेत्।।६६।।
इति ते कथितं देवि नैमित्तिकविधिं शिवे।
यत्कृते साधको वीरो जायते च निरापदः।।६७।।

राजभय (बलशाली दुष्ट पुरुषों से उत्पन्न भय), अन्य देशों में निवास के कारण उपस्थित सङ्कट के समय तथा जीवन में अशुभ काल उपस्थित होने पर अथवा अज्ञान (प्रमाद) वश कोई अशुभ कर्म हो जाने पर साधक को (भगवती का पूजन करके तदुपरान्त) बलि प्रदान करना चाहिए। अब मैं बलि प्रदान करने का मन्त्र कहता हूँ, सावधान होकर धारण करो (सुनो)। इस बलि प्रदान कर्म से सभी कार्य सफल हो जाते हैं, इसके लिए कोई विशेष काल नियत नहीं है। साधक को जब भी आवश्यकता तथा श्रद्धा हो वह इस कर्म को कर सकता है। बलि मंत्र के लिए पहले 'कालि' का उच्चारण करे फिर 'शिवे' तदुपरान्त 'सर्वरूप धरे' पुनः दो बार 'आगच्छ' इसके बाद 'मम' बोलकर 'बलिं' पुनः 'गृह्ण-गृह्ण' तथा वह्निजाया 'स्वाहा' कहें।

मन्त्र स्वरूप – **''कालि! शिवे! सर्वरूप धरे! आगच्छ-आगच्छ मम बलिं गृह्ण-गृह्ण स्वाहा''**।

हे देवेशि! इस मन्त्र द्वारा सुरुचिपूर्ण बलि प्रदान करके साधक समस्त पापों (भय सङ्कटों तथा अशुभ परिस्थितियों) से मुक्त हो जाता है। हे महेश्वरि! मेरा यह वचन पूर्ण तथा सत्य है। अब मैं बलि प्रदान हेतु एक अन्य मन्त्र को कहता हूँ। मन्त्र इस प्रकार है –

मन्त्र स्वरुप – **''गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि! शुभाशुभ फलं व्यक्तं ब्रूहि गृह्ण बलिं तव (एतत्)''।**

इस प्रकार मन्त्र बोलकर कुलजनों (शिवाओं) के लिए सुन्दर सुरुचिपूर्ण बलि प्रदान करना चाहिए। हे देवि! यदि शिवाएं बलि स्वीकार नहीं करती तो साधक के लिए यह शुभ नहीं होता। यदि सभी बलि पदार्थ को शिवाएं ग्रहण कर (भक्षण कर) लेती है तो साधक के लिए शुभ होता है। इस प्रकार शुभ-अशुभ फलों को जानकर (अशुभ की स्थिति में) साधक को शान्तिपाठ (कर्म) तथा स्वस्त्ययन कर्म कराना चाहिए। हे देवि शिवे! मैंने तुमसे यह नैमित्तिक कर्म विधि का वर्णन किया, इसको करने से वीर साधक सर्वथा संकट मुक्त रहता है।

।। शाक्ताचार क्रम-निरूपणम्।।

अथ वक्ष्ये महेशानि शाक्ताचारक्रमं शुभम्।
शाक्तानां कुलसर्वस्वं जानीहि नगनन्दिनी।।६८।।
प्रातरुत्थाय मन्त्रज्ञः कुलवृक्षं प्रणम्य च।
शिरःपद्मे गुरुं ध्यात्वा तत्सुधाप्लावितं स्मरेत्।।६९।।
मानसैरुपचारैस्तु तमाराध्य निरामयः।
मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत्।।७०।।
सूर्यकोटिप्रतीकाशां सुधाप्लावितविग्रहाम्।
तत्प्रभापटलव्याप्तं स्वशरीरं विचिन्तयेत्।।७१।।
श्लेष्मातक-करञ्जाक्ष-निम्बाश्वत्थकदम्बकाः।
बिल्वो वाप्यथवाऽशोक इत्यष्टौ कुलपादपाः।।७२।।
एवं ते कथितं भद्रे तन्त्रेऽन्यस्मिन् महेश्वरि।
बालां वा यौवनोन्मत्तां वृद्धां वा कुलसुन्दरीम्।।७३।।
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्।
तासां प्रहारो निन्दा वा कौटिल्यमप्रियं तथा।।७४।।
सर्वथा च न कर्तव्यमन्यथा सिद्धिरोधकः।
स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणम्।।७५।।
स्त्रीसङ्गिना सदा भाव्यमन्यथा स्वस्त्रियामपि।
विपरीतरता सा तु भाविता हृदयोपरि।।७६।।

तद्धस्थावचितं द्रव्यं तद्धस्तावचितं जलम्।
तद्धस्थावचितं भोज्यं देवताभ्यो निवेदयेत्॥७७॥

हे हिमालय पुत्रि पार्वति! अब मैं शाक्त साधकों के प्रतिदिन के शुभदायक आचरण क्रम को, जो उनके साधनात्मक जीवन का सम्पूर्ण रूप से आधार है, (संक्षेप) में कहता हूँ। मन्त्रज्ञ साधक नित्य प्रातः काल उठकर कुल वृक्षों (जो उपलब्ध हों अथवा मानसिक रूप से) को प्रणाम करके शिरस्थ सहस्रदल कमल के मध्य में स्वगुर का ध्यान करके वहाँ से स्रवित होने वाले अमृत सुधा द्वारा स्वयं को पूर्णतः अभिषिक्त हुआ चिंतन करे। इस प्रकार शुद्ध चित्त हुआ वह साधक मानसोपचारों से गुरु का पूजन करके मूलाधार से ब्रह्मरन्ध्र (सहस्रार) तक उत्थित सूर्य के समान तीव्र आभायुक्त तथा सहस्रार स्रवित सुधा द्वारा अभिषिक्त विग्रह वाली कुण्डलिनी का मूल विद्या के रूप में ध्यान करे तथा उस कुण्डलिनी की प्रभा द्वारा स्वशरीर को पूर्णतः आच्छादित व्याप्त हुआ सा अनुभव करे। लिसोड़ा, करञ्ज(नक्तमाल), बहेड़ा, नीम, पीपल, कदम्ब, बेल तथा अशोक (नील सरस्वती तन्त्र में बहेड़ा न होकर बरगद नाम है) ये आठ वृक्ष कुल वृक्ष कहे जाते हैं।

कुमारी कन्या, यौवन से परिपूर्ण युवती अथवा वृद्धा किसी भी स्त्री को देखकर, वह चाहे कुरूप हो अथवा महादुष्ट (दुश्चरित्र) उसे मन ही मन प्रणाम करना चाहिए। स्त्रियों पर प्रहार, उनकी निन्दा, उनसे कपट का व्यवहार तथा उनके प्रति अप्रिय वाणी का प्रयोग तथा आचरण कभी नहीं करना चाहिए। ऐसा करने पर साधक की सिद्धि में बाधा पहुँचती है। स्त्रियां सभी देवता स्वरूपा हैं, प्राण स्वरूपा हैं तथा साधक एवं समाज की आभूषण रूपा हैं। साधक को सदैव स्त्री सङ्ग का ध्यान करना (अथवा स्त्री के साथ ही रहना) चाहिए अथवा स्व स्त्री को अपने हृदय पर विपरीतरता में स्थित रूप से कल्पना करनी चाहिए। स्त्री के हाथ से संचित किया (दिया) हुआ द्रव्य, जल तथा भोज्य पदार्थ देवता को अर्पित करना चाहिए।

अन्यमन्त्रपुरस्कारं निन्दां चैव विवर्जयेत्।
एतद् ब्रह्म तदेवैतन्नाहं वस्तु न सोऽपि च॥७८॥
नानाचारं न कर्तव्यं नाचारणमितस्ततः।
प्रायश्चितं भृगोः पातं तीर्थाभिगमनं तथा॥७९॥
पिण्डं वेदोदितं न्यासं कौले पञ्च विवर्जयेत्।
भूतहिंसा न कर्तव्या पशुहिंसा विशेषतः॥८०॥
बलिदानं बिना देव्या हिंसां सर्वत्र वर्जयेत्।
बलिदानाय या हिंसा न दोषाय प्रकीर्तिता॥८१॥

बलिदानाय हिंस्याच्च सदा देवि महापशून्।
इति वेदविदां देवि सिद्धान्तः सर्वसंमतः॥८२॥
वेदसंमतसिद्धान्तः स ममापि च संमतः।
पशुयागे महेशानि पशुं हन्यान्न संशयः॥८३॥
सा हिंसा निन्दिता वेदैर्या च वैधेतरा भवेत्।
वैधहिंसा च कर्तव्या संशयो नास्ति कश्चन॥८४॥

साधक को कभी किसी अन्य देवता तथा उसके मन्त्रों की प्रशंसा अथवा निन्दा नहीं करनी चाहिए। यह सब कुछ ब्रह्मरूप, यहाँ न कुछ 'अहम्' रूप है और न ही कोई वस्तु 'इदं' रूप (ब्रह्म से पृथक अथवा अतिरिक्त) है, अत: किसी की प्रशंसा अथवा निन्दा का प्रश्न ही नहीं उत्पन्न होता। स्वसाधनात्मक आचारों के अतिरिक्त अन्य सम्प्रदाय सम्बन्धित अनेकों आचारों-व्यवहारों (कर्म-काण्डों) को नहीं अपनाना चाहिए। इधर-उधर व्यर्थ भ्रमणशील नहीं होना चाहिए। कौल साधक को (पापों के) प्रायश्चितस्वरूप कृच्छ, चान्द्रायण आदि उपवास रूप व्रत, व्यर्थ शुक्र-पात, तीर्थाटन, पिण्ड दान तथा वैदिक न्यासादि इन पाँच कर्मों को नहीं करना चाहिए। किसी भी प्राणी की हिंसा, विशेष रूप से (अनावश्यक) पशु-हिंसा नहीं करनी चाहिए। देवी को बलिदान के लिए की जाने वाली जीव हिंसा के अतिरिक्त अन्य किसी भी कार्य के लिए की जाने वाली सभी जीव-हिंसाओं का परित्याग कर देना चाहिए। "देवता को बलि प्रदान करने के लिए की जाने वाली हिंसा में कोई दोष नहीं है। देवी को बलि प्रदान करने के लिए सदैव बड़े पशुओं की हिंसा करनी चाहिए" ऐसा सभी वेद के विद्वानों का सर्वसम्मत् सिद्धान्त (निर्णय) है। जो वेद से अनुमोदित सिद्धान्त है वही मेरे द्वारा भी सम्मत (मान्य) है। हे महेशानि! पशु-यज्ञ में पशु की हिंसा करनी चाहिए, इसमें किसी भी प्रकार का सन्देह नहीं करना चाहिए। इसके अतिरिक्त उद्देश्य के लिए जो हिंसा की जाती है, वह वेदों द्वारा निन्दित है। वेद-विधि द्वारा निर्देशित हिंसा बिना किसी संशय के नि:सङ्कोच कर्माङ्ग के रूप में साधक को अवश्य ही करनी चाहिए।

॥ समयाचार लक्षणम्॥

इदानीं शृणु चार्वङ्गि रहस्यं परमाद्भुतम्।
रहस्यं सर्वदेवीनां समयाचारलक्षणम्॥८५॥
येन बिना महेशानि न सिध्येन्मन्त्रमुत्तमम्।
कल्पकोटिजपेनापि तस्य सिद्धिर्न जायते॥८६॥

मानवाः कुलशास्त्राणां कुलाचारानुचारिणाम्।
सिद्धाः स्युर्नास्ति संदेहो वैष्णवाचारतत्पराः।।८७।।
परनिन्दासहिष्णुः स्यादुपकाररतः सदा।
पर्वते विजने वापि निर्जने शून्यमण्डले।।८८।।
चतुष्पथे कलामध्ये यदि दैवान्महेश्वरि।
क्षणं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद्यथासुखम्।।८९।।
गृध्रं वीक्ष्य महाकालीं नमस्कुर्यादतन्द्रितः।
क्षेमङ्करीं तथा वीक्ष्य जम्बुकीं यमदूतिकाम्।।९०।।
कुररं श्येनभूकाकौ कृष्णमार्जारमेव च।
कृशोदरि महाचण्डे मुक्तकेशि बलिप्रिये।।९१।।
कुलाचार प्रसन्नास्ये नमस्ते शंकरप्रिये।
श्मशाने च शवं दृष्ट्वा प्रदक्षिणमनुव्रजन्।।९२।।
प्रणम्यानेन मनुना मन्त्री सुखमवाप्नुयात्।
घोरदंष्ट्रे करालास्ये किटि-शब्दनिनादिनि।।९३।।
गुरुघोररवास्फाले नमस्ते चितिवासिनि।
रक्तवस्त्रां रक्तपुष्पां विलोक्य त्रिपुराम्बिकाम्।।९४।।
प्रणम्य दण्डवद्भुमाविम मन्त्रं पठेन्नरः।
बन्धूकपुष्पसंकाशे त्रिपुरे भयनाशिनि।।९५।।
भाग्योदयसमुत्पन्ने नमस्ते वरवर्णिनि।

हे चार्वङ्गि! अब मैं परम अद्भुत तथा रहस्ययुक्त (गोपनीय) सभी देवियों के (साधकों के द्वारा पालनीय) समयाचार लक्षण को कहता हूँ। इसका पालन किये बिना कल्पों तक मन्त्र जप करने पर भी न तो मन्त्र सिद्ध होता है और न ही साधक को सिद्धि की प्राप्ति होती है। जो मनुष्य कुलशास्त्रों के ज्ञाता तथा कुलाचार के अनुकूल व्यवहार करने के साथ ही वैष्णवाचार के पालन में भी तत्पर रहते हैं, उन्हें निश्चित रूप से सिद्धि की प्राप्ति होती है। कौल साधक को दूसरों के द्वारा अपनी निन्दा को सुनकर क्रोध न करके सहनशील होना चाहिए। सदैव दूसरों की भलाई के लिए तत्पर रहना चाहिए। भाग्यवश पर्वत, वन, जनशून्य स्थान-भवन-प्रदेश, चौराहा तथा स्त्रियों के मध्य उपस्थित होने की स्थिति में थोड़ी देर स्थिर होकर देवी का ध्यान करके मूल मन्त्र का मानस जप करके प्रसन्नतापूर्वक आगे बढ़ जाना चाहिए। अकस्मात् किसी स्थल स्थल पर गीध का दर्शन होने पर उसे महाकाली स्वरूप मानते हुए एकाग्रचित होकर प्रणाम करना चाहिए। इसी

भाँति क्षेमकरी, मादा गीदड़ (सियार), मादा कौवा, क्रौञ्च पक्षी, बाज, भूकाक (विशेष जाति का बगुला या कबूतर) अथवा काली बिल्ली का दर्शन होने पर ‘‘**कृशोदरि! महाचण्डे! मुक्तकेशि! बलिप्रिये! कुलाचार प्रसन्नास्ये! नमस्ते शंकरप्रिये!**’’ रूप अभिवादन मन्त्र बोलकर प्रणाम करना चाहिए। इससे साधक को प्रसन्नता की प्राप्ति होती है। श्मशान में शव के दृश्य होने पर उसकी प्रदक्षिणा करके ‘‘**घोर दंष्ट्रे! करालास्ये! किटि-शब्द निनादिनि! घुरघोररवास्फारे! नमस्ते चितिवासिनि!**’’ बोलते हुए प्रणाम करना चाहिए, इससे उसे सुख की उपलब्धि होती है। रक्त वस्त्र अथवा रक्त पुष्प दिखाई देने पर उसे त्रिपुराम्बिका स्वरूप मानकर भूमि पर दण्डवत् प्रणाम करके इस मन्त्र का उच्चारण करे-‘‘**बन्धूक पुष्प-सङ्काशे! त्रिपुरे! भयनाशिनि! भाग्योदयसमुत्पन्ने! नमस्ते वरवर्णिनि!**’’।

कृष्णवर्णं तथा पुष्पं राजानं राजपुत्रकम्।।९६।।
हस्त्यश्वरथशस्त्राणि करवीरं तथा शिवम्।
महिषं कुलनाथं च दृष्ट्वा महिषमर्दिनीम्।।९७।।
प्रणम्य जयदुर्गां वा स तु विघ्नैर्न लिप्यते।
जय देवि जगद्धात्रि त्रिपुराद्ये त्रिदैवते।।९८।।
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते।
मद्यभाण्डं समालोक्य मत्स्यमांसं वरस्त्रियम्।।९९।।
दृष्ट्वा च भैरवीं देवीं प्रणम्य विन्यसेन्मनुम्।
घोरविघ्नविनाशाय कुलाचारसमृद्धये।।१००।।
नमामि वरदे देवि मुण्डमालाविभूषते।
रक्तधारासमाकीर्णे वरदे त्वां नमाम्यहम्।।१०१।।
सर्वविघ्नहरे देवि नमस्ते हरवल्लभे।
एतेषां दर्शनेनैव यदि नैवं प्रवर्तते।।१०२।।
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते।
एतेषां हिंसनोच्चाटमारणं वागुरादिभिः।।१०३।।
क्रियते येन पापात्मा मद्भक्तः स कथं भवेत्।
प्रधानांशसमुद्भूता एते कुलजनप्रिये।।१०४।।

काला वस्त्र, काला पुष्प, राजा, राजपुत्र, हाथी, अश्व, रथ, शस्त्र, करवीर पुष्प, धतूरे का पुष्प (काला अथवा शिवलिङ्ग), भैंसा तथा शिव विग्रह (अथवा वृषभ) को देखकर मन ही मन जय दुर्गा अथवा महिषमर्दिनी को प्रणाम करे, इससे साधक जीवन में सदा विघ्नों से मुक्त रहता है। प्रणाम

करते समय इस मन्त्र का मन ही मन अथवा स्पष्ट उच्चारण करे- **''जय देवि जगद्धात्रि! त्रिपुराद्ये! त्रिदैवते! भक्तेभ्यो वरदे देवि! महिषघ्नि नमोऽस्तु ते''**।

मद्य पात्र, मांस, मत्स्य तथा श्रेष्ठ स्त्री के दृश्य होने पर भैरवी देवी का स्मरण कर उन्हें प्रणाम करते हुए यह मन्त्र उच्चारित करे- **''घोर(रोग) विघ्न विनाशाय कुलाचार समृद्धये नमामि वरदे देवि! मुण्ड माला विभूषिते। (कुल भक्त प्रसन्नास्ये! शङ्कर प्राणवल्लभे! कराल वदने श्यामे! नमस्ते सुरसुन्दरि!।) रक्तधारा (रक्तमांस) समाकीर्ण वदने! त्वां नमाम्यहम्। सर्वविघ्न हरे देवि! नमस्ते हरवल्लभे''**॥

उपर्युक्त इन सभी वस्तुओं का दर्शन होने पर यदि साधक प्रणामादि रूप उचित व्यवहार नहीं करता है तो पुरश्चरण करने पर भी उसे शक्ति मन्त्रों की सिद्धि प्राप्त नहीं होती है। शिकार आदि के द्वारा इन पशु-पक्षियों की हिंसा, उच्चाटन तथा वध करने वाला साधक पापपूर्ण मनोवृत्ति वाला होता है, वह भला मेरा भक्त कैसे हो सकता है अर्थात् ऐसा मनुष्य कदापि मेरा साधक-उपासक भक्त कहलाने योग्य नहीं है। हे कुलजन प्रिये! ये सभी मेरे प्रधान अंश (प्रकृति-शक्ति अंश) से उत्पन्न हैं, अत: शक्ति का ही विनाश करने वाला शक्ति का भक्त नहीं हो सकता।

डाकिन्यश्च महादेवि त्वदंशाः सर्वतो दिशः।
लब्धसिद्धिसमायोगो डाकिनीदर्शनं यदि॥१०५॥
अथवा दानवानां च मद्भक्तानां विशेषतः।
बटुकानां देवतानां तस्य सिद्धिश्च जायते॥१०६॥
परयोषां समालोक्य षोडशाब्दां मनोहराम्।
रक्तवस्त्रां मृगाक्षीं च प्रणम्य च मनुं जपेत्॥१०७॥
अष्टोत्तरशतं जप्त्वा सिद्धिमाप्नोति निश्चितम्।
ततः सिद्धमनुर्मन्त्री सर्वकर्माणि साधयेत्॥१०८॥
वैशाखे मासि देवेशि तृतीयाक्षयसंज्ञिता।
तस्यां चावाह्य विधिवत् कालिकां भुवनेश्वरीम्॥१०९॥
प्रस्तुतिं कारयेद्विद्वान् सर्वकामफलप्रदाम्।
स्तुत्वा चावाह्य यत्नेन पूजयेत् परदेवताम्॥११०॥
चतुर्भुजां महादेवीं मुण्डमालाविभूषिताम्।
अभयं वरदं खड्गं मुण्डमालाधरां पराम्॥१११॥

हे महादेवि! तुम्हारी ही अंशभूता डाकिनियाँ सभी दिशाओं में चारो ओर व्याप्त हैं। यदि संयोगवश साधक को इनका दर्शन प्राप्त हो जाय तो निश्चित ही उसे सिद्धि की प्राप्ति हो जाती है। इसके अतिरिक्त मेरे भक्त दानवों, बटुकों (ब्रह्मचारियों) तथा देवताओं का दर्शन होने पर भी उसे सिद्धि की उपलब्धि हो जाती है। षोडशवर्षीया, रक्त वस्त्र पहने हुए, हिरण के समान चञ्चल नेत्रों वाली सुन्दर परस्त्री को देखकर उसे प्रणाम करके मूलमन्त्र का एक सौ आठ बार जप करने से भी साधक को निश्चित ही सिद्धि की प्राप्ति होती है। इसके बाद साधक सभी काम्य कर्मों में सिद्धि-मन्त्रों के इच्छानुसार प्रयोग करे। हे देवि! वैशाख मास शुक्ल पक्ष की तृतीया तिथि को अक्षय तिथि कहा जाता है। इस तिथि में समस्त काम्य कर्मों का फल प्रदान करने वाली भुवनेश्वरी कालिका का विधिवत आवाहन कर, परदेवता स्वरूप उनका विधिवत् पूजन तथा स्तुति करके, इस प्रकार बोलते हुए उन्हें प्रणाम करना चाहिए -

चतुर्भुजां महादेवीं मुण्डमाला विभूषिताम्। अभयं वरदं खड्गं मुण्डमालाधरां पराम्।। (तुभ्यं देवि नमाम्यहम्)

अपने चारों हाथों में अभय, वर, खड्ग तथा मुण्ड (कपाल) धारण करने वाली तथा नरमुण्डों की माला से विभूषित (कण्ठ वाली) महादेवी आपको मैं प्रणाम करता हूँ।

।। महादेव्याः कालिकायाः पूजनम्।।

श्रीदेव्युवाच

भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग।
कालिकाया महादेव्याः पूजनं विस्तरेण तु।।११२।।
गुप्तबीजं गुप्तमन्त्रं मूलाधारबहिष्क्रियाम्।
कथयस्व समासेन येन तुष्यामि शंकर।।११३।।

हे भगवन्! आप सभी धर्मों (साधनात्मक जप पूजनादि के नियमों) के ज्ञाता तथा समस्त शास्त्रों के मूल तत्वों एवं सिद्धान्तों से पूर्णतया अवगत हैं। मैं आपसे महादेवी कालिका के गुप्त बीज, गुप्त मन्त्रों, मूलाधार से कुण्डलिनी के उत्थापन की क्रिया (तथा उससे मन्त्र जप की विधि) और उन देवी के पूजन की विधि को जानना चाहती हूँ। हे शंकर (समस्त प्राणियों का कल्याण करने वाले)! आप प्रसङ्गानुसार इसे संक्षेप एवं विस्तार पूर्वक वर्णन कीजिए।

श्री भैरव उवाच

मन्त्रन्यासं समाचर्य ऋष्यादिन्यासमाचरेत्।
आदौ च आसनं दत्त्वा पूजयेत् परदेवताम्॥११४॥
अस्यां तिथौ महादेवि कालिकां यः प्रपूजयेत्।
तस्य सर्वार्थसिद्धिः स्यात् सर्वशत्रुक्षयो भवेत्॥११५॥
राजानोऽन्ये महेशानि दासत्वं प्राप्नुयुर्लघु।
न पूजयति चेत्कालीं दम्भाद्वाप्यथ भैरवि॥११६॥
सर्वनाशं करोत्याशु क्रुद्धा भवति कालिका।
तस्मात् सर्वप्रयत्नेन महाविभवविस्तरैः॥११७॥
पूजयेत् परमेशानीं सर्वकामसमृद्धिदाम्।
महापूजां महादेवि यदि कुर्याद्वरानने॥११८॥
तदैव महती सिद्धिर्भवत्येव न संशयः।
चतुर्वर्गस्य कामी हि पूजयेत् कालिकां मुदा॥११९॥
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद् बुधः।
न्यासजालं महादेव्याः शरीरे विनिवेश्य वै॥१२०॥
एवं च आत्मानो देहे न्यासजालं निवेशयेत्।
भूतशुद्धिं ततः कुर्यात् प्राणायामं चरेत् त्रिधा॥१२१॥

मन्त्र का विनियोग करके ऋष्यादि न्यास तथा मन्त्र बीज अथवा मन्त्र वर्णों द्वारा षडङ्ग-न्यास मन्त्र वर्ण न्यासादि करके परा देवता स्वरूपा महाकाली का आवाहन कर उन्हें पुष्पासन प्रदान करके विधिवत् पूजन करना चाहिए। विशेष रूप से इस अक्षय तृतीया को महाकालिका का जो साधक पूजन करता है, उसकी सभी कामनाएं सिद्ध होती हैं तथा उसके शत्रुओं का विनाश भी हो जाता है। जिस राज्य में साधक निवास करता है, उसके राजा भी स्व परिजनों तथा प्रजाओं सहित शीघ्र ही उसके सेवक हो जाते हैं। जो साधक अहंकार अथवा उपेक्षादि अन्य कारणवश महाकाली की पूजा नहीं करता है, महाकाली क्रोधित होकर शीघ्र ही उसका सर्वनाश कर देती है। इसलिए सभी प्रकार की अभीष्ट समृद्धि को प्रदान करने वाली परमेश्वरी महाकाली की सामर्थ्यानुसार वैभव तथा विस्तार सहित पूजन करना चाहिए। यदि साधक महाकाली की श्रेष्ठ एवं बहुमूल्य उपचारों द्वारा विस्तारपूर्वक ऐश्वर्यमयी अर्चना करता है, तो हे वरानने! उसे महान सिद्धि की अवश्य ही प्राप्ति होती है। धर्म-अर्थ-काम-मोक्ष रूप चारो पुरुषार्थों (अथवा किसी एक-दो ही) की इच्छा रखने वाले साधक को प्रसन्नतापूर्वक महाकाली की अर्चना अवश्य करनी चाहिए।

साधक पूजन से पहले (आसन शुद्धि, तत्व शुद्धि, आचमन आदि करके) मूल मन्त्र (अथवा प्रणव) से तीन बार प्राणायाम करके भूतशुद्धि करे। इसके पश्चात् भूतशुद्धि के द्वारा पूजन के योग्य सम्पन्न दिव्य देवतामय स्व शरीर में प्राण-प्रतिष्ठा मन्त्र के द्वारा प्राण रूप से इष्ट देवता महाकाली की स्थापना करे। इसके पश्चात् यन्त्र अथवा मूर्ति में देवी का आवाहन तथा प्राण-प्रतिष्ठा मन्त्र द्वारा प्राण-प्रतिष्ठा करके महादेवी के शरीर में मातृका न्यास, काली क्रमानुसार षोढा-महाषोढा न्यास, मन्त्र वर्ण अथवा बीज से षडङ्ग-न्यास, मन्त्र-वर्ण न्यास तथा अन्य जो भी काली क्रम के अनिवार्य न्यास तंत्रोक्त हैं, उन्हे करके स्वशरीर को भी न्यास जालों से आच्छादित कर पूर्ण देवमय निर्मित कर दे।

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥१२२॥
विघ्नानुत्सार्य देवेशि पद्मं निर्माय यागवित्।
देवीसंमुखतो देवि ततः पूजां समारभेत्॥१२३॥
रात्रौ गते तु प्रहरे प्रथमे सुरवन्दिते।
आसनं प्रथमं दद्यात् स्वागतं तदनन्तरम्॥१२४॥
पाद्यार्घ्याचमनीयं च मधुपर्कं ततः परम्।
तथा चाचमनीयं च स्नानीयं च ततः परम्॥१२५॥
वसनं रक्तकं दद्याद् रजताभरणं तथा।
गन्धपुष्पे महादेवि धूपदीपौ ततः परम्॥१२६॥
नैवेद्यं विविधं दद्यात् सुस्वादु सुमनोहरम्।
ताम्बूलं परमं हृद्यं दद्याद् दैव्यै मनोहरम्॥१२७॥

इसके पश्चात् पूजन-स्थल से विघ्न कारक भूतों का निवारण करने के लिए ''**अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया**''। इस मन्त्र को बोलकर अपनी बायीं ओर बांये पैर द्वारा तीन बार भूमि पर आघात करे। [मन्त्रार्थ-साधन में विघ्न उत्पन्न करने वाले जो भी अदृश्य प्राणी इस भूमि (स्थल) पर उपस्थित हैं, वे सभी शिव की आज्ञा मानकर यहाँ से चले जायें अन्यथा शिवाज्ञा के उल्लंघन स्वरूप नष्ट हो जायें।]

इसके पश्चात् देवी के सम्मुख अष्टदल कमल बनाकर उस पर यन्त्र स्थापित कर पूजन प्रारम्भ करे। महाकाली का यह पूजन रात में एक प्रहर बीतने के पश्चात् द्वितीय प्रहर में करना चाहिए। हे सुरवन्दिते! पूजन के समय साधक अपने हाथों में पुष्पाञ्जलि लेकर दक्षिण नासिका मार्ग द्वारा हृदय से देवता को आवाहन मन्त्र द्वारा उस पुष्पाञ्जलि पर निकाल कर

सम्मुख बने हुए अष्ट दल कमल पर पुष्पासन देकर स्थापित कर दे। इसके बाद स्थापनी, सन्निधापिनी, संरोधिनी, सम्मुखीकरण, सकलीकरण आदि मुद्राओं का समन्त्र प्रदर्शन करके फिर अन्य कार्य करें। आसन प्रदान के पश्चात् देवी का स्वागत कर क्रमशः पाद्य, अर्घ्य, आचमन, मधुपर्क पुनः आचमन तत्पश्चात् स्नानीय जल प्रदान करे। स्नान के बाद लाल वस्त्र (दो), रजत (अथवा स्वर्ण) आभूषण, गन्ध, पुष्प, धूप तथा दीप प्रदान करे। इसके पश्चात् विविध प्रकार के सुस्वादु तथा सुरुचिपूर्ण देखने में सुन्दर पदार्थ फल व्यञ्जनादि नैवेद्य के रूप में अर्पित करके देवी को मनोहर एवं प्रिय ताम्बूल प्रदान करना चाहिए।

।। बलिदान निरूपणम्।।

बलिदानं महादेव्यै कुर्यात् साधकसत्तमः।
छागं दद्यात्तथा मेषं महिषं गोधिकां तथा।।१२८।।
कपोतं च महेशानि दद्याद् देव्यै मनोहरम्।
मधूदकं महादेव्यै शर्करादिविनिर्मितम्।।१२९।।
ततः शत्रुबलिं राजा दद्यात् क्षीरेण निर्मितम्।
स्वयं छिन्द्यात् क्रोधदृष्टया प्रहारजनकेन च।।१३०।।
कोपेन च सकृद् देवि सत्यं सत्यं गणेश्वरि।
प्राणप्रतिष्ठां कृत्वा वै शत्रुनाम्ना महेश्वरि।।१३१।।
शत्रुक्षयो महादेवि भवत्येव न संशयः।
मन्त्रं जप्त्वा विधानेन नमस्कुर्याच्छुचिस्मिते।।१३२।।
मद्यभाण्डं निवेद्यैव सर्वयत्नेन देशिकः।
ततः स साधको वीरो जायते नात्र संशयः।।१३३।।
सन्दर्शं परमं दद्याद् भृष्टद्रव्येण संयुतम्।
गुडक्षीरं मधु द्राक्षामिक्षुदण्डं पुरातनम्।।१३४।।
रम्भाफलं बीजपूरं तथा च नारिकेलकम्।
मधुयुक्तं नारिकेलं शस्यं दद्यान्महेश्वरि।।१३५।।
अवश्यं दापयेत् तत्तु देवीतोषो महान् भवेत्।

पूजनादि के अनन्तर देवी को बलि प्रदान अवश्य करना चाहिए। श्रेष्ठ साधक देवी को छाग (बकरा), भेड़, महिष (भैंसा), गोधिका, कबूतर आदि का माँस तथा मधु मिश्रित जल एवं शर्करादि से निर्मित मिष्ठान्न बलि के रूप में प्रदान करे। राजा शत्रुनाश हेतु देवी की विधिवत आराधना करके क्षीर (दूध वाले वृक्ष की काष्ठ से) से निर्मित शत्रु आकृति को स्वयं क्रोध पूर्ण

दृष्टि से देखते हुए खड्ग द्वारा एक ही बार तीव्र प्रहार करके उसे काट कर बलि रूप में देवि को अर्पित करना चाहिए। बलि से पूर्व उस शत्रु आकृति (पुतली) में शत्रु के नाम से प्राण-प्रतिष्ठा करनी चाहिए तथा क्रोध पूर्वक एक ही बार में उसे खण्डित करना चाहिए। हे महादेवि! इस बलि प्रदान प्रक्रिया से सत्य ही शत्रु का विनाश हो जाता है, मेरा यह कथन निःसन्देह पूर्णतया सत्य है।

पुनः विधिपूर्वक मन्त्र जप करके देवी को प्रणाम कर उन्हें सुसंस्कृत मद्य-युक्त पात्र अर्पित करे। इससे साधक निश्चित रूप से 'वीरभाव' को प्राप्त होता है। साधक भुने अथवा तले हुए चर्वण योग्य पदार्थ के साथ ही गुड़, दूध, मधु, द्राक्षा, छिले हुए इक्षु-दण्ड-खण्ड, केला, बीजपूर फल नारियल तथा मधुयुक्त अन्न (निर्मित पदार्थ) देवी को अर्पित करे। देवी को इस प्रकार से बलि अवश्य देना चाहिए, इससे उन्हें परम सन्तुष्टि की प्राप्ति होती है।

।। महाकाली(दक्षिणा काली)-मन्त्रोद्धारः।।

गुप्तमन्त्रं महेशानि जानीहि नगनन्दिनि।।१३६।।
भुवनेशी-द्वयं भद्रे कूचयुग्मं ततः परम्।
निजबीजत्रयं देवि दक्षिणे कालिकेति च।।१३७।।
संहारक्रमयोगेन पूर्वबीजानि चोच्चरेत्।
वेदादिश्च महामन्त्रो बह्निजायावधिः स्मृतः।।१३८।।
अस्मात् परतरं नास्ति कालीमन्त्रः परात्परः।
कल्पपादपनामायं भजतां कामदो मनुः।।१३९।।
अतिप्रियत्वात् कथितो न प्रकाश्यं वरानने।
गुप्तबीजमिदं काल्याः सर्वतन्त्रेषु गोपितम्।।१४०।।
वश्यादि च महेशानि अनेन जायतेऽचिरात्।
अष्टोत्तरशतेनापि मूलाधारबहिष्क्रियाम्।।१४१।।
कर्तुं च शक्यते देवि सिद्धो भवति तत्क्षणात्।
कलौ काली तथा तारा चान्नपूर्णा च सुन्दरी।।१४२।।
एतासां सिद्धविद्यानां श्रीमन्त्रगृहणादपि।
शिवत्वं जायते सुभ्रु संशयो नास्ति कश्चन।।१४३।।
शीघ्रं सिद्धयन्ति मन्त्राश्च सत्यं सत्यं महेश्वरि।

हे नगनन्दिनि! अब मैं महाकाली के गुप्त मन्त्र को कहता हूँ, इसे जानो (सुनो-समझो)। सबसे पहले दो बार भुवनेशी बीज (ह्रीं ह्रीं) लिखे, इसके बाद दो बार कूर्च बीज (हूँ हूँ) तत्पश्चात् तीन बार काली का स्वबीज

(क्रीं क्रीं क्रीं) पुनः 'दक्षिणे कालिके' पद और फिर संहार क्रम से पूर्व के सातों बीजों का उच्चारण करे। इन सबके पूर्व प्रणव (ॐ) तथा पश्चात् में 'स्वाहा' का प्रयोग कर मन्त्र का उद्धार करे।

मन्त्र स्वरूपम् – **''ॐ ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा''।**

इस मन्त्र से श्रेष्ठ महाकाली का अन्य कोई मन्त्र नहीं है। इस 'कल्पपादप' नामक मन्त्र का सेवन (जपादि) सभी कामनाओं को प्रदान करने वाला है। हे वरानने! तुम्हारे प्रति अति प्रेमवश मैंने इस मन्त्र को कहा है, यत्र-तत्र अनावश्यक रूप से इसको प्रकाशित नहीं करना चाहिए। काली का यह बीज (मन्त्र) समस्त तन्त्र शास्त्रों द्वारा गोपनीय ही रखा गया है। वशीकरणादि सभी (षट् कर्म तथा अन्य काम्य) कर्म इससे शीघ्र ही सिद्ध हो जाते हैं। मन्त्र सिद्धि के लिए साधक को मूलाधार से कुण्डलिनी को उठाकर सहस्रार तक ले जाकर पुनः मूलाधार में लाने की आरोहण-अवरोहण रूप प्रक्रिया के अभ्यास सहित कुण्डलिनी का मूल मन्त्र के रूप में ध्यान करते हुए मन्त्र का एक सौ आठ बार जप करना चाहिए। जो इस क्रिया को करने में समर्थ है उसे तुरन्त ही मन्त्र सिद्ध हो जाता है। कलियुग में काली, तारा, अन्नपूर्णा तथा त्रिपुर सुन्दरी ये सिद्ध विद्यायें कही गयी हैं। मन्त्र ग्रहण करते ही ये साधक का कल्याण करने वाली तथा उसे शिवत्व प्रदान करने वाली है। यह भी सत्य है कि इनके मन्त्रों की सिद्धि शीघ्र ही होती है। हे सुभ्रु (सुन्दर भौंहो वाली)! इस विषय में किसी प्रकार का कोई सन्देह नहीं करना चाहिए।

।। विशेषेषु मास-तिथिषु देव्याः पूजन-फलम्।।

माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी।।१४४।।
तस्यां संपूजयेत् तारां महाविभवविस्तरैः।
चक्रवर्ती महाराजा भवत्येव न संशयः।।१४५।।
मार्गे मासि सिते पक्षे सप्तमी रविवल्लभा।
अन्नदां पूजयेद् भक्त्या पुत्रपौत्रसमन्वितः।।१४६।।
लक्ष्मीः स्थिरायतेऽवश्यं यावच्च सचराचरम्।
तावत्तस्य गृहे लक्ष्मीर्वैकृत्यं परिवर्ज्य च।।१४७।।
निश्चला च भवेद् देवि सत्यं सत्यं गणेश्वरि।
पूजा चास्या महेशानि कथिता तव सन्निधौ।।१४८।।
अन्नदाकल्पके सम्यग् जानीहि गणसुन्दरि।
कार्तिके शुक्लपक्षस्य नवमी या सिता भवेत्।।१४९।।

तस्यां पूज्या महेशानि सुन्दरी परदेवता।
सुन्दर्याः पटले सम्यक् पूजा च कथिता शुभे॥१५०॥
इति ते कथितं किञ्चित् नैमित्तं परमं शुभम्।
अन्यद् वक्ष्यामि देवेशि जायन्ते च निरापदः॥१५१॥

जो साधक माघ मास के कृष्ण पक्ष की रटन्ती संज्ञका चतुर्दशी में भगवती तारा का विस्तार सहित ऐश्वर्य मयी अर्चना करता है, वह (जन्मान्तर में) चक्रवर्ती सम्राट होता है। इसमें किसी भी प्रकार का संशय नहीं है। मार्गशीर्ष मास शुक्ल पक्ष रवि सप्तमी को भक्तिपूर्वक अन्नदा का पूजन करने वाला व्यक्ति पुत्र-पौत्रों से युक्त होता है। जब तक इस चराचर सृष्टि की स्थिति है अर्थात् कल्प पर्यन्त उस व्यक्ति के वंशजों के गृह में लक्ष्मी अपनी विकृति (चञ्चल स्वभाव) का परित्याग करके निश्चल तथा स्थिर होकर निवास करती है। हे गणेश्वरि! यह कथन पूर्णतया सत्य है। हे महेशानि-गण सुन्दरि! अन्नदा कल्प के अन्तर्गत इसकी पूजा पद्धति का वर्णन तुमसे मैं पहले ही कर चुका हूँ।, यह तुम भली भाँति जानती हो। कार्तिक शुक्ल पक्ष नवमी (अक्षय नवमी) तिथि को परादेवता स्वरूपा त्रिपुर सुन्दरी की अर्चना करनी चाहिए। हे शुभे! त्रिपुर सुन्दरी पूजा पटल के अन्तर्गत इनकी सम्यक् अर्चना का कथन मैं तुमसे पहले ही कर चुका हूँ। हे देवि! इस प्रकार मैंने ये कुछ थोड़े से परम कल्याणकारी नैमित्तिक पूजन के विषय में वर्णन किया है। अब अन्य पूजन के विषय में कहता हूँ, जिसको करने से मनुष्य सभी सङ्कटों से मुक्त हो जाता है।

॥काम्यानुष्ठानरूप षट्कर्म स्वरूपं तेषां प्रयोगानां काल-निरूपणञ्च॥

इदानीं कथयिष्यामि काम्यानुष्ठानमुत्तमम्।
येनैव महता देवि सर्वविद्यामयो भवेत्॥१५२॥
होमतर्पण पूजा च भावना जप एव च।
मन्त्रस्य साधनं चैव मारणोच्चाटने तथा॥१५३॥
एतानि काम्यकर्माणि कुरुते साधकः सदा।
अर्धरात्रे शरत्कालो हेमन्तः स्यात् प्रभातके॥१५४॥
पूर्वाह्णे च वसन्तः स्यात् मध्याह्ने ग्रीष्म एव च।
प्रावृट्कालोपराह्णे स्यात् प्रदोषः शिशिरः स्मृतः॥१५५॥
उषायोगे च हेमन्तः प्रभाते शिशिरागमः।
प्रहरार्धे वसन्तश्च ग्रीष्मो मध्यन्दिनान्तरे॥१५६॥
तुर्ययामे च वर्षाख्या शरदस्तंगते रवौ।
एतत्ते कथितं सुभ्रु कालानां नियमं शृणु॥१५७॥

हे देवि! अब मैं कामनानुसार किये जाने वाले अनुष्ठानों के विषय में कहूँगा, जिसके प्रभाव से साधक समस्त विद्याओं (सिद्धियों) से सम्पन्न हो जाता है। मारण-उच्चाटनादि रूप जो ये काम्य कर्म कहे गये हैं, उनकी साधना (अनुष्ठान) में साधक को कर्म-अधिष्ठातृ देवता का ध्यान (पूजन सहित), मन्त्र-जप, हवन-तर्पणादि पुरश्चरण हेतु किये जाने वाले सभी पञ्चाङ्ग कर्मों को करना चाहिए।

प्रथम सूर्योदय से लेकर द्वितीय सूर्योदय तक दिन के चौबीस घण्टों में अर्धरात्रि को शरत्काल, प्रभात को हेमन्त, पूर्वाह्न को बसन्त, मध्याह्न को ग्रीष्म, अपराह्न काल को वर्षा तथा प्रदोष (सूर्यास्त के पश्चात् ४८ मिनट तक) काल को शिशिर ऋतु रूप (षट्कर्म प्रयोग हेतु) कहा गया है। मतान्तर से उषाकाल में हेमन्त ऋतु, प्रभात में शिशिर, दिन के आधे प्रहर के पश्चात् बसन्त, अर्ध दिन (मध्याह्न) के बाद ग्रीष्म, दिन के चौथे प्रहर में वर्षा तथा सूर्यास्त के पश्चात् शरत् काल माना गया है। हे सुभ्रु! यह मैंने तुमसे एक दिन (साठ घटी) के अन्तर्गत् तन्त्र-शास्त्रों द्वारा स्वीकृत ऋतु-काल नियमों के विषय में कहा है, अब आगे सुनो!

एवं ज्ञात्वा महेशानि सर्वकर्माणि कारयेत्।
शान्तिं पुष्टिं तथा वश्यमाकर्षोच्चाटनादिकम्॥१५८॥
षट्कर्माणि प्रयुक्तानि निग्रहो मारणं तथा।
रोगकृत्याक्षयादीनां निरासः शान्तिरीरिता॥१५९॥
पुष्टिर्धनजनादीनां वश्यादीनां च कथ्यते।
जनसंवननं चैवाकर्षणमात्मना कृतम्॥१६०॥
उच्चाटनादिकरणं निग्रहः परिकीर्तितः।
जनानां प्राणहरणं मारणं परिकीर्तितम्॥१६१॥
सूर्योदयं समारभ्य घटिकादशकं क्रमात्।
ऋतवः स्युर्वसन्ताद्याश्चाहोरात्रं दिने दिने॥१६२॥
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः ।
हेमन्तो शान्तिके प्रोक्तो वसन्तो वश्यकर्मणि॥१६३॥
शिशिरे स्तम्भनं प्रोक्तं विद्वेषे ग्रीष्म ईरितः।
प्रावृट्उच्चाटने शस्ता शरन्मारणकर्मणि॥१६४॥

इस प्रकार (उपर्युक्त रूप से) दिनान्तर्गत ऋतु-काल नियमों को जानकर, हे महेशानि! शान्ति, पुष्टि, वश्य, आकर्षण, उच्चाटन (विद्वेषण), निग्रह, मारणादि रूप सभी षट् कर्मों को यथा विधि करना चाहिए।

शारीरिक-मानसिक तथा ग्रह-जनित रोग (दोष), कृत्या-अभिचार प्रयोग भौतिक हानि आदि के निवारण के लिए किये जाने वाले प्रयोग (साधन) कर्म को 'शान्ति-कर्म' कहा जाता है। परिवार में सुख-शान्ति-स्वास्थ्य, धन सम्पत्ति, वंश वृद्धि आदि के लिए किये जाने वाले कर्म को 'पुष्टि-कर्म' कहते हैं। मनुष्य अथवा मनुष्य (जन) समूह को स्वाभिमुख करना आकर्षण तथा उनके मन-बुद्धि तथा समस्त इन्द्रिय-व्यवहारों को स्वानुकूल कर लेना वशीकरण कहलाता है। किसी व्यक्ति के चित्त में अन्य व्यक्ति, वस्तु अथवा स्थान के प्रति विरक्ति का भाव उत्पन्न कर देना जिससे वह उस व्यक्ति, वस्तु अथवा स्थान का परित्याग कर अन्यत्र चला जाय, उच्चाटन कर्म कहा जाता है। जिस प्रयोग (साधन) कर्म द्वारा दो व्यक्तियों अथवा व्यक्ति समूहों के मध्य कलह उत्पन्न करके उनके परस्पर के प्रेम को नष्ट कर विलग कर दिया जाता है, उसे विद्वेषण कहते हैं। इन उच्चाटन विद्वेषण कर्मों को 'निग्रह' भी कहा जाता है। बिना किसी अस्त्र-शस्त्र का प्रयोग किए केवल 'मन्त्र-यंत्र' के प्रयोग कर्म द्वारा किसी मनुष्य अथवा मनुष्य समूहों (अथवा किसी भी प्राणी) के प्राणों का हरण करना (मारना) 'मारण' कर्म कहा जाता है।

दो सूर्योदयों के मध्य अर्थात् एक दिन (२४ घण्टे) में साठ घटी का काल माना जाता है। सूर्योदय से प्रारम्भ करके क्रमशः प्रत्येक दश-दश घटी के काल को बसन्त, ग्रीष्म, वर्षा, शरत्, हेमन्त तथा शिशिर ऋतु काल के रूप में तन्त्र शास्त्रों में कल्पना की गई है। इस प्रकार षट्कर्मों को करने के लिए मासानुसार ऋतु काल की प्रतीक्षा न करके दिन के ही छः खण्डों में सभी छः ऋतुओं की कल्पना करके कर्मानुसार नियत खण्ड काल में साधना करने का विधान किया गया है। इस प्रकार शान्ति कर्म हेमन्त ऋतु खण्ड में, वशीकरण वसन्त खण्ड में, स्तम्भन शिशिर में, विद्वेषण ग्रीष्म में, उच्चाटन वर्षा में तथा मारण कर्म दिन के शरत् खण्ड काल में करना श्रेयस्कर माना गया है।

।। कर्मानुसारेण तद्देवता-ध्यानम्।।

वश्ये चाकर्षणे चैव रक्तवर्ण विभावयेत्।
निर्विषीकरणे शान्तौ पुष्टौ चाप्यायने सितम्।।१६५।।
पीतं स्तम्भनकार्येषु धूम्रमुच्चाटने स्मृतम्।
उन्मादे शक्रगोपाभं कृष्णवर्णाभकं मृतौ।।१६६।।
उत्थितं मारणे ध्येयं सुप्तमुच्चाटने स्मृतम्।
उपविष्टं सुरेशानि वश्यादौ परिचिन्तयेत्।।१६७।।

आसीनंश्वेतवर्णंतुज्ञेयंतुशान्ति(सात्वि)के शिवे।
वामपार्श्वेस्थितं कृष्णं तामसं परिकीर्तितम्।।१६८।।
सात्त्विकं मोक्षकामनां राजसं राज्यमिच्छताम्।
तामसं शत्रुनाशार्थं सर्वव्याधिनिवारकम्।।१६९।।

वशीकरण तथा आकर्षण कर्म के समय कर्म के अधिष्ठातृ देवता (अथवा मन्त्र देवता) का ध्यान रक्त वर्ण में करना चाहिए। इसी प्रकार विष-निवारण, शान्ति, पुष्टि तथा आप्यायन (तृप्ति, तुष्टि, सम्पदा आदि की वृद्धि) कर्म-काल में श्वेत-वर्ण, स्तम्भन में पीत-वर्ण, उच्चाटन में धूम्र (धुआँ) वर्ण, उन्माद में इन्द्रगोप (वीर बहूटी नामक कीट के समान रक्त) वर्ण तथा मारण कर्म-काल में कृष्ण वर्ण में देवता का ध्यान करना चाहिए।

इसी भाँति मारण प्रयोग के समय सम्मुख खड़े हुए, उच्चाटन में शयन किये हुए, वशीकरण, आकर्षण आदि में बैठे हुए (स्थिति में) देवता का ध्यान करना चाहिए।

हे शिवे! सात्विक कर्म के समय देवता का श्वेत वर्ण स्वरूप में आसन पर बैठी हुई स्थिति में ध्यान करना चाहिए। राजस कर्म के समय यान मार्ग में स्थित (रथादि पर आरूढ़) रूप से तथा तामस कर्म के समय दण्ड के समान खड़े हुए (अथवा दण्ड धारण किये हुए) रौद्र रूप कृष्ण वर्ण में ध्यान करना चाहिए।

मोक्षार्थी को सात्विक ध्यान, राज्य (धन-सम्पत्ति-ऐश्वर्य) के इच्छुक को राजस ध्यान तथा शत्रु-नाश, सर्वव्याधि-उपद्रव के निवारण तथा ग्रह-दोष अभिचारादि के शमन हेतु तामस ध्यान करना चाहिए।

।। पल्लव-योगादि निरूपणम्।।

(मन्त्रान्ते योजनं नाम्नः पल्लवः स तु कथ्यते)
मारणे विषसंहारे भूतग्रहनिवारणे।
उच्चाटने च विद्वेषे पल्लवस्तु प्रयुज्यते।।१७०।।
मन्त्रान्ते नामसंस्थानं योग इत्यभिधीयते।
शान्तिके पौष्टिके वश्ये प्रायश्चित्तविशोधने।।१७१।।
मोहने दीपने योगं प्रयुञ्जन्ति मनीषिणः।
स्तम्भनोच्चाटनोच्छेदविद्वेषेषु स चोच्यते।।१७२।।
नाम्न आद्यन्तमध्ये च मन्त्रसांमुख्य उच्यते।
मन्त्राभिमुख्यकरणे सर्वपापप्रणाशने।।१७३।।
ज्वर एष विषकृत्याशान्तिके स च उच्यते।
संमीलने स एवाथ मन्त्राणामक्षराणि च।।१७४।।

एकैकान्तरितं मन्त्रग्रथनं तत् प्रकीर्तितम्।
यच्छान्तिके विधातव्यं नामाद्यन्ते यदा मनुः॥१७५॥
तत्संपुटं भवेत् तत्तु कीलकं परिभाषितम्।
स्तम्भे मृत्युजये द्विष्टौ रक्षणादिषु संपुटः॥१७६॥
द्वे द्वे मन्त्राक्षरे यत्र एकैकं साध्यनामकम्।
विदर्भ एष विज्ञेयो मुनिभिस्तन्त्रवेदिभिः॥१७७॥
[वश्याकर्षण पौष्टिके विदर्भस्तु प्रशस्यते।
एवं योगक्रमः प्रोक्तः सर्वकार्ये मनीषिभिः॥]

मन्त्र के अन्त में साध्य नाम जोड़ने की प्रक्रिया पल्लव कही जाती है। मारण, विष-निवारण, भूत-ग्रहादि-दोष शमन, उच्चाटन तथा विद्वेषण हेतु प्रयोग करते समय 'पल्लव' युक्त मन्त्र का प्रयोग करना चाहिए।

साध्य-नाम के पश्चात् मन्त्र संयोग करना 'योग' कहा जाता है। शान्ति, पुष्टि, प्रायश्चित कर्म, पाप (दोष) का शोधन, मोहन तथा दीपन कर्म के समय योग संज्ञक मन्त्र का प्रयोग बुद्धिमान साधक को करना चाहिए।

साध्य-नाम के आदि, अन्त तथा मध्य में मन्त्र संयोग करना 'रोध' कहा जाता है। स्तम्भन, उच्चाटन, उच्छेद, विद्वेषण, मन्त्राभिमुखीकरण, सर्वव्याधि, ज्वर, ग्रहदोष, विष-पीड़ा आदि के निवारण हेतु 'रोध' मन्त्रों का प्रयोग करना चाहिए।

मन्त्र के एक-एक वर्ण के पश्चात् क्रमशः साध्य-नाम के एक-एक वर्णों का संयोग करना 'ग्रथन' कहा जाता है। सम्मोहन हेतु 'ग्रथन' प्रक्रिया युक्त मन्त्र का प्रयोग करना चाहिए।

साध्य-नाम के आदि तथा अन्त में मन्त्र का संयोग करना सम्पुट कहा जाता है, इस प्रक्रिया को 'कीलक' (कीलन) भी कहते हैं। विभिन्न प्रकार की आपदाओं की शान्ति, स्तम्भन, मृत्यु-निवारण तथा दिव्य अभिचार प्रयोगों तथा अस्त्र शस्त्रादि से रक्षण हेतु 'सम्पुट' युक्त मन्त्र का प्रयोग करने का विधान किया गया है।

मन्त्र के दो-दो वर्णों के मध्य साध्य नाम के एक-एक वर्णों का क्रमशः समायोजन करने की क्रिया को तन्त्र-शास्त्रों के ज्ञाता मुनियों द्वारा 'विदर्भ' नाम दिया गया है। वशीकरण, आकर्षण तथा पौष्टिक कर्मों में 'विदर्भ' मन्त्रों का प्रयोग साधक को करना चाहिए। इस प्रकार सभी कर्मों के लिए यथोचित मन्त्र-योग क्रम का वर्णन विद्वानों के द्वारा किया गया है।

वह्निकार्ये जपेत् स्वाहा नमः सर्वत्र चार्चने।
शान्तिपुष्टिवशद्वेषमारणोच्चाटने तथा॥१७८॥
सुधा स्वाहा वषट् हुं च वौषट् फटं क्रमान् न्यसेत्।
पद्मासनं महादेवि पौष्टिके समुदाहृतम्॥१७९॥
वश्ये चैव महेशानि तथा च शान्तिके शिवे।
आसनं स्वस्तिकं प्रोक्तं साक्षात् सिद्धिकरं तथा॥१८०॥
आकृष्टौ च महेशानि कम्बलं समुदाहृतम्।
वीरासनं महेशानि विद्वेषे समुदाहृतम्॥१८१॥
उच्चाटने मारणे च वीरासनं प्रशस्यते।

हवन करते समय मन्त्रों के साथ 'स्वाहा' तथा पूजन-अर्चन के समय सभी मन्त्रों के साथ पश्चात् में 'नमः' का संयोग करना चाहिए। शान्ति, पुष्टि, वशीकरण, विद्वेषण, उच्चाटन तथा मारण के प्रयोग-कर्मों के समय मन्त्र के पश्चात् क्रमशः स्वधा, स्वाहा, वषट्, हुं, वौषट् तथा फट् शब्दों का प्रयोग करना चाहिए।

पौष्टिक कर्म के समय जपादि के लिए पद्मासन में तथा वशीकरण एवं शान्ति कर्म के समय स्वस्तिकासन में बैठना प्रत्यक्ष सिद्धिकारक कहा जाता है। विद्वेषण, उच्चाटन तथा मारण क्रिया की साधनाकाल में साधक को वीरासन (शवासन पर) बैठना चाहिए। आकर्षणादि कर्मों में यथोचित कम्बल का आसन प्रयोग करना चाहिए।

॥ प्रयोग-काले देवता-ध्यानम्॥

शान्तिपौष्टिकवश्ये च सुन्दरी शोभनाशया॥१८२॥
सर्वाभरणसंदीप्ता प्राप्तकाममनोरथा।
ध्यातव्या देवता सम्यक् सुप्रसन्नाननाम्बुजा॥१८३॥
आकर्षणे च तद्वत् स्यात् प्रसारणे प्रशस्यते।
साध्य आकर्षणे द्वेषे प्रथितं तन्त्रवेदिभिः॥१८४॥
वर्जमानैर्जनैर्दान्तैर्ग्रथितस्तस्करेण च।
उलूकवायसारिष्टैर्ग्रस्तमुच्चाटने रिपुम्॥१८५॥
शिलयाक्रान्ति स्तम्भे तु कृष्ये पर्णादिवत् स्मरेत्।

शान्ति-पुष्टि तथा वशीकरण के प्रयोग काल में सुन्दर शोभा सम्पन्न, समस्त आभूषणों से सुसज्जित अङ्गोपाङ्ग युक्त देदीप्यमान, समस्त मानसिक कामनाओं को प्रदान करने के लिए तत्पर तथा अत्यन्त प्रसन्न मुख कमल युक्त देवता के स्वरूप का ध्यान करना चाहिए। सर्वाकर्षण हेतु भी इसी भाँति

सुमनोहर सौन्दर्य-मूर्ति रूप में ही ध्यान करना चाहिए। विद्वेषण कर्म में साध्य की जन-समूह (अथवा देवता) द्वारा भर्त्सना करते हुए रूप में ध्यान करना चाहिए। इसके अतिरिक्त जैसे चोर को नियन्त्रित (बाँध) कर दण्डित-पीड़ित किया जाता है, उसी रूप में साध्य का ध्यान करना चाहिए।

उच्चाटन कर्म में साध्य-शत्रु को उल्लू, कौवों तथा अनेकों हानिप्रद जीवों अथवा अमाङ्गलिक पदार्थों से घिरा हुआ सा ध्यान करना चाहिए। स्तम्भन में शत्रु को विशाल प्रस्तर खण्ड से दबा हुआ तथा आकर्षण में पत्ते के समान (उड़कर समीप आता हुआ सा) ध्यान करना चाहिए।

[मारण कर्म में साध्य को चोरो-लुटेरों (अथवा सर्पों) द्वारा, हिंसक प्राणियों व्याघ्रादि के द्वारा अथवा राजसैनिकों द्वारा घिरा हुआ तथा उनके द्वारा मारा जाता हुआ सा ध्यान करना चाहिए। मारण हेतु (अथवा क्रूर कर्म के समय) अपने दाँतों से होठों को दबाकर क्रोध-मुद्रा में जप करना चाहिए।]

।। तिथि-वार-निर्णयम्।।

इदानीं शृणु चार्वङ्गि तिथीनां नियमं शुभे।।१८६।।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा।
बुधेज्यवारसंयुक्ता शान्तिकर्मणि पूजिता।।१८७।।
सप्तमी पौष्टिके शस्ता अष्टमी नवमी तथा।
दशम्येकादशी चैव भानुशुक्रादिसंयुता।।१८८।।
आकर्षणेऽप्यमावास्या नवमी प्रतिपत्तथा।
पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्मणि।।१८९।।
कृष्णा चतुर्दशी तद्वदष्टमी मन्दवारका।
उच्चाटने तिथिः शस्ता प्रदोषे च विशेषतः।।१९०।।
चतुर्दश्यष्टमी कृष्णा अमावस्या तथैव च।
मन्दसौरदिनोपेता शस्ता मारणकर्मणि।।१९१।।
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा।
पौर्णमासी च विज्ञेया तिथिः स्तभनकर्मणि।।१९२।।
शुभग्रहोदये कुर्यादशुभा अशुभोदये।
रौद्रकर्माणि रिक्तार्के मृत्युयोगे च मारणम्।।१९३।।
होमतर्पणपूजा च भावना जप एव च।
मन्त्रस्या धारणा चैव मारणोत्सादने तथा।।१९४।।
एतानि काम्यकर्माणि प्रयोगेऽन्यत् समर्चयेत्।

हे चार्वङ्गि! अब किस तिथि में कौन सा कर्म करना चाहिए, इसके विषय में सुनो। बुधवार अथवा गुरुवार (बृहस्पतिवार) से युक्त द्वितीया, तृतीया, पञ्चमी तथा सप्तमी तिथियों में शान्ति कर्म करना चाहिए।

रवि अथवा शुक्रवार से युक्त सप्तमी, अष्टमी, नवमी, दशमी तथा एकादशी तिथियाँ पौष्टिक कर्म के लिए श्रेष्ठ हैं।

आकर्षण कर्म के लिए सूर्य-शुक्रवार युक्त अमावस्या तथा शुक्ल पक्ष की प्रतिपदा तथा नवमी श्रेष्ठ है। सूर्य-शनि युक्त पूर्णिमा विद्वेषण कर्म के लिए तथा उच्चाटन हेतु शनिवार युक्त कृष्णा चतुर्दशी तथा अष्टमी प्रदोष कालीन श्रेयस्कर है।

कृष्ण पक्ष की अष्टमी-चतुर्दशी तथा अमावस्या जो शनि तथा सूर्य (अथवा मंगल) वार से युक्त हो मारण कार्य के लिए उपयुक्त है। सोम तथा बुधवार युक्त शुक्ल पक्ष की पञ्चमी-दशमी तथा पूर्णमासी तिथियाँ स्तम्भन कार्य के लिए उत्तम है।

जब साध्य के लिए शुभ ग्रह उदित हों तो उसके लिए शुभ कर्म तथा अशुभ ग्रह के उदय काल में अशुभ कर्म करना चाहिए। क्रूर कर्म विशेष रूप से रिक्ता तिथियों (चतुर्थी-नवमी तथा चतुर्दशी) तथा रविवार को करना चाहिए। मारण कर्म साध्य का मृत्यु योग होने पर ही करना चाहिए।

मारण-उच्चाटन आदि सभी काम्य कर्मों की सिद्धि के लिए देवता का ध्यान, पूजन, मन्त्र जप, हवन तथा तर्पण (मार्जन-ब्राह्मण भोजन भी) सभी कर्म विधिवत् करना चाहिए। जप के समय मन्त्र-वर्णों का स्पष्ट उच्चारण तथा उनका सम्यक् (अर्थ सहित) ध्यान भी करते रहना चाहिए।

।। वशीकरण-प्रयोग:।।

अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम्।।१९५।।
येन विज्ञातमात्रेण मन्त्राः सिद्ध्यन्ति तत्क्षणात्।
प्रतिमां कारयेद् देवि पलेन रजतस्य च।।१९६।।
पलार्धेन महेशानि साध्यस्य प्रतिमां शिवे।
हरितालं पलार्धं च हरिद्राचूर्णकं तथा।।१९७।।
गर्तं कृत्वा सार्धहस्तं तत्र निक्षिप्य सुन्दरि।
रक्तासनं तत्र दत्त्वा वसेत् तद्गतमानसः।।१९८।।
चतुर्दिक्षु महेशानि पताकां विनिवेशयेत्।
रक्तासने चोपविश्य पूर्वास्यो जपमाचरेत्।।१९९।।
पूजायां नियमं देवि जानीहि नगनन्दिनि।
तिलपूर्णं घटं तत्र स्थापयेत् देवि देशिकः।।२००।।

ताम्रपात्रं ततो न्यस्य प्रतिष्ठामाचरेत् ततः।
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद् बुधः॥२०१॥
अधः कृत्वा पूजयित्वा प्रवालमालया जपेत्।
दशसाहस्रजप्येन प्रयोगार्हो भवेत् ततः॥२०२॥
प्रणवं पूर्वमुच्चार्य मायाबीजं द्वितीयकम्।
कान्तं च लाकिनीयुक्तं वामकर्णेन्दुभूषितम्॥२०३॥
ततो रक्तपदं ब्रूयाच्चामुण्डे तदनन्तरम्।
साध्यनाम ततो न्यस्य वशमानय तत्परम्॥२०४॥
वह्निजायावधिर्मन्त्रो जपेद् दशसहस्रकम्।
दशांशादिप्रमाणेन होमादींश्च समाचरेत्॥२०५॥
प्रातः स्नात्वा शुचिर्भूत्वा हविष्याशी जितेन्द्रियः।
प्रातः कालं समारभ्य जपेद् मध्यन्दिनावधि॥२०६॥
जपे समाप्ते देवेशि हुनेद् दिने दिने शुभे।
जातीकुसुमहोमेन वशयेन्नात्र संशयः॥२०७॥
कर्पूरमिश्रितैस्तोयैस्तर्पयेत् परदेवताम्।
पूर्वं प्रणवमुद्घृत्य चामुण्डां प्रवदेत् ततः॥२०८॥
तर्पयाम्यग्निजायान्तं मन्त्रं जानीहि भैरवि।
अनेनैव विधानेन सन्तर्प्य परदेवताम्॥२०९॥
सिद्धिप्रयोगो देवेशि जायते नात्र संशयः।
अभिषेकं ततः कुर्याद् भैरवि प्राणवल्लभे॥२१०॥
प्रणवं च महेशानि चामुण्डा तदनन्तरम्।
अभिषिञ्चामि तत्पश्चात् हृदन्तेनाभिषेचयेत्॥२११॥
तद्दशांशेन देवेशि ब्राह्मणान् भोजयेत् तदा।
एवं कृते महेशानि वशीकरणमुत्तमम्॥२१२॥

अब मैं वशीकरण के लिए एक उत्तम प्रयोग को कहता हूँ जिसके विज्ञान (सविधि सम्पूर्ण क्रिया को करके जानने) मात्र से वशीकरण के सारे मन्त्र सिद्ध हो जाते हैं। सर्वप्रथम एक पल अथवा आधे पल की मात्रा में चाँदी लेकर उससे साध्य की प्रतिमा का निर्माण कराये। फिर डेढ़ हाथ गहरा गड्ढा खोदकर उसमें आधा पल हरताल तथा इतना ही हल्दी का चूर्ण डालकर उसे बन्द करके उस पर लाल वस्त्र बिछा दें। गड्ढे के चारों ओर पताकायें लगाकर उसके पश्चिम समीप ही लाल (कम्बल आदि का) आसन बिछाकर, पूर्व की ओर मुख करके बैठकर साध्य का चिन्तन करते हुए जप करे।

हे पर्वत पुत्रि पार्वति! जप से पहले किये जाने वाले पूजनादि कर्म को जानो (सुनो)। पहले अपने सम्मुख तिल से पूर्ण ताम्बे का घट स्थापित करे। इसके बाद उस घट के ऊपर ताम्रपात्र में प्रतिमा को रखकर प्राण-प्रतिष्ठा मन्त्र द्वारा उस प्रतिमा में साध्य के नाम से प्राण-प्रतिष्ठा करे। फिर उस प्रतिमा को नीचे रखकर उसका पूजन करके मूँगे की माला से जप करे। दश हजार की संख्या में मन्त्र जप करने से यह प्रयोग सिद्ध हो जाता है।

मन्त्र का स्वरूप इस प्रकार होगा - पहले प्रणव (ॐ) का उच्चारण कर फिर मायाबीज 'ह्रीं' का उच्चारण करे। तत्पश्चात् कान्त(क्), लाकिनी (ल्) तथा वामनेत्र (ई) एवं चन्द्र बिन्दु के संयोग से निष्पन्न 'क्लीं' का प्रयोग करे। पुनः 'रक्त' पद के साथ 'चामुण्डे' फिर साध्य नाम तत्पश्चात् 'वशमानय' तथा वह्नि जाया 'स्वाहा' का संयोग कर पूर्ण मन्त्र का उद्धार करे।
मन्त्र स्वरुप - **''ॐ ह्रीं क्लीं रक्त-चामुण्डे अमुकं वशमानय स्वाहा''**। (अमुकं के स्थान पर द्वितीया विभक्ति युक्त साध्य नाम प्रयोग किया जायेगा)

इस मन्त्र का दश हजार जप करने के पश्चात् तत्तद् दशांश रूप से हवन-तर्पणादि पञ्चाङ्ग कर्मों को करना चाहिए। साधक को चाहिए कि प्रतिदिन प्रातः स्नानादि से पवित्र होकर प्रातः काल से मध्याह्न (दोपहर) तक जप करे। प्रतिदिन जप संख्या के दशांश नियमानुसार हवन तर्पणादि की क्रिया भी सम्पन्न कर ले। जप काल में साधक को हविष्यान्न भोजी तथा जितेन्द्रिय रहना चाहिए।

जाती पुष्पों के द्वारा हवन करने से साध्य अवश्य ही वशीकृत हो जाता है। कर्पूर मिश्रित जल से देवता का तर्पण करना चाहिए। तर्पण के समय **'ॐ चामुण्डां तर्पयामि स्वाहा'** मन्त्र का उच्चारण करना चाहिए। हे प्राणवल्लभे भैरवि! तर्पण के पश्चात् **'ॐ चामुण्डां अभिषिञ्चामि नमः'** मन्त्र से परादेवता का अभिषेक भी करना चाहिए। इस विधि से पर देवता का तर्पण तथा अभिषेक (मन्त्र जप तथा हवन के पश्चात्) करने से हे देवेशि! अवश्य ही प्रयोग सिद्ध हो जाता है। तत्पश्चात् सम्पूर्ण जप तथा अन्य क्रियायें पूर्ण हो जाने पर अभिषेक (मार्जन) की दशांश संख्या में ब्राह्मणों को भोजन कराना चाहिए। इस प्रकार से सम्पूर्ण कर्म के विधिवत् सम्पादित होने पर श्रेष्ठ वशीकरण प्रयोग सिद्ध हो जाता है।

जायते नात्र संदेहः सत्यं सुरगणार्चिते।
कामतुल्यश्च नारीणां रिपुणां शमनोपमः॥२१३॥
यावज्जीवितपर्यन्तं स्मरबाण इवेश्वरि।
जायते नात्र संदेहः सत्यं सुरगणार्चिते॥२१४॥

श्वेतापराजितामूलं पेषयेद् रोचनायुतम्।
शतेन मन्त्रितं कृत्वा तिलकं कारयेत् ततः॥२१५॥
वशयेद् नात्र सन्देहः सत्यं सत्यं महेश्वरि।
चन्द्रसूर्यौ यदि वृथा तदा निष्फलभाग् भवेत्॥२१६॥
रक्तवस्त्रेण चामुण्डां तोषयेद् बहुयत्नतः।
सुवर्णदक्षिणा देया वित्तानुसारतः प्रिये॥२१७॥
आद्यन्ते महतीं पूजां कुर्यात् तस्य वरानने।
पञ्चदिनप्रयोगेण राजानं वशमानयेत्॥२१८॥
तव प्रीत्यै महादेवि कथितं भुवि दुर्लभम्।
विद्वेषणं विशेषेण शृणुष्वैकमनाः प्रिये॥२१९॥

उपर्युक्त प्रयोग-विधान द्वारा वशीकरण-सिद्धि को प्राप्त साधक नारियों के मध्य कामदेव के समान (अपने वशीभूत करने में सक्षम) हो जाता है तथा अपने शत्रुओं को भी वशीकृत करके उनका पूर्ण रूप से शमन कर देता है। हे सुरगणपूजिते देवि! ऐसा सिद्ध साधक जब तक जीवित रहता है, काम-बाण के समान स्त्रियों को पीड़ित करने में समर्थ बना रहता है।

श्वेत (सफेद) अपराजिता के जड़ को गोरोचन के साथ पीसकर उसे पूर्वोक्त वशीकरण मन्त्र से सौ बार अभिमन्त्रित करके तिलक करने वाला मनुष्य सभी प्राणियों को वशीकृत करने में समर्थ हो जाता है। हे महेश्वरि! मेरा यह कथन निःसन्देह पूर्णतः सत्य है। यदि सृष्टि में चन्द्र तथा सूर्य का होना व्यर्थ हो जाय अर्थात् ये प्रकाशहीन हो जाय तो ही यह प्रयोग निष्फल हो सकता है। परन्तु चन्द्र-सूर्य कभी (सृष्टि काल में) प्रकाशहीन हो नहीं सकते। अतः यह सिद्ध-प्रयोग भी कभी असफल (असत्य) नहीं हो सकता। प्रयोग के पूर्व तथा पश्चात् में साधक को अपने सामर्थ्यानुसार देवी की विशद् अर्चना कर उन्हें रक्त वस्त्र (तथा रक्तपुष्पाभूषणादि) समर्पित करके प्रसन्न करना चाहिए। पूजनोपरान्त गुरु तथा ब्राह्मणों को सुवर्ण (सामर्थ्य के अनुसार यथोचित) दक्षिणा भी देनी चाहिए। पाँच दिनों तक इस वशीकरण प्रयोग को करने वाला साधक राजा को भी अपने वश में कर लेता है। हे महादेवि! तुम्हारे प्रति प्रेम के कारण ही मैंने संसार में अतिदुर्लभ इस प्रयोग का वर्णन किया है। अब विशेष रूप से विद्वेषण-प्रयोग का वर्णन करता हूँ, एकाग्रचित्त होकर इसे श्रवण (तथा चित्त में धारण) करो।

॥ विद्वेषण-प्रयोगः॥

करञ्जकविषेणैव तथा धत्तूरकेण च।
काकोलूकौ सदा लेख्यौ भूर्जपत्रे महेश्वरि॥२२०॥

साध्यानां नामसहितं मन्त्रं संलिख्य साधकः।
एतयोर्यादृशं वैरं तादृशं चामुकयोर्भवेत्॥२२१॥
वह्निजायावधिर्मन्त्रः सर्वविद्वेषकारकः।
महाकाली देवता च पूजा तस्याः शुभप्रदा॥२२२॥
एवं सहस्रमानेन जपं कुर्याच्छुचिस्मिते।
मारणं सविशेषं च शृणुष्वैकमनाः प्रिये॥२२३॥

करञ्ज विष तथा धतूरा-रस मिश्रण के द्वारा कौवे तथा उल्लू के पंखों से भोजपत्र पर पूर्वोक्त मन्त्र लिखे। साध्य नाम के स्थान पर 'अमुक-अमुकयोः' तथा 'वशमानय' के स्थान पर 'विद्वेषय' लिखे। अन्त में पूर्ववत् 'स्वाहा' का प्रयोग करे। यथा – **'ह्रीं क्लीं रक्त चामुण्डे अमुक-अमुकयोः विद्वेषय स्वाहा'।**

इसके बाद महाकाली का पूजन कर उस भोजपत्र को सम्मुख रखकर दोनों शत्रुओं की (जिनके मध्य विद्वेषण अभीष्ट है तथा जिनका साध्य रूप में नाम लिखा गया है उनकी) कौवे तथा उल्लू की आकृति रूप से कल्पना करते हुए उपर्युक्त रूप से मन्त्र का एक हजार (आठ) बार जप करे। ऐसा करने से जिस प्रकार कौवे तथा उल्लू में परस्पर बैर होता है, वैसी ही शत्रुता उनमें परस्पर उत्पन्न हो जायेगी। हे देवि! अब मारण प्रयोग को एकाग्रचित्त होकर सुनो।

निहत्य कृष्णमार्जारं मस्तकं तत्र तं नयेत्।
सिन्दूरेण समायुक्तं कुर्यात् साधकसत्तमः॥२२४॥
तज्जिह्वायां महादेवि साध्यनाम लिखेच्छिवे।
साध्यनाम लिखित्वा तु कालीमन्त्रं जपेन्मुदा॥२२५॥
निजबीजेन घटितमक्षरं प्रजपेत् ततः।
दशसाहस्रजापेन मारयेदरिमग्रतः॥२२६॥
श्मशानकालिकां तत्र चावाह्य पूजयेच्छुभे।
लौहालङ्कारसंयुक्तं वस्त्रं देव्यै प्रदापयेत्॥२२७॥
दक्षिणास्यो जपेद् मन्त्रं ततः सिद्धो भवेन्मनुः।
अन्नं पक्त्वा महादेवि निर्जनं दापयेत् प्रिये॥२२८॥
अर्धरात्रे बलिं दत्त्वा खनेद् वैरिगृहे यदि।
सप्ताहमध्ये देवेशि शत्रुर्याति यमालयम्॥२२९॥
इति ते कथितं देवि सारात् सारतरं मतम्।
तव स्नेहाद्वरारोहे प्रकाशितमिदं पुरः॥२३०॥

काले बिलाव (नर बिल्ली) को मारकर उसका मस्तक लाकर उसे सिन्दूर से पूरित (रञ्जित) करे। तत्पश्चात् उसकी जिह्वा पर साध्य नाम लिखे। इसके बाद (महाकाली की पूजा कर उस मस्तक को सम्मुख रखकर) काली मंत्र का प्रसन्नतापूर्वक जप करे। तत्पश्चात् **'ह्रीं क्रीं रक्त चामुण्डे अमुकं मारय-मारय स्वाहा'** मन्त्र का दश हजार जप करे। इसके बाद श्मशान काली का आवाहन करके पुनः पूजन करे। पूजन में देवी को रक्त वस्त्र अलङ्कार आदि का समर्पण करे। साधक को दक्षिण की दिशा में मुख करके जप करना चाहिए। इससे शीघ्र ही मन्त्र सिद्ध होता है। अन्न को पकाकर निर्जन स्थान में अर्धरात्रि में देवि को बलि प्रदान करना चाहिए। इस बलि को शत्रु के घर किसी प्रकार गुप्त रूप से जमीन में गाड़ देना चाहिए। इस प्रयोग से सात दिनों में ही शत्रु की मृत्यु हो जाती है।

।।शान्ति-कर्म प्रयोगः।।

शान्तिकं शृणु सर्वज्ञे येन जीवति साधकः।
उर्वशीं प्रथमं नीत्वा युगान्तकारकं परम्।।२३१।।
स्तनद्वयेन संयुक्ता धूमिनी-त्रितयं ततः।
अस्य मन्त्रस्य देवेशि सहस्राष्टप्रमाणतः।।२३२।।
जपं कुर्याद् महेशानि अन्नपूर्णा च देवता।
पूजयेद् विविधैर्भक्ष्यैर्नानारससमन्वितैः।।२३३।।
चर्व्यं चोष्यं तथा लेह्यं द्रव्यं दद्यान्मनोहरम्।
दशांशादिप्रमाणेन होमादींश्चं समाचरेत्।।२३४।।
पद्मपुष्पस्य होमेन शान्तिर्भवति सुन्दरि।
मधुना तर्पयेद् देवीमन्नपूर्णां परां गतिम्।।२३५।।
प्रथमेऽहनि देवेशि जलेन पूरयेद् घटम्।
तद्घटे पूजयेद् देवीं पूज्यावाह्य सुरेश्वरीम्।।२३६।।
मन्त्रेणानेन देवेशि यदि कुर्यात् प्रयोगकम्।
सर्वव्याधिर्विनश्येत नात्र कार्या विचारणा।।२३७।।

हे सर्वज्ञे! अब शान्तिक कर्म के विषय में सुनो, जिसे करने पर साधक दीर्घायु वाला होता है। प्रथम उर्वशी (आ), तत्पश्चात् युगान्त कारक (स्फ्रें) पुनः तीन बार धूमिनी (धूं धूं धूं) तदुपरान्त स्तनद्वय अर्थात् ठद्वय (स्वाहा) का उद्धार करे। इस प्रकार प्राप्त

मन्त्र स्वरुप - **"आ स्फ्रें धूं धूं धूं स्वाहा"**।

हे देवेशि! अनेकों प्रकार के रसयुक्त सुस्वादु पदार्थों से युक्त

भक्ष्य-भोज्य, चर्व्यचोष्य तथा लेह्य आदि रुचिकर अन्नों को नैवेद्य रूप से अर्पित करते हुए भगवती अन्नपूर्णा की अर्चना करके साधक इस मन्त्र का आठ हजार जप करे। जप का दशांश हवन करे। कमल पुष्पों से हवन करने से शान्ति की प्राप्ति होती है। मधु के द्वारा देवी अन्नपूर्णा का तर्पण करने से मुक्ति की प्राप्ति होती है। प्रयोग के प्रथम दिन जलपूरित घट की स्थापना करके उसमें देवी का आवाहन कर सर्वोपचारों द्वारा इसी मन्त्र से अर्चन करना चाहिए। इससे निःसन्देह सर्व प्रकार के रोगों का विनाश हो जाता है।

॥ ज्योतिरूपा देवी दर्शनम्॥

रहस्यं शृणु देवेशि येन सत्य(युगं?पुरं)व्रजेत्।
साधनादि महेशानि बहुधा कथितं मया॥२३८॥
पुनः केन प्रकारेण ज्योतीरूपां विलोकयेत्।
तन्मे शृणु वरारोहे कृपया परमेश्वरि॥२३९॥
शृणु साध्वि महाभागे सर्वज्ञानान्तरस्थितम्।
वैष्णवे गाणपत्ये च शैवे वा शाम्भवेऽपि वा॥२४०॥
योगे संन्यासधर्मे वा कौलो धर्मः प्रशस्यते।
कुलीनधर्ममाश्रित्य जपेद् रात्रिन्दिवं शिवे॥२४१॥
नद्यादौ विजने शून्ये गेहे बिल्वतले तटे।
लतासंवेष्टितस्थाने शुद्धभावेन तां भजेत्॥२४२॥
श्मशाने निर्जने वापि सदा तिष्ठति सुन्दरी।
विकाररहिताश्चेत् त्वां भजन्ते सिद्धिकामिनः॥२४३॥
तदा त्वं साधकानां च भविता दृष्टिगोचरा।

हे महेशानि! मैंने तुमसे अनेकों प्रकार के साधनों का वर्णन किया। अब एक रहस्ययुक्त प्रयोग का वर्णन करता हूँ कि किस प्रकार से कोई साधक ज्योतिरूपा भगवती का प्रत्यक्ष दर्शन कर सकता है। हे साध्वि! समस्त ज्ञानों का जो सारभूत ज्ञान है, उसे सुनो। वैष्णव, गाणपत्य, सौर्य, शाम्भव (शैव), योग अथवा सन्यास जितने भी धर्म (सम्प्रदाय) हैं, उनमें कौल (शाक्त) धर्म सबसे श्रेष्ठ कहा जाता है। अतः मनुष्य को अपने कल्याण के लिए कौल धर्म का आश्रय ग्रहण कर, उसी के अनुसार दिन-रात जप-पूजन आदि कर्म करना चाहिए। नदी आदि के तट तथा विल्व वृक्ष के मूल में, जो बिल्कुल जन शून्य स्थान हो, अथवा श्मशान में अथवा एकान्त गृह में सुन्दरी स्त्री के साथ आलिङ्गनबद्ध होकर, विकार रहित चित्त से, सिद्धि के इच्छुक साधक को साधना (जपादि) करना चाहिए। ऐसे साधकों को ही, हे देवि! तुम भविष्य में साधना के फलस्वरूप दृष्टि-गोचर होती हो अर्थात् उन्हें प्रत्यक्ष (अथवा ध्यान में) दर्शन देती हो।

साधनं च प्रवक्ष्यामि कथितं यत् तपोधने।।२४४।।
यतिभावेन वा देवि राजभावेन वा शिवे।
अभेददर्शी संभूय त्वां प्रपश्यति साधकः।।२४५।।
तीर्थपूर्णं नवघटं कुजवारेऽष्टमी यदि।
निधाय तत्र विधिवत् पूजां कृत्वा विधानतः।।२४६।।
विषिच्य वेदिकां तत्र तस्योपरि शुभासनम्।
आस्तीर्य निवसेत् तत्र ज्योतिर्मन्त्रपुरःसरम्।।२४७।।
फूत्कारेण चतुर्दिक्षु तन्मन्त्रमुच्चरन् धिया।
ध्यायेच्च सततं देवि तव रूपं प्रयत्नतः।।२४८।।
द्विभुजां सुन्दरीं श्यामां नानारत्नविभूषिताम्।
रक्तवस्त्रां स्मितमुखीं मातृवत् परिपालिनीम्।।२४९।।
भैरवी घोररूपां त्वां तदा जानाति भैरवि।
नासारन्ध्रोपरि ध्यायेत् तव तेजः स्वचक्षुषा।।२५०।।
कूर्चमध्येऽथवा पश्येत् तव ज्योतिरनामयम्।
चन्द्रकोटिप्रभं शीतं रविकोटिसमं खरम्।।२५१।।
उतुङ्गे च महाकालं स्वप्रकाशाचलं गुरुम्।
धीरेण चेतसा धार्यं काले काले विधानतः।।२५२।।
शून्यालये प्राङ्गणे वा वीथिकापालिकासु च।
शृंङ्गाट-हट्ट-शालेषु यथारुचि करोत्विति।।२५३।।

हे देवि! तुमसे मैं जिस साधन को कह रहा हूँ उसमें साधक यति भाव से (सन्यासी की भाँति बिना बाह्योपचार के मानसिक ध्यान-पूजन द्वारा दिव्य भाव से) अथवा राजोचित भाव से ऐश्वर्यमयी अर्चन-पूजन रूप साधना करे, वह अभेददर्शिता की अवस्था को प्राप्त होकर तुम्हारा दर्शन करता है।

मंगलवार से युक्त अष्टमी तिथि को तीर्थ (तीर्थजल अथवा मदिरा) से पूर्ण नौ(९) घंटों की विधिवत् स्थापना कर उस पर सविधि देवी का पूजन करे। उसी स्थान पर वेदी की रचना कर उस पर आसन बिछाकर बैठे। सभी दिशाओं में फूत्कार (फट्कार) पूर्वक रक्षण विधान करके मानसिक रूप से ज्योति मन्त्र का जप करते हुए, हे देवि! निरन्तर प्रयत्नपूर्वक तुम्हारा ध्यान करे।

इस प्रकार साधनारत साधक अनेकों रत्ननिर्मित आभूषणों से विभूषित, लाल वस्त्र धारण की हुई, दो भुजाओं से युक्त, मातृवत (विश्व का) पालन करने वाली तथा मुस्कान युक्त मुख वाली षोडश वर्षीया सुन्दर युवती के रूप में, घोररूपा भैरवी तुमको देखता है। तत्पश्चात् साधक को अपने

नासारन्ध्र के ऊपर दृष्टि स्थिर कर वहाँ तुम्हारे तेज स्वरूप का ध्यान करना चाहिए अथवा कूर्च 'हूं' कार के मध्य में स्वच्छ निर्मल तुम्हारी ज्योति का ध्यान करना चाहिए। वह तेजपुञ्ज (ज्योति) करोड़ों सूर्य के समान तीव्र होने पर भी करोड़ों चन्द्रमाओं के समान शीतल (आनन्ददायक) है। उसके ऊपर स्वप्रकाशमान मान महाकाल भारी गिरि शिखरवत् स्थित हैं। समय-समय पर बार-बार इस प्रकार ध्यान करते हुए धैर्यपूर्वक इस ध्यान स्वरूप को चित्त में स्थिर करने का प्रयत्न करना चाहिए। ध्यान की स्थिरता हो जाने पर साधक शून्य गृह में, खुले प्राङ्गण (आंगन अथवा मैदान) में, चौराहे पर, पर्वत शिखर पर, बाजार में अथवा घरों में जहाँ भी उसकी रुचि हो ध्यान करे।

।।साधने हेतोः स्वीकार्यता तस्य नामानि च।।

किन्तु देवि बिना हेतुं चेतः कस्मात् प्रसीदति।
अन्तःशुद्धिर्मनःशुद्धिर्हेतुशून्या कथं भवेत्।।२५४।।
नाचारे हरति प्रीतिर्विगीते नास्ति मे रुचिः।
ततो हेतुं समाधाय सुगोप्यं जपमाचरेत्।।२५५
सुरा हेतुः कारणं च परमामृतमेव च।
ज्ञानदा शुभदा तीर्थं मदिरा मोदिनी सती।।२५६।।
शुण्डा प्रबहुकुल्याङ्गा पावनी तारिणीति च।
तव नामानि गोप्यानि जानीहि कुलभैरवि।।२५७।।
तत्स्वरूपां मदोन्मत्ता मदिरां शङ्खभूषणाम्।
ध्यायेत् प्रतिमुखीं स्मेरस्वप(सुद)तीं शुभदां शुभाम्।।
न च मे त्वापभाषेथा सदा शान्तन चेतसा।
भिक्षुत्वं राजता वापि तवाश्रया युगे युगे।।२५९।।
हेतुशून्या क्रिया नष्टा नान्तःशुद्धिर्नवा सुखम्।
देहं व्यर्थं विजानीहि देवि त्वत्साधनं बिना।।२६०।।
साधनं हि वृथा देवि हेतुवादं तथा शृणु।
भैरवैर्हेतुपतिभिर्मार्गैः सेव्यं च शङ्करि।।२६१।।
मिलित्वा पर्वतेऽरण्ये यो वै संयमितात्मना।
एकाकी नैव मद्यान्नं स्त्रीभिः(?) स्तोत्रं सुवर्णितम्।।२६२।।
पञ्चभिर्दशभिर्वापि जापकस्य सुसंयुतम्।
समभावे जपेद् देवि नियतं द्वित्रिकैः सह।।२६३।।
किञ्चिद्ध्यानेन तत्सर्वं न द्विधा किञ्चिदीरितम्।
स्मृत्वा ततं ब्रह्ममयं भ्रान्तिरत्र न जायते।।२६४।।

स्वीकृत्य त्वमपि ध्यायेस्तदा द्रक्ष्यसि सुन्दरि।
एवं ध्यात्वा महेशानि प्रसन्नं यदि मे मनः॥२६५॥

अग्निदेवता के शरीर का वर्ण बन्धूक पुष्प तथा अत्यधिक तप्त किये हुए स्वर्ण के समान है। विशाल भुजाओं तथा दो मुख वाले अग्नि देव कमल पर स्थित हैं। इनका शरीर (अथवा हाथ) सप्त छन्दमय है। इनके तीन पैर हैं। ये अग्निदेव तीन प्रकार के शरीर धारण करके रहते हैं। जिनके नाम हैं- आहवनीय अग्नि, दक्षिणाग्नि तथा गार्हपत्याग्नि। हव्य, कव्य तथा वैवाहिक कर्म में क्रमशः इनका विनियोग किया जाता है। यज्ञ कर्म में सहायक रूप ब्रह्मा, अध्वर्य, उद्गाता तथा होता ही इन अग्नि देव के चार श्रृङ्ग (सींग) हैं। पञ्चरात्र, पाशुपत, कपिलमत (सांख्य मत), महामत (शाक्तमत-कौल मत), बौद्ध मत तथा वैदिक मत ही इनके पिङ्गल (भूरे अथवा पीत) वर्ण वाले छः नेत्र हैं। वेदार्थ (चारों वेद के अर्थ) ही इनके चतुष्कर्ण (चार कान) हैं। श्रुत्यनुकूल शास्त्र ही इनकी ध्वनि है। शिर पर बंधी हुई लाल रंग की जटायें मुकुट की भाँति शोभायमान (प्रकाशमान) हैं। शरीर पर स्वर्णरचित आभूषण तथा कानों में स्वर्ण कुण्डल धारण किये हुए हैं। ये लाल कमल के मध्य स्थित स्वस्तिका कार आसन पर विराजमान हैं। इनका तृतीय चरण कमल पृष्ठ भाग पर स्थित है। ये अपने ही दिव्य तेज से प्रज्वलित ईधन के समान प्रतीत हो रहे हैं तथा निरन्तर ध्वनि कर रहे हैं। सप्तभुजाधारी इन अग्निदेव के दाहिने चार हाथों में शक्ति, वज्र, स्रुक तथा स्रुवा तथा बायी ओर के तीन हाथों में तोमर (भाला), तालवृन्त (ताड़ का पंखा) तथा स्वर्ण रचित घृत पात्र गृहीत है तथा ये लाल वस्त्र धारण किए हुए हैं। इनके दाहिने मुख में हिरण्या, कनका (गगना), रक्ता तथा कृष्णा नाम वाली जिह्वायें तथा वाम मुख में सुप्रभा, अतिरिक्ता एवं बहुरूपा नाम वाली जिह्वाएं स्थित है। इन सात जिह्वाओं से व्याप्त इनका लाल वर्ण वाला दोनों मुख खुला हुआ सा रहता है। इस प्रकार चारों पुरुषार्थों को देने वाले महान अग्नि देव का ध्यान करना चाहिए।

अग्नि का पूजन करने के पश्चात् षडङ्ग न्यास (पूजन) करें। यथा-

ॐ सहस्रार्चिषे हृदयाय नमः - (आग्नेये)। **ॐ स्वस्ति पूर्णाय शिरसे स्वाहा** - (ईशाने)। **ॐ उत्तिष्ठ पुरुषाय शिखायै वषट्** - (नैर्ऋत्यै)। **ॐ धूम्रव्यापिने कवचाय हुं** - (वायव्ये)। **ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट्** - (मध्ये)। **ॐ धनुर्धराय अस्त्राय फट्** - (चतुर्दिक्षु)।

॥ अग्नेः सप्तजिह्वाष्टमातृकादि पूजनम्॥

सप्त जिह्वाः प्रपूज्याथ पूर्वादिदिक्षु सुन्दरि।
ब्राह्म्याद्याः पूजयेद् देवि स्वकर्मसिद्धये प्रिये॥९२॥

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा चैव सुन्दरि॥९३॥
महालक्ष्मीर्महेशानि पूजयेत् परमेश्वरि।
बहिर्देशे पुनर्लक्ष्मीस्तथा चैव सरस्वती॥९४॥
रति प्रीतिश्च कीर्तिश्च शान्तिः पुष्टिश्च सुन्दरि।
तुष्टिश्चैव महेशानि बहिर्देशे प्रपूजयेत॥९५॥
मेखलासु महेशानि ब्रह्माणं पूजयेत सुधीः।
मेखलासु च सर्वासु वेष्टयेद् दर्भसंकुलैः॥९६॥

हे देवि! सुन्दरि! अग्नि का षडङ्ग पूजन करने के पश्चात् उसकी सप्त जिह्वाओं का यथाविधि पूजन करना चाहिए। (तदुपरान्त पूर्वोक्त अग्नि की अष्ट मूर्तियों का पूजन करना चाहिए।) इसके बाद स्वकार्य सिद्धि के लिए पूर्वादि क्रम से ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा तथा महालक्ष्मी नाम वाली अष्टमातृकाओं का पूजन करना चाहिए। तदुपरान्त कुण्ड के बाहर लक्ष्मी, सरस्वती, रति, प्रीति, कीर्ति, शान्ति, पुष्टि तथा तुष्टि संज्ञका शक्तियों का पूजन करना चाहिए। (तत्पश्चात् मेखला पर बिछे कुशों पर पूर्वादि क्रम से इन्द्रादि देवताओं तथा उनके आयुधों का पूजन करना चाहिये।) इसके पश्चात् सभी मेखलाओं पर (त्रिमेखलात्मक कुण्ड में मध्य मेखला पर ही कुशों द्वारा परिस्तरण का विधान उपलब्ध होता है) कुशों द्वारा परिस्तरण करना चाहिए। मेखला के दक्षिणोत्तर भाग पर पूर्वाग्र तथा पूर्व-पश्चिम भाग पर (उत्तराग्र) कुश बिछाना चाहिए तथा कुश का मूल (जड़) भाग अग्रभाग से आच्छादित रखना चाहिए। (इसके पश्चात् पलाश आदि वृक्ष की हस्तमात्र मान की परिधियों को कुशों सहित, पूर्व दिशा को छोड़कर दक्षिण-उत्तर तथा पश्चिम दिशा में मेखलाओं पर स्थापित करना चाहिए।) इसके पश्चात् प्रदक्षिणावत् -

ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ ज्येष्ठायै नमः।

से उन पर पूजन करना चाहिए।

[इसके बाद सभी मेखलाओं पर पूर्वादि क्रम से - **ॐ वामायै नमः। ॐ ज्येष्ठायै नमः। ॐ रौद्र्यै नमः। ॐ अम्बिकायै नमः।** से पूजन करना चाहिए। कुशों का परिस्तरण मेखलाओं का पूजनादि अग्नि के आवाहन से पूर्व ही कर लिये जाते हैं।]

॥ स्रुक-स्रुवाज्याग्न्यादि संस्कारम्॥

त्रिपंक्त्याचरितं कुण्डं ततो व्याहृतिभिर्हुनेत्।
त्रिः प्रताप्य महेशानि स्रुवं च प्रोक्षयेज्जलैः॥९७॥

वामदक्षिणहस्ताभ्यां पुनः प्रताप्य सुन्दरि।
दक्षिणे परमेशानि स्थापयेच्च स्रुवसुचौ॥९८॥
अस्त्रमन्त्रेण देवेशि आज्यपात्रस्य प्रोक्षणम्।
ततः पवित्रं तस्मिन् वै क्षिप्त्वा वह्नौ च निक्षिपेत्॥९९॥
स्रुवेण परमेशानि हृदन्तेन महेश्वरि।
तत्पात्रादाज्यमानीय हुनेद्वह्नौ महेश्वरि॥१००॥
अग्नये च महेशानि सोमाय च ततः परम्।
अग्नीषोमपदौ ङेन्तौ वह्निजायावधिः प्रिये॥१०१॥
वामदक्षिणमध्यात् तु गृहणीयाद् आज्यमुत्तमम्।
अग्नये स्विष्टकृते स्वाहा हुनेत् सुरगणार्चिते॥१०२॥
मायाबीजं महेशानि हृदन्तेन महेश्वरि।
गर्भाधानादिकं कर्म कल्पयामि महेश्वरि॥१०३॥
सप्तसप्ताहुतीर्दद्यादन्येषां परमेश्वरि।
विवाहान्तं कर्मगणं प्रोच्य संस्कारमाचरेत्॥१०४॥

इसके पश्चात् साधक को पात्रासादन करना चाहिए। इसके लिए अपने वाम भाग में पूर्वाग्र दर्भ बिछाकर उस पर 'फट्' से प्रक्षालित स्रुक-स्रुव, प्रोक्षणी, प्रणीता आज्यस्थाली, चरुस्थाली आदि पात्रों को अधोमुख रखना चाहिए। तत्पश्चात् पवित्री द्वारा इनको सीधा कर, प्रक्षालित करके पूर्व स्थापित सामान्य अर्घ्य जल से प्रोक्षण करना चाहिए।

तत्पश्चात् 'नमः' मन्त्र से प्रोक्षणी पात्र में जल भरकर उसे आधार पर रखकर आधार, पात्र तथा जल में क्रमशः अग्नि-सूर्य-चन्द्र कलाओं का पूजन, जल में तीर्थों का आवाहन, संरक्षण, अवगुण्ठन, गन्धपुष्पादि निःक्षेपण, प्रणव से अभिमन्त्रण, अमृतीकरण आदि करके प्रणीतापात्र में भी शुद्ध जल भरकर उसमें गन्धपुष्पादि निःक्षेप कर उसमें से थोड़ा जल प्रोक्षणीपात्र में डालकर उस जल से मूल मन्त्र तथा 'नमः' द्वारा याग-द्रव्यों का प्रोक्षण करना चाहिए। इन सब क्रियाओं के सम्यक् ज्ञान के लिए अन्य ग्रन्थों का अवलोकन करना चाहिए।

[यहाँ व्याहृतियों द्वारा हवन की बात कही गयी है। बिना स्रुक-स्रुवा, आज्य तथा अग्नि का संस्कार किये हवन करना विधि के विपरीत है। मूल ग्रन्थ में इसी प्रकार अनेकों क्रियायें क्रम बद्धता से रहित, अपूर्ण, अशुद्ध तथा अस्पष्ट वर्णित है। जहाँ तक सम्भव हो सका है ग्रन्थ में कथित क्रियाओं-प्रयोगों, मन्त्रों आदि को शुद्ध तथा स्पष्ट लिखने का प्रयत्न किया गया है।]

अब सबसे पहले स्रुक-स्रुव का संस्कार करे। दोनों हाथों में स्रुक तथा स्रुव को ऊर्ध्व मुख लेकर फिर उसे अधोमुख करके अग्नि में तीन बार तपायें। तदुपरान्त दोनों को बायें हाथ में लेकर, दाहिने हाथ में दर्भ लेकर, दर्भ के अग्रभाग, मूलभाग तथा मध्य भाग द्वारा क्रमशः स्रुक-स्रुव के अग्र, मूल तथा मध्य भाग का शोधन करे। इसके पश्चात् सामान्य-अर्घ्य जल तथा प्रोक्षणी पात्र के जल से स्रुक-स्रुव प्रोक्षण कर पुनः अग्नि में तप्त कर उन्हें अपने दाहिनी ओर बिछे हुए कुशों पर स्थापित कर दें तथा शोधनार्थ गृहीत कुशों को अग्नि में डाल दें।

इसके बाद आज्य संस्कार करें। **'फट्'** मन्त्र से आज्यस्थाली का प्रोक्षण कर उसमें आज्य (पिघला हुआ घृत) लेकर **'मूलमन्त्र'** से **'वीक्षण'**, **'अस्त्राय फट्'** से प्रोक्षण, इसी मन्त्र से दर्भों द्वारा 'संताड़न' तथा **'हुं'** से अर्घ्य जल से 'अभ्युक्षण' इन चारों संस्कारों को करके कुण्ड से कुछ अङ्गारों को निकालकर उन्हें वायव्य कोण में रखकर उसके ऊपर **'नमः'** मन्त्र से आज्य स्थाली रखकर 'तापन' करे तत्पश्चात् दो दर्भ लेकर उसे जलाकर (प्रज्वलित) कर) आज्य में डालकर तथा जलने से बचे हुए शेष भाग को **'नमः'** बोलकर अग्नि में डाल दें। यह 'पवित्रीकरण' संस्कार है। इसके पश्चात् दो दर्भ प्रज्वलित करके उसके द्वारा **'हुं'** का उच्चारण करते हुए आज्य का नीराजन करके उसे अग्नि में डाल दें, यह 'अभिद्योतन' संस्कार है। पुनः प्रज्वलित कुशमुष्टि लेकर 'अस्त्राय फट्' बोलते हुए आज्य के सम्मुख प्रदर्शित कर कुशों को अग्नि कमें डाल दें, यह 'उद्योतन' है।

इसके बाद अङ्गारों पर से आज्यस्थाली उठाकर स्वसम्मुख रखकर उन अङ्गारों को अग्नि में डाल दे तथा अङ्गार स्थल का मार्जन करके हाथ धो लें। तदुपरान्त दोनों हाथों को उत्तान करके अंगुष्ठ तथा कनिष्ठा के पास प्रादेश मात्र पृथक-पृथक पवित्री को रखकर **'अस्त्राय फट्'** बोलते हुए अग्नि के सम्मुख आज्य का उत्प्लवन करें। इसके बाद पवित्री को अलग स्थान पर रखकर पुनः उसी प्रकार दो दर्भों को लेकर उन दोनों दर्भों के द्वारा 'नमः' का उच्चारण करते हुए अपने सम्मुख घृत का सम्प्लावन करें, फिर पहले की दोनों पवित्री तथा इन दोनों पवित्रियों (दर्भों) को अग्नि में डाल दें। इस 'उत्प्लवन-सम्प्लवन' क्रिया को 'प्लावन संस्कार' कहा जाता है।

इसके उपरान्त प्रादेश मात्र ग्रन्थियुक्त दो दर्भों को आज्यस्थाली में घृत के मध्य डालकर, आज्य के दक्षिण भाग की शुक्ल पक्ष तथा वाम भाग की

कृष्ण पक्ष रुप भावना कर बायीं ओर इडा, दाहिनी ओर पिङ्गला तथा मध्य में सुषुम्ना का ध्यान करके होम करें। यथा –

'नमः' बोलते हुए स्रुव द्वारा दक्षिण भाग से घृत लेकर –

'ॐ अग्नये स्वाहा अग्नये इदं नमः' बोलकर अग्नि के दक्षिण नेत्र में आहुति डाले तथा सम्पात आज्य को आज्यस्थाली के दक्षिण भाग में ही निक्षेप करें। पुनः –

'नमः' बोलकर वाम भाग से स्रुव द्वारा आज्य ग्रहण करके–

'ॐ सोमाय नमः सोमाय इदं नमः' से अग्नि वाम नेत्र में आहुति डालें। सम्पात आज्य को बायी ओर स्थापित करें। पुनः इसी प्रकार मध्य भाग से आज्य लेकर–

'ॐ अग्निषोमाभ्यां स्वाहा अग्निषोमाभ्यां इदं नमः' बोलकर अग्नि के ललाटस्थ नेत्र में हवन करें तथा सम्पात आज्य को मध्य भाग में डालें। पुनः–

'नमः' बोलकर दक्षिण भाग से आज्य लेकर –

'ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं नमः' बोलकर अग्नि के मुख में हवन करें। ('स्वाहा' बोलते समय 'स्वा' उच्चारण के साथ आहुति डालें तथा 'हा' उच्चारण के साथ घृत का सम्पात करें। सम्पात का तात्पर्य है आहुति के पश्चात् स्रुव से टपकने वाले आज्य को निर्दिष्ट पात्र व स्थान में गिराना।)

इसके पश्चात् प्रणव रहित व्यस्त–समस्त व्याहृतियों से पाँच आहुतियाँ अग्नि में दें। यथा –

ॐ स्वाहा, भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा, ॐ भूर्भुवः स्वः स्वाहा। तत्पश्चात्–

'ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा' इस अग्निमन्त्र से तीन बार आहुति देकर अग्नि के गर्भाधान से लेकर विवाह पर्यन्त संस्कार करें।

'ह्रीं अग्नेर्गर्भाधानं कल्पयामि नमः स्वाहा' इस प्रकार प्रत्येक संस्कार मंत्र बोलते हुए, प्रत्येक संस्कार के लिए आठ–आठ आहुतियों से हवन करें। इसके बाद घृत से भीगी हुई मूल तथा अग्रभाग वाली समिधा लेकर –

'ॐ ह्रीं वागीश वागीश्वरीभ्यां स्वाहा' मन्त्र से तीन बार हवन करें।

इसके बाद अग्नि के पितरों (माता–पिता रूप) वागीश–वागेश्वरी का पञ्चोपचार पूजन–प्रणाम कर अपने हृदय में उद्वासित कर लें।

(इसके अनन्तर अग्नि की जिह्वाओं, अङ्ग मन्त्रों, अग्नि मूर्तियों, लोकपालों तथा उनके अस्त्रों आदि के लिए भी समन्त्र आहुतियाँ दी जाती

हैं। पुनः महागणपति मन्त्र को दशधा विभक्त कर हवन का विधान है। इसके लिए अन्य ग्रन्थों का अवलोकन करें।)

॥ अग्नौ देवी पूजनं हवन-विधिश्च॥

तस्मिन्नग्नौ महेशानि देवीं संपूजयेन्नरः।
तद्वह्नेरात्मना चैक्यं विभाव्य परिकल्पयेत्॥१०५॥
ततश्च मूलमन्त्रेण जुहुयात् षोडशाहुतीः।
सतिलैश्च त्रिमध्वक्तैः सरक्तैः करवीरकैः॥१०६॥
अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तथा।
जुहुयाद् मूलमन्त्रेण महादेव्यै महेश्वरि॥१०७॥
पृथक् कृत्वा महेशानि हुनेदावरणादिकम्।
प्रणवं पूर्वमुच्चार्य अग्नये चैतदेव हि॥१०८॥
पृथिव्यै चैव महते स्वाहान्तोऽयं मनुः स्मृतः।
भुवश्च वायवे चैव अन्तरिक्षाय चैव हि॥१०९॥
दिवे चैव महेशानि वह्निजायावधिर्मनुः।
स्वर्गाय चैव सूर्याय तथा चन्द्रमसे प्रिये॥११०॥
नक्षत्रेभ्यो महेशानि वह्निजायावधिर्मनुः।
तदन्ते महतीं पूर्वां (जा) कुर्यात् चैव वरानने॥१११॥
तद्वह्निं रक्षयेद् धीमान् यथाशक्ति विधानतः।
न्युब्जेन पाणिना देवि होमयेत् सुरवन्दिते॥११२॥
उत्तानेनैव हस्तेन यदि होमं करोति च।
तदा तज्जनितं पुण्यं न भवेत् परमेश्वरि॥११३॥
इति ते कथितं दिव्यं कुण्डादीनां निरूपणम्।
प्रयत्नात् परमेशानि कर्तव्यं होमकर्मणि॥११४॥

इसके पश्चात् उस अग्नि में देवी की पूजा करके अग्नि तथा स्वात्मा के एकत्व की भावना करे। तत्पश्चात् मूल मन्त्र बोलते हुए आज्य द्वारा सोलह आहुतियाँ प्रदान करें। इसके बाद त्रिमधु युक्त (मधु, शकर तथा घृत, किसी-किसी ग्रन्थ में घृत के स्थान पर दूध का उल्लेख है) तिल तथा लाल करवीर (कनेर) पुष्पों के मिश्रण से मूल मन्त्र द्वारा एक हजार आठ या एक सौ आठ बार हवन करे। तदुपरान्त पृथक-पृथक आवरण देवताओं के लिए भी हवन करें। पुनः अग्नये, पृथिव्यै, महते, भुवाय, वायवे, अन्तरिक्षाय, दिवे, स्वर्गाय, सूर्याय, चन्द्रमसे तथा नक्षत्रेभ्य

शब्दों से पूर्व 'ॐ' तथा पश्चात् में 'स्वाहा' जोड़कर अग्नि, पृथ्वी आदि देवताओं के लिए एक-एक आहुतियों से हवन करें। इसके बाद पुनः देवी की विशेष रूप से विस्तृत पूजा करके उस अग्नि का विधिवत् यत्न सहित संरक्षण करे। हवन के समय आहुति डालते समय हाथ आगे की ओर झुका होना चाहिए। हे परमेश्वरि! यदि साधक उत्तान (ऊपर उठे) हाथों से हवन करता है तो उस कर्म से पुण्य की उत्पत्ति नहीं होती है। हे देवि! इस प्रकार मैंने तुमसे यह कुण्ड आदि के विषय में शास्त्रीय विधानों का निरूपण किया, इसे प्रयत्नपूर्वक भली-भाँति जानकर उसी के अनुसार ही हवन-कार्य का सम्पादन करना चाहिए।

।। माघ-मासि शुक्ल पक्षे सप्तमी तिथौ देव्याः पूजनम्।।

अथ वक्ष्ये महेशानि सावधानावधारय।
माघे मासि सिते पक्षे सप्तमी या तिथिर्भवेत्।।११५।।
तस्यां रात्रौ महादेवीं पूजयेत् परमेश्वरीम्।
चतुर्भुजां महारौद्रीं श्मशानालयवासिनीम्।।११६।।
मुण्डाभयखड्गवरान् दधतीं परमेश्वरीम्।
मुण्डमालासमाकीर्णां लोचनत्रयसंयुताम्।।११७।।
गते तु प्रथमे यामे तृतीयप्रहरावधि।
पूजयेत् परमेशानीं महाविभवविस्तरैः।।११८।।
पूर्वोक्तपूजया देवि पूजयेत् कालरात्रिकाम्।
सहस्रस्य प्रमाणेन जपं कुर्यात् शुचिस्मिते।।११९।।
होमयेत् परमेशानि पूर्वोक्तेन महेश्वरि।
नैवेद्यं परमं देवि भ्रष्टद्रव्यादिकं प्रिये।।१२०।।
दद्यात् प्रियतरं वस्तु महामायाप्रियंकरम्।
अकुर्वन् निरयं याति सत्यं सत्यं महेश्वरि।।१२१।।

हे महेशानि! अब मैं एक और पूजन-प्रसङ्ग को कहता हूँ, सावधान होकर सुनो। माघ मास के शुक्ल पक्ष की सप्तमी तिथि की रात्रि में परमेश्वरी महादेवी की पूजा करनी चाहिए। पूजा से पहले देवी का (इस प्रकार) ध्यान करना चाहिए।

श्मशान भूमि में निवास करने वाली देवी चतुर्भुजा हैं। देखने में वह (रौद्री) क्रोध से भरी हुई भयानक प्रतीत होती हैं। हाथों में नरमुण्ड, अभय, खड्ग तथा वर (मुद्रा) धारण की हुई हैं। शरीर पर (गले में) नरमुण्डों की माला धारण की हुई तथा तीन नेत्रों वाली हैं। रात्रि का प्रथम प्रहर व्यतीत हो

जाने पर दूसरे से तीसरे प्रहर तक परमेश्वरी की महदैश्वर्य युक्त विस्तार पूर्वक अर्चना करनी चाहिए। हे देवि! पूर्व में कथित विधि के अनुसार कालरात्रि (महाकाली) का पूजन करके एक हजार जप करना चाहिए। तत्पश्चात् पूर्वोक्त विधि से हवन करना चाहिए। नैवेद्य के रूप में देवी को भुने हुए अनेकों प्रकार के पदार्थ (मद्य सहित) प्रदान करना चाहिए। इसके अतिरिक्त और भी जो कुछ महामायाके लिए प्रीतिकर पदार्थ कहे गये हैं, उन्हें भी अर्पित करना चाहिए। हे देवि! जो शाक्त साधक इस पूजन को नहीं करता वह नरक में जाता है। मेरा यह कहना, हे महेश्वरि! पूर्णतः सत्य है।

।। सन्ध्योपसनादि निरूपणम्।।

अथ ते कथयिष्यामि सन्ध्योपासनकं विधिम्।
आचम्य प्राङ्मुखो भूत्वा दिवसे परमेश्वरि॥१२२॥
रात्रौ उदङ्मुखः कुर्याद् आह्निकं प्रियमुत्तमम्।
अन्येषां पापराशीनां नाशकं विद्धि पार्वति॥१२३॥
भ्रूणहत्या सुरापानं सुवर्णहरणं तथा।
गुरुदाराभिगमनं यच्चान्यद् दुष्कृतं कृतम्॥१२४॥
सर्वमेतत् पुनातीयं महाभैरवरूपधृत्।
द्विभुजां पीतवसनां नानालङ्कारभूषिताम्॥१२५॥
रक्तवर्णां कृशाङ्गी च त्रिवलीवलयोज्ज्वलाम्।
पुस्तकं परमं दिव्यं दक्षिणे विभ्रतीं शुभाम्॥१२६॥
शिक्षासूत्रं तथा वामे विभ्रतीं नयनत्रयाम्।
कौशेयवसनां चापि देवीं सन्ध्यां विभावयेत्॥१२७॥
इति ते कथितं दिव्यं ध्यानं सुरगणार्चिते।
ध्यात्वा सन्ध्यां विशेषेण सर्वपापक्षयो भवेत्॥१२८॥

अब मैं सन्ध्योपासना विधि को कहता हूँ। हे परमेश्वरी! दिन में पूर्वमुख तथा रात्रि में उत्तर मुख आसन पर बैठकर आचमन करके आह्निक (दैनिक सन्ध्योपासनादि) कर्म करना चाहिए। हे पार्वति! इस कर्म को अन्य (पूर्व-पूर्व) जन्मों के पाप राशियों को (भी) नष्ट करने वाला जानना चाहिए। भ्रूण हत्या, सुरापान, स्वर्ण चोरी, गुरु पत्नी गमन जैसे महापाप तथा अन्य भी अनेकों प्रकार के दुष्कर्म जनित पापों से यह आह्निक कर्म, महाभैरव रूप धारण करके साधक को मुक्त कर, उसे पवित्र कर देता है।

सन्ध्या-कर्म के समय परमेश्वरी का ध्यान इस प्रकार करना चाहिए।

देवी का शरीर पतला (क्षीण) तथा रक्त वर्ण है। ये रेशमी पीला वस्त्र धारण की हुई है। शरीराङ्ग विविध प्रकार के आभूषणों से यथोचित भूषित है। इनकी दो भुजाएं हैं, दायीं भुजा में पुस्तक तथा बांये हाथ में शिक्षासूत्र लिए हुए है। इनके तीन नेत्र हैं तथा उदर पर आभामय त्रिवली शोभित हैं। इस प्रकार सन्ध्या देवी की भावना (ध्यान) करनी चाहिए। हे देवि! सुरगणार्चिते! मैंने सन्ध्या देवी के जिस दिव्य ध्यान का तुमसे वर्णन किया है, सन्ध्या करते समय उसका विशेष रूप से ध्यान करने से सभी पापों का नाश हो जाता है।

।। अभिषेकाघमर्षणार्घ्यादि निरूपणम्।।

आचमनं तथा वापि तीर्थस्यावाहनं ततः।
प्राणायामं षडङ्गस्य न्यासमुत्तमकं ततः।।१२९।।
हस्ततले जलं नीत्वा मन्त्रमुच्चार्य पञ्चधा।
गलितोदकतो देवि मूर्धानमभिषेचयेत्।।१३०।।
तज्जलं दक्षिणे हस्ते आदाय परमेश्वरि।
तेजोरूपं तज्जलं तु कर्षयेद् इडया प्रिये।।१३१।।
प्रक्षाल्य पापं देहान्तः रेचयेत् पिङ्गलान्तरात्।
हस्तस्य क्षालनं कुर्याद् अर्घ्यं सूर्याय दापयेत्।।१३२।।
महादेव्यै त्रिरावृत्या चार्घ्यं दद्यात् सुरेश्वरि।
गायत्रीं ध्यानसंयुक्तां प्रजपेत् तदनन्तरम्।।१३३।।
ततो देवान् प्रतर्प्यैव इष्टदेवं त्रिः तर्पयेत्।
जपं समर्प्य देवेशि मूलमन्त्रं जपेत् ततः।।१३४।।
अष्टोत्तरशतावृत्त्या प्रजप्य मन्त्रमुत्तमम्।
ततो जपं समर्प्यैवं प्रणमेद् दण्डवद् भुवि।।१३५।।
प्राणायामं षडङ्गं च कुर्याच्चान्ते महेश्वरि।
अमावस्या पौर्णमासी श्राद्धीयदिवसे तथा।।१३६।।
संक्रान्तौ परमेशानी सन्ध्यां चैव समाचरेत्।
चतुर्विधानि कर्माणि देवका(ष्टे?र्ये)षु पार्वति।।१३७।।
आगमं नु तथा विद्धि यतो नित्यागमक्रिया।
सन्ध्यां सायन्तनीं कुर्याद् द्वादश्यादिष्वपि प्रिये।।१३८।।
अकुर्वन् निरयं याति एकमेव हि मद्वचः।
इति ते कथितं दिव्यमाह्निकाचारमुत्तमम्।।१३९।।

साधक पूर्वमुख (प्रातः सन्ध्या में) आसन पर बैठकर मूल मन्त्र से

तीन बार आचमन करके (शिखा बांधकर) किसी पात्र में शुद्ध जल लेकर उसमें तीर्थों का आवाहन, धेनुमुद्रा से अमृतीकरणादि करके मूल मन्त्र से सात बार अभिमन्त्रित करें। तत्पश्चात् मूलमन्त्र से प्राणायाम कर-षडङ्ग न्यासादि करके उस जल में से थोड़ा जल दाहिने हाथ में लेकर 'हं यं वं लं रं' इन पञ्च भूतात्मक बीजों से सात बार तथा मूल मन्त्र से सात (पाँच) बार अभिमन्त्रित करके फिर उस जल को बांये हाथ में लेकर उसके गिरते हुए बिन्दुओं से दाहिने हाथ द्वारा मूल मन्त्र का उच्चारण करते हुए शिर पर प्रोक्षण (अभिषेचन) करें। पुनः अवशेष जल को दाहिने हाथ में लेकर वाम नासिका के पास लाकर धीरे से अन्दर की ओर खींचे। तत्पश्चात् उस तेजो रूप जल द्वारा अन्तर में प्रविष्ट होकर सभी मलों को शोधित कर दिया गया है तथा कृष्ण वर्ण होकर वह दक्ष नासापुट से निर्गत हो रहा है, ऐसी भावना करके दक्षहस्तगत उस जल को अपनी बायीं ओर कल्पित वज्रशिला पर 'फट्' बोलते हुए पटक दें। इसके बाद हाथ धोकर आचमन करके **"ॐ ह्रां ह्रीं (हं) सः सग्रहराशिनक्षत्र योगकरण परिवृतासनास्थित सूर्याय एष तेऽर्घः स्वाहा"** इस मन्त्र से सूर्य को अर्घ्य देकर पुनः सूर्य मण्डल में स्वेष्ट देवता देवी को स्थित मान कर उसकी गायत्री (काली गायत्री, तारा गायत्री आदि) अथवा मूल मन्त्र से तीन बार अर्घ्य प्रदान करें। इसके बाद अङ्ग देवताओं (आवरण देवताओं) का एक-एक बार तर्पण करके तीन बार मूल मन्त्र के पश्चात् 'अमुकीं' तर्पयामि (यथा कालीं तर्पयामि) जोड़कर देवी का तर्पण (वाम कर से) करें। तदुपरान्त अट्ठाईस बार ध्यान सहित देवता-गायत्री का जप करके देवता को जप समर्पित करें। पुनः मूल मन्त्र का एक सौ आठ बार जप करके उसे भी देवी को अर्पित कर दें। इसके बाद पृथ्वी पर लेटकर दण्डवत् प्रणाम करें। जपआदि के बाद पुनः प्राणायाम षडङ्ग न्यासादि करना चाहिए।

अमावस्या, पूर्णमासी, श्राद्ध-दिन तथा सूर्य संक्रान्ति के दिन, धर्म, अर्थ, काम एवं मोक्ष हेतु कर्म काल में, देव कार्यों के समय तथा द्वादशी तिथि में भी प्रातः सन्ध्या के साथ ही सायं सन्ध्या भी करनी चाहिए। आगम (तन्त्र) ग्रन्थों में संध्या कर्म नित्य कर्म रूप से कहा गया है, अतः इन ग्रन्थों के द्वारा विधिवत् इनका ज्ञान प्राप्त करके अनिवार्य रूप से सन्ध्या क्रिया करनी चाहिए। जो व्यक्ति इसे नहीं करता उसे नरक की प्राप्ति होती है। इसके लिए मेरा एक बार ही कहना पर्याप्त है। हे देवि! इस प्रकार मैंने तुमसे उत्तम आह्निक आचार के विषय में सम्यक रूप से वर्णन किया।

।। संक्षिप्त-पूजन-विधि-निरूपणम्।।

त्रि:सन्ध्यां परमेशानि कुर्यात् साधकसत्तमः।
नास्ति यस्यादरस्तत्र न स ब्राह्मण उच्यते।।१४०।।
क्रुद्धा भगवती तस्य कामान् इष्टान् निहन्ति वै।
संक्षेपेणैव देवेशि शृणु पूजाविधिं शिवे।।१४१।।
आदौ ऋष्यादिविन्यासः करशुद्धिस्ततः परम्।
अङ्गुलीव्यापकन्यासौ हृदादिन्यास एव च।।१४२।।
तालत्रयं च दिग्बन्धनः प्राणायामस्ततः परम्।
ध्यानं पूजा जपश्चैतत् सर्वतन्त्रेष्वयं क्रमः।।१४३।।
बलिदानं तथा कार्यं यथावत् तन्त्रवेदिभिः।
पूजयेद् भैरवं दुर्गा तथा चैव महेश्वरीम्।।१४४।।
वृषभं नन्दिनं चैव अतियत्नेन पूजयेत्।
महाकालं यजेद् धीमान् सर्वागमविशारदः।।१४५।।
चक्रराजं पूजयित्वा सर्वसिद्धीश्वरो भवेत्।
आदौ लिङ्गं महादेवं पूजयेद् यत्नतः शिवे।।१४६।।
तस्मिंश्चैव हि समये स्वेष्टदेवं प्रपूजयेत्।
तस्माद् निर्माल्यपुष्पं च गृह्णीयाद् भक्तिभावतः।
इष्टपूजां बिना लिङ्गनिर्माल्यं च निषिध्यते।।१४७।।

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे (कालीध्यानादिपूजा-कुण्डमेखलायोनिनिर्णय-अग्निकार्यादिनिरूपणं)
सप्तदशः पटलः।।१७।।

ब्राह्मण को तथा श्रेष्ठ साधक को भी यथा सम्भव त्रिकाल (प्रातः, मध्याहन तथा सायं) सन्ध्या करनी चाहिए। जिसके मन में इसके प्रति आदर (श्रद्धा) का भाव नहीं है, अर्थात् जो आलस्य, अनादर अथवा प्रमाद वश इस सन्ध्या कर्म को नहीं करता, वह ब्राह्मण (साथ ही साधक भी) कहलाने का अधिकारी नहीं है। ऐसे साधक पर भगवती क्रोधित होकर उसके सभी भोगों को (पूर्वार्जित पुण्यफलों सहित) नष्ट कर देती है। अतः साधक को भगवती की प्रसन्नता तथा अपने कल्याण हेतु इस सन्ध्या कर्म को अवश्य ही करना चाहिए।

हे शिवे! अब मैं संक्षेप में सारी पूजन विधि को (पुनः) तुमसे कहता हूँ।

साधक विधिवत् शुद्धासन पर पूर्व अथवा उत्तर मुख (अथवा इष्ट देवी के सम्मुख) बैठकर आचमन-प्राणायामादि करके पूजन-जपादि का

सङ्कल्प कर विनियोग करके ऋष्यादि न्यास, कर-न्यास, हृदयादि (षडङ्ग) न्यास, व्यापक न्यास, करशुद्धि आदि करके तालत्रय द्वारा दिगबन्धन कर देवी का ध्यान करके पूजन करे। इसके पश्चात् मन्त्र का यथोचित जप करे। इसके बाद तन्त्र विधि का सम्यक् ज्ञान रखने वाले साधक द्वारा यथा विधि बलि देना चाहिए। देवी महेश्वरी के पूजन के साथ ही भैरव, दुर्गा, वृषभ रूप नन्दी तथा महाकाल का भी पूजन करना चाहिए। देवी (इष्ट देवता) के पूजन के पूर्व सम्भव हो तो अङ्ग देवताओं का भी पूजन करें। चक्रराज (पूजा-यन्त्र) का अर्चन करने वाला साधक सभी सिद्धियों का स्वामी हो जाता है। इष्ट देव के पूजन के समय पहले शिव लिङ्ग रूप महादेव का पूजन अवश्य करना चाहिए। उस शिव लिङ्ग के निर्माल्य को भी श्रद्धा-भक्ति पूर्ण चित्त से ग्रहण करना चाहिए। बिना इष्ट-देवता का पूजन किये शिव-निर्माल्य ग्रहण करना निषिद्ध (मना) है।

।। श्री बृहन्नील तन्त्र में भैरव-भैरवी संवाद के अन्तर्गत
काली-ध्यानादि पूजा-कुण्ड मेखला योनि निर्णय-अग्नि कार्यादि
निरूपण नामक सत्रहवें पटल की 'आशा-सुशीला' हिन्दी व्याख्या सम्पूर्ण हुई।।

◆

॥ अष्टदशः पटलः॥

(तारा सहस्रनाम - निरूपणम्)

॥ तारा-सहस्रनाम वर्णनाय निवेदनम्॥

श्रीदेव्युवाच

देवदेव महादेव सृष्टिस्थित्यन्तकारक।
प्रसङ्गेन महादेव्या विस्तरं कथितं मयि॥१॥
देव्या नीलसरस्वत्याः सहस्रं परमेश्वर।
नाम्नां श्रोतुं महेशान प्रसादः क्रियतां मयि।
कथयस्व महादेव मद्यहं तव वल्लभा॥२॥

इस संसार की सृष्टि-स्थिति (पालन) तथा संहार करने वाले हे देवाधिदेव! महादेव! आपने महादेवी तारा के वर्णन-प्रसङ्ग में उनके सहस्र नामों की चर्चा की थी। हे महेशान-महादेव! यदि मैं आपकी प्रियतमा होऊँ तो आप मुझ पर कृपा करें और देवी नील सरस्वती (तारा) के सहस्र नामों का मुझसे कथन करें। मुझे इन नामों को सुनने की बहुत ही उत्कण्ठा है।

॥तारासहस्रनाम्नः गोपनीयत्वं प्रकाशनाद् हानिश्च॥

श्रीभैरव उवाच

साधु पृष्टं महादेवि सर्वतन्त्रेषु गोपितम्।
नाम्नां सहस्रं तारायाः कथितुं नैव शक्यते॥३॥
प्रकाशात् सिद्धिहानिः स्यात् श्रिया च परिहीयते।
प्रकाशयति यो मोहात् षण्मासाद् मृत्युमाप्नुयात्॥४॥
अकथ्यं परमेशानि अकथ्यं चैव सुन्दरि।
क्षमस्व वरदे देवि यदि स्नेहोऽस्ति मां प्रति॥५॥
सर्वस्वं शृणु हे देवि सर्वागमविदां वरे।
धनसारं महादेवि गोप्तव्यं परमेश्वरि॥६॥
आयुर्गोप्यं गृहच्छिद्रं गोप्यं न पापभाग् भवेत्।
सुगोप्यं परमेशानि गोपनात् सिद्धिमश्नुते॥७॥

प्रकाशात् कार्यहानिश्च प्रकाशात् प्रलयं भवेत्।
तस्माद् भद्रे महेशानि न प्रकाश्यं कदाचन॥८॥

हे महादेवि! तारा (नील सरस्वती) सहस्रनाम के विषय में तुमने जो प्रश्न किया तथा उसे श्रवण करने की अभिलाषा प्रकट की, वह कार्य तो प्रशंसनीय है, परन्तु इस तारा सहस्रनाम का वर्णन करने में मैं समर्थ नहीं हूँ। जो भी व्यक्ति इसका प्रकाशन (अन्य के समक्ष कथन) करता है, उसके सिद्धि की हानि तथा वह ऐश्वर्य से रहित हो जाता है। फिर भी मोहवश (अपनी अज्ञानता के कारण) जो इसका वर्णन करता है, छः मास में उसकी मृत्यु हो जाती है। हे परमेशानि-सुन्दरि! यह सहस्रनाम पूर्णतया अवर्णनीय है। सभी मनुष्यों को जीवन तथा ऐश्वर्य का वरदान देने वाली हे देवि! यदि आपके मन में मेरे प्रति वास्तव में प्रेम है तो मुझे क्षमा करें, मैं इसका वर्णन नहीं कर सकता। समस्त शास्त्रों के परम रहस्य को जानने वालों में श्रेष्ठ हे देवि! समस्त सम्पत्तियों का सार रूप जो जीवन रूप सम्पत्ति है उसकी सदैव रक्षा करनी चाहिए। अपनी आयु की रक्षा करने तथा घर-परिवार के दोषों को गुप्त रखने से मनुष्य पाप का भागी नहीं होता। इसलिए हे परमेशानि इसे गुप्त ही रखना चाहिए, क्योंकि इसे गुप्त रखने वाला मनुष्य ही सिद्धि के फल का भोग करने वाला होता है। इसे प्रकट करने से मनुष्य को अपने कार्यों में असफलता तथा मृत्यु की भी प्राप्ति हो सकती है। इसलिए हे महेशानि भद्रे! (आप तो सबका कल्याण करने व चाहने वाली हैं, इसलिए मुझे प्रेरित न करें।) मैं इस तारासहस्र नाम का वर्णन (प्रकाशन) कभी नहीं कर सकता।

॥भैरवस्य वचनं श्रुत्वा देव्याः विषण्णम्॥

इति देववचः श्रुत्वा देवी परमसुन्दरी।
विस्मिता परमेशानि विषण्णा तत्र जायते॥९॥
शृणु हे परमेशान कृपासागरपारग।
तव स्नेहो महादेव मयि नास्त्यत्र निश्चितम्॥१०॥
भद्रं भद्रं महादेव इति कृत्वा महेश्वरी।
विमुखीभूय देवेशी तत्रास्ते शैलजा शुभा॥११॥

श्री भैरव (शिव) के द्वारा तारा सहस्र नाम कथन के प्रति स्पष्टतया अस्वीकृत रूप वचन को सुनकर परम सुन्दरी देवी आश्चर्य चकित (हक्की-बक्की) सी हाने के साथ ही खिन्न (दुखी-उदास) सी हो गयीं। उन्होंने कहा-हे परमेशान महादेव! आप तो अपार कृपासिन्धु (कहे जाते) हैं।

परन्तु ऐसा प्रतीत होता है कि निश्चय ही मुझ पर आपका स्नेह (प्रेम-कृपा) कुछ भी नहीं है। आप मेरे साथ सदैव (प्रेम का पाखण्डपूर्ण प्रदर्शन करते हुए) छल करते रहे हैं। ऐसा कहकर सुन्दरी महेश्वरी देवेशी शैलपुत्री पार्वती महादेव से विमुख होकर (मुख फेरकर) वहीं बैठ गयीं।

।। महादेवेन देवी-माननम्।।

विलोक्य विमुखीं देवीं महादेव्यो महेश्वरः।
प्रहस्य परमेशानीं परिष्वज्य प्रियां कथाम्।।१३।।
कथयामास तत्रैव महादेव्यै महेश्वरि।
मम सर्वस्वरूपा त्वं जानीहि नगनन्दिनि।।१४।।
यथा प्राणो महेशानि देहे तिष्ठति सुन्दरि।
तथा त्वं जगतामाद्ये चरणे पतितोऽस्म्यहम्।।१५।।
इति मत्वा महादेवि रक्ष मां तव किङ्करम्।
ततो देवी महेशानी त्रैलोक्यमोहिनी शिवा।।१६।।
महादेवं परिष्वज्य प्राह गद्गद्या गिरा।
सदा देहस्वरूपाहं देही त्वं परमेश्वर।।१७।।
तथापि वञ्चनां कर्तु मामित्थं वदसि प्रियम्।
महादेवः पुनः प्राह भैरवि प्राणवल्लभे।।१८।।
नाम्नां सहस्रं ताराया: श्रोतुमिच्छस्यशेषतः।

देवी को इस प्रकार स्वयं से पराङ्मुख देखकर महेश्वर महादेव ने हंस करके 'प्रिया' कहते हुए परमेशानी को आलिङ्गन में लेकर उन महादेवी से बोले हे महेश्वरि, हिमाचलसुते! तुम मेरी सर्वस्व हो, ऐसा तुम्हें (भी) ज्ञात है। हे महादेवि! मैं तुमसे पहले भी कह चुका हूँ कि तुम्हारे बिना मैं मृतक समान हूँ। हे परमानन्द स्वरूपिणी पर्वतपुत्रि! मुझे (मेरी धृष्टता के लिए) क्षमा करें। जैसे प्राण की शरीर में स्थित (होने के कारण मनुष्य की स्थिति) है, हे सुन्दरि! उसी प्रकार जगत के कारण रूप से इस विश्व में आपकी स्थित (होने के कारण ही इस संसार की स्थिति) है। मैं आपके चरणों में पतित (नतमस्तक) होता हूँ। ऐसा मानकर हे महादेवि! मेरी रक्षा करें, मैं आपका सेवक हूँ। महादेव के इस प्रकार कहने पर त्रिलोकी को (अपने सौन्दर्य अथवा माया से) मोहित करने वाली महेश-पत्नी देवी शिवा ने महादेव का (प्रेमपूर्वक) आलिङ्गन कर, गद्गद् वाणी (अत्यन्त भावुक होकर भरे हुए गले) से बोलीं। हे परमेश्वर! मैं सदैव शरीर रूप में हूँ तथा आप

इस शरीर में जीव (आत्मा) रूप से स्थित हैं। आप और मैं कभी भी पृथक नहीं हो सकते फिर भी स्वयं के मृत्यु की कल्पना कर मुझसे छल करते हुए से ऐसा वचन क्यों बोलते हैं। तत्पश्चात् महादेव पुनः बोले – हे प्राणवल्लभे-भैरवि! क्या सत्य ही तुम सम्पूर्ण रूप से तारा सहस्र नाम काश्रवण करना चाहती हो।

॥ तारा सहस्रनाम प्रकाशनाय पुनर्निवेदनम्॥

श्रीदेवी (पार्वत्युवाच)

न श्रुतं परमेशान तारानामसहस्रकम्।
कथयस्व महाभाग सत्यं परमसुन्दरम्॥१९॥
कथमीशान सर्वज्ञ लभन्ते सिद्धिमुत्तमाम्।
साधकाः सर्वदा येन तन्मे कथय सुन्दर॥२०॥
यस्मात् परतरं नास्ति स्तोत्रं तन्त्रेषु निश्चितम्।
सर्वपापहरं दिव्यं सर्वापद्विनिवारकम्॥२१॥
सर्वज्ञानकरं पुण्यं सर्वमङ्गलसंयुतम्।
पुरश्चर्याशतैस्तुल्यं स्तोत्रं सर्वप्रियङ्करम्॥२२॥
वश्यप्रदं मारणदमुच्चाटनप्रदं महत्।
नाम्नां सहस्रं तारायाः कथयस्व सुरेश्वर॥२३॥

हे परमेशान-महाभाग! मैंने (आपके मुख से) तारा सहस्रनाम का श्रवण नहीं किया है, अतः आप इस परमसुन्दर सत्य स्वरूप (आद्या शक्ति-रूपी ब्रह्मस्वरूप, क्योंकि वाच्य तथा वाचक में अभेद होता है) सहस्र नाम का मेरे प्रति कथन करें।

हे सुन्दर(नाम से सम्बोधित किये जाने वाले) शिव! जिस साधन के द्वारा साधकों को सर्वज्ञता तथा श्रेष्ठ सिद्धियों की प्राप्ति होती है, उसे आप कहें। तन्त्रशास्त्रों में जिससे श्रेष्ठतर अन्य कोई स्तोत्र नहीं है, जो दिव्य, सभी पापों का निवारण करने वाला, समस्त आपदाओं का उन्मूलन करने वाला, सर्वज्ञान प्रदायक, पुण्यप्रद, सम्पूर्ण कल्याणों से युक्त (उन्हें देनेवाला) सैकड़ों पुरश्चरण के समान (सर्वसिद्धि कारक) सर्वप्रियकारक तथा वशीकरण, मारण, उच्चाटन (आदि कर्मों) का साधक है, उस तारा के सहस्र नाम स्तोत्र को, हे सुरेश्वर! आप मुझसे कहें।

॥ तारासहस्रनाम-स्तोत्रस्य माहात्म्यम्॥

श्रीमहादेव उवाच

नाम्नां सहस्रं तारायाः स्तोत्रपाठाद् भविष्यति।
नाम्ना सहस्रं तारायाः कथयिष्याम्यशेषतः॥२४॥

शृणु देवि सदा भक्त्या भक्तानां परमं हितम्।
बिना पूजोपहारेण बिना जा(पे ?प्ये)न यत् फलम्॥२५॥
तत् फलं सकलं देवि कथयिष्यामि तच्छृणु।

हे देवि! तारा के सहस्र नामों को मैं सम्पूर्ण रूप से कहूँगा। इन सहस्र नामों के पाठ से साधक को जिन-जिन फलों की भविष्य में प्राप्ति होती है, उसका भी वर्णन करूँगा। भक्तों के लिए परम कल्याणकारी इस स्तोत्र का भक्ति पूर्वक केवल पाठ करने से ही बिना उपचारों के अर्पण तथा पूजन एवं भगवती के मंत्रों का बिना जप किए ही, भक्तों को जिन फलों की प्राप्ति होती है, उन सभी को मैं कहूँगा (कहता हूँ), तुम सुनो।

विनियोगः **ॐ अस्य श्री तारादेव्याः भक्तिकुलसर्वस्व नाम्नः (सहस्रनाम) स्तोत्रस्य, अक्षोभ्य ऋषिः, वृहती-उष्णिक् छन्दः, श्री उग्रतारा श्रीमदेकजटा श्री नीलसरस्वती देवता पुरुषार्थ चतुष्टय सिद्ध्यर्थे पाठे विनियोगः।**

॥तारा-सहस्र नामानि॥

तारा रात्रिर्महारात्रिर्कालरात्रिर्महामतिः।
कालिका कामदा माया महामाया महास्मृतिः॥२६॥
महादानरता यज्ञा यज्ञोत्सवविभूषिता।
चन्द्रवक्त्रा चकोराक्षी चारुनेत्रा सुलोचना॥२७॥
त्रिनेत्रा महती देवी कुरङ्गाक्षी मनोरमा।
ब्राह्मी नारायणी ज्योत्सना चारुकेशी सुमूर्धजा॥२८॥
वाराही वारुणी विद्या महाविद्या महेश्वरी।
सिद्धा कुञ्चितकेशा च महायज्ञस्वरूपिणी॥२९॥
गौरी चम्पकवर्णा च कृशाङ्गी शिवमोहिनी।
सर्वानन्दस्वरूपा च सर्वशङ्कैकतारिणी॥३०॥
विद्यानन्दमयी नन्दा भद्रकाली स्वरूपिणी।
गायत्री सुचरित्रा च कौलव्रतपरायणा॥३१॥
हिरण्यगर्भा भूगर्भा महागर्भा सुलोचनी।
हिमवत्तनया दिव्या महामेघस्वरूपिणी॥३२॥
जगन्माता जगदात्री जगतामुपकारिणी।
ऐन्द्री सौम्या तथा घोरा वारुणी माधवी तथा॥३३॥
आग्नेयी वैनतेयी च ऐशानी चण्डिकात्मिका।
सुमेरुतनया नित्या सर्वेषामुपकारिणी॥३४॥

ललज्जिह्वा सरोजाक्षी मुण्डस्रक्परिभूषिता।
सर्वानन्दमयी सर्वा सर्वानन्दस्वरूपिणी।।३५।।
धृतिर्मेधा तथा लक्ष्मी: श्रद्धा पन्नगगामिनी।
रुक्मिणी जानकी दुर्गाम्बिका सत्यवती रति:।।३६।।
कामाख्या कामदा नन्दा नारसिंही सरस्वती।
महादेवरता चण्डी चण्डदोर्दण्डखण्डिनी।।३७।।
दीर्घकेशी सुकेशी च पिङ्गकेशी महाकचा।
भवानी भवपत्नी च भवभीतिहरा सती।।३८।।

तारा सहस्रनाम स्तोत्र पाठ के पश्चात् (अथवा पूजनादि के उपरान्त) चतुर्थ्यन्त नामों के पहले ॐ तथा बाद में नम: लगाकर पाठ करना अति श्रेयष्कर होता है। साधक यदि चाहे तो स्तोत्र का पाठ न करके केवल नाम-पाठ भी उपर्युक्त रूप से कर सकता है। अत: यहाँ सभी नामों को चतुर्थी विभक्ति के रूप में दिया जा रहा है।

तारायै, रात्र्यै, महारात्र्यै, कालरात्र्यै, महामत्यै, कालिकायै, कामदायै, मायायै, महामायायै, महास्मृत्यै, महादानरतायै, यज्ञायै, यज्ञोत्सवविभूषितायै, चन्द्रवक्त्रायै, चकोराक्ष्यै, चारुनेत्रायै, सुलोचनायै, त्रिनेत्रायै, महत्यै, देव्यै, कुरङ्गाक्ष्यै, मनोरमायै, ब्राह्म्यै, नारायण्यै, ज्योत्सनायै, चारुकेश्यै, सुमूर्धजायै, वाराह्यै, वारुण्यै, विद्यायै, महाविद्यायै, महेश्वर्यै, सिद्धायै, कुञ्चितकेशायै, महायज्ञस्वरूपिण्यै, गौर्यै, चम्पकवर्णायै, कृशाङ्ग्यै, शिवमोहिन्यै, सर्वानन्द स्वरूपायै, सर्वशङ्कैकतारिण्यै, विद्यानन्दमय्यै, नन्दायै, भद्रकालीस्वरूपिण्यै, गायत्र्यै, सुचरित्रायै, कौलवृतपरायणायै, हिरण्यगर्भायै, भूगर्भायै, महागर्भायै, सुलोचन्यै, हिमवत्तनयायै, दिव्यायै, महामेघस्वरूपिण्यै, जगन्मातायै, जगद्धात्र्यै, जगतामुपकारिण्यै, ऐन्द्र्यै, सौम्यायै, घोरायै, वारुण्यै, माधव्यै, आग्नेय्यै, वैनतेय्यै, ऐशान्यै, चण्डिकात्मिकायै, सुमेरुतनयायै, नित्यायै, सर्वेषामुपकारिण्यै, ललज्जिह्वायै, सरोजाक्ष्यै, मुण्डस्रकपरिभूषितायै, सर्वानन्दमय्यै, सर्वायै, सर्वानन्दस्वरूपिण्यै, धृत्यै, मेधायै, लक्ष्म्यै, श्रद्धायै, पन्नगगामिन्यै, रुक्मिण्यै, जानक्यै, दुर्गायै, अम्बिकायै, सत्यवत्यै, रत्यै, कामाख्यै, कामदायै, नन्दायै, नारसिंह्यै, सरस्वत्यै, महादेवरतायै, चण्ड्यै, चण्डदोर्दण्डखण्डिन्यै, दीर्घकेश्यै, सुकेश्यै, पिङ्गकेश्यै, महाकचायै, भवान्यै, भवपत्न्यै, भवभीतिहरायै तथा सत्यै।।१०२।।

पौरन्दरी तथा विष्णोर्जाया माहेश्वरी तथा।
सर्वेषां जननी विद्या चार्वङ्गी दैत्यनाशिनी।।३९।।

सर्वरूपा महेशानी कामिनी वरवर्णिनी।
महाविद्या महामाया महामेधा महोत्सवा॥४०॥
विरूपा विश्वरूपा च मृडानी मृडवल्लभा।
कोटिचन्द्रप्रतीकाशा शतसूर्यप्रकाशिनी॥४१॥
जह्नुकन्या महोग्रा च पार्वती विश्वमोहिनी।
कामरूपा महेशानी नित्योत्साहा मनस्विनी॥४२॥
बैकुण्ठनाथपत्नी च तथा शङ्करमोहिनी।
काश्यपी कमला कृष्णा कृष्णरूपा च कालिनी॥४३॥
माहेश्वरी वृषारूढा सर्वविस्मयकारिणी।
मान्या मानवती शुद्धा कन्या हिमगिरेस्तथा॥४४॥
अपर्णा पद्मपत्राक्षी नागयज्ञोपवीतिनी।
महाशङ्खधरा कान्ता कमनीया नगात्मजा॥४५॥
ब्रह्माणी वैष्णवी शम्भोर्जाया गङ्गा जलेश्वरी।
भागीरथी मनोबुद्धिर्नित्या विद्यामयी तथा॥४६॥
हरप्रिया गिरिसुता हरपत्नी तपस्विनी।
महाव्याधिहरा देवी महाघोरस्वरूपिणी॥४७॥
महापुण्यप्रभा भीमा मधुकैटभनाशिनी।
शङ्खिनी वज्रिणी धात्री तथा पुस्तकधारिणी॥४८॥
चामुण्डा चपला तुङ्गा शुम्भदैत्यनिकृन्तनी।
शान्तिर्निद्रा महानिद्रा पूर्णनिद्रा च रेणुका॥४९॥
कौमारी कुलजा कुन्ती कौलव्रतपरायणा।
वनदुर्गा सदाचारा द्रौपदी द्रुपदात्मजा॥५०॥
यशस्विनी यशस्या च यशोधात्री यशःप्रदा।
सृष्टिरूपा महागौरी निशुम्भप्राणनाशिनी॥५१॥

पौरन्दर्यै, विष्णोर्जायायै, माहेश्वर्यै, सर्वेषाञ्जनन्यै, विद्यायै, चार्वङ्ग्यै, दैत्यनाशिन्यै, सर्वरूपायै, महेशान्यै, कामिन्यै, वरवर्णिन्यै, महाविद्यायै, महामायायै, महामेधायै, महोत्सवायै, विरूपायै, विश्वरूपायै, मृडान्यै, मृडवल्लभायै, कोटिचन्द्रप्रतीकाशायै, शतसूर्यप्रकाशिन्यै, जह्नुकन्यायै, महोग्रायै, पार्वत्यै, विश्वमोहिन्यै, कामरूपायै, महेशान्यै, नित्योत्साहायै, मनस्विन्यै, वैकुण्ठनाथपत्न्यै, शंकर मोहिन्यै, काश्यप्यै, कमलायै, कृष्णायै, कृष्णरूपायै, कालिन्यै, माहेश्वर्यै, वृषारूढायै, सर्वविस्मयकारिण्यै, मान्यायै, मानवत्यै, शुद्धायै, हिमगिरिकन्यायै,

अपर्णायै, पद्मपत्राक्ष्यै, नागयज्ञोपवीतिन्यै, महाशंखधरायै, कान्तायै, कमनीयायै, नगात्मजायै, ब्रह्माण्यै, वैष्णव्यै, शम्भोर्जायायै, गङ्गायै, जलेश्वर्यै, भागीरथ्यै, मनोबुद्ध्यै, नित्यायै, विद्यामय्यै, हरप्रियायै, गिरिसुतायै, हरपत्न्यै, तपस्विन्यै, महाव्याधिहरायै, महाघोरस्वरूपिण्यै, महापुण्यप्रभायै, भीमायै, मधुकैटभनाशिन्यै, शंखिन्यै, वज्रिण्यै, धात्र्यै, पुस्तकधारिण्यै, चामुण्डायै, चपलायै, तुङ्गायै, शुम्भदैत्य निकृन्तन्यै, शान्त्यै, निद्रायै, महानिद्रायै, पूर्णनिद्रायै, रेणुकायै, कौमार्यै, कुलजायै, कुन्त्यै, कौलवृतपरायणायै, वन-दुर्गायै, सदाचारायै, द्रौपद्यै, द्रुपदात्मजायै, यशस्विन्यै, यशस्यायै, यशोधात्र्यै, यशः प्रदायै, सृष्टिरूपायै, महागौर्यै तथा निशुम्भप्राणनाशिन्यै।।१९९।।

पद्मिनी वसुधा पृथ्वी रोहिणी विन्ध्यवासिनी।
शिवशक्तिर्महाशक्तिः शङ्खिनी शक्तिनिर्गता।।५२।।
दैत्यप्राणहरा देवी सर्वरक्षणकारिणी।
क्षान्तिः क्षेमङ्करी चैव बुद्धिरूपा महाधना।।५३।।
श्रीविद्या भैरवी भव्या भवानी भवनाशिनी।
तापिनी भाविनी सीता तीक्ष्णतेजःस्वरूपिणी।।५४।।
दात्री दानपरा काली दुर्गा दैत्यविभूषणा।
महापुण्यप्रदा भीमा मधुकैटभनाशिनी।।५५।।
पद्मा पद्मावती कृष्णा तुष्टा पुष्टा तथोर्वशी।
वज्रिणी वज्रहस्ता च तथा नारायणी शिवा।।५६।।
खड्गिनी खड्गहस्ता च खड्गखर्परधारिणी।
देवाङ्गना देवकन्या देवमाता पुलोमजा।।५७।।
सुखिनी स्वर्गदात्री च सर्वसौख्यविवर्धिनी।
शीला शीलावती सूक्ष्मा सूक्ष्माकारा वरप्रदा।।५८।।
वरेण्या वरदा वाणी ज्ञानिनी ज्ञानदा सदा।
उग्रकाली महाकाली भद्रकाली च दक्षिणा।।५९।।
भृगुवंशसमुद्भूता भार्गवी भृगुवल्लभा।
शूलिनी शूलहस्ता च कर्त्रीखर्परधारिणी।।६०।।
महावंशसमुद्भूता मयूरवरवाहना।
महाशङ्खरता रक्ता रक्तखर्परधारिणी।।६१।।
रक्ताम्बरधरा रामा रमणी सुरनायिका।
मोक्षदा शिवदा श्यामा मदविभ्रममन्थरा।।६२।।

परमानन्दा ज्येष्ठा योगिनी गणसेविता।
सारा जाम्बवती चैव सत्यभामा नगात्मजा॥६३॥
रौद्रा रौद्रबला घोरा रुद्रसारारुणात्मिका।
रुद्ररूपा महारौद्री रौद्रदैत्यविनाशिनी॥६४॥

पद्मिन्यै, वसुधायै, पृथ्व्यै, रोहिण्यै, विन्ध्यवासिन्यै, शिवशक्त्यै, महाशक्त्यै, शंखिन्यै, शक्तिनिर्गतायै, दैत्यप्राण हरायै, सर्वरक्षणकारिण्यै, क्षान्त्यै, क्षेमकर्यै, बुद्धिरूपायै, महाधनायै, श्रीविद्यायै, भैरव्यै, भव्यायै, भवान्यै, भयनाशिन्यै, तापिन्यै, भाविन्यै, सीतायै, तीक्ष्णतेजस्वरूपिण्यै, दात्र्यै, दानपरायै, काल्यै, दुर्गायै, दैत्यविभूषणायै, महापुण्यप्रदायै, भीमायै, मधुकैटभ नाशिन्यै, पद्मायै, पद्मावत्यै, कृष्णायै, तुष्टायै, पुष्टायै, उर्वश्यै, वज्रिण्यै, वज्रहस्तायै, नारायण्यै, शिवायै, खड्गिन्यै, खड्ग हस्तायै, खड्गखर्परधारिण्यै, देवाङ्गनायै, देवकन्यायै, देवमातायै, पुलोमजायै, सुखिन्यै, स्वर्गदात्र्यै, सर्वसौख्यविवर्धिन्यै, शीलायै, शीलावत्यै, सूक्ष्मायै, सूक्ष्माकरायै, वरप्रदायै, वरेण्यायै, वरदायै, वाण्यै, ज्ञानिन्यै, ज्ञानदायै, सदायै, उग्रकाल्यै, महाकाल्यै, भद्रकाल्यै, दक्षिणायै (दक्षिणाकाल्यै), भृगृवंशसमुद्भूतायै, भार्गव्यै, भृगुवल्लभायै, शूलिन्यै, शूलहस्तायै, कर्त्री खर्पर धारिण्यै, महावंशसमुद्भूतायै, मयूरवरवाहनायै, महाशेखरतायै, रक्तायै, रक्त खर्पर धारिण्यै, रक्ताम्बरधरायै, रामायै, रमण्यै, सुरनायिकायै, मोक्षदायै, शिवदायै, श्यामायै, मदविभ्रममन्थरायै, परमानन्दायै, ज्येष्ठायै, योगिन्यै, गणसेवितायै, सारायै, जाम्बवत्यै, सत्यभामायै, नगात्मजायै, रौद्रायै, रौद्रवलायै, घोरायै, रुद्रसारायै, अरुणात्मिकायै, रुद्ररूपायै, महारौद्र्यै तथा रौद्रदैत्यविनाशिन्यै॥३०१॥

कौमारी कौशिकी चण्डा कालदैत्यविनाशिनी।
शम्भुपत्नी शम्भुरता शम्भुजाया महोदरी॥६५॥
शिवपत्नी शिवरता शिवजाया शिवप्रिया।
हरपत्नी हररता हरजाया हरप्रिया॥६६॥
मदनान्तककान्ता च मदनान्तकवल्लभा।
गिरिजा गिरिकन्या च गिरीशस्य च वल्लभा॥६७॥
भूता भव्या भवा स्पष्टा पावनी परपालिनी।
अदृश्या च व्यक्तरूपा इष्टानिष्टप्रवर्द्धिनी॥६८॥
अच्युता प्रच्युतप्राणा प्रमदा वासवेश्वरी।
अपांनिधिसमुद्भूता धारिणी च प्रतिष्ठिता॥६९॥
उद्भवा क्षोभणा क्षेमा श्रीगर्भा परमेश्वरी।
कमला पुष्पदेहा च कामिनी कञ्जलोचना॥७०॥

शरण्या कमला प्रीतिर्विमलानन्दवर्धिनी।
कपर्दिनी कराला च निर्मला देवरूपिणी।।७१।।
उदीर्णभूषणा भव्या सुरसेना महोदरी।
श्रीमती शिशिरा नव्या शिशिराचलकन्यका।।७२।।
सुरमान्या सुरश्रेष्ठा ज्येष्ठा प्राणेश्वरी स्थिरा।
तमोघ्नी ध्वान्तसंहत्री प्रयतात्मा पतिव्रता।।७३।।
प्रद्योतिनी रथारूढा सर्वलोकप्रकाशिनी।
मेधाविनी महावीर्या हंसी संसारतारिणी।।७४।।
प्रणतप्राणिनामार्तिहारिणी दैत्यनाशिनी।
डाकिनी शाकिनीदेवी वरखट्वाङ्गधारिणी।।७५।।
कौमुदी कुमुदानन्दा कौलिका कुलजामरा।
गर्विता गुणसंपन्ना नगजा खगवाहिनी।।७६।।
चन्द्रानना महोग्रा च चारुमूर्धजशोभना।
मनोज्ञा माधवी मान्या माननीया सतां सुहृत्।।७७।।

कौमार्यै, कौशिक्यै, चण्डायै, कालदैत्यविनाशिन्यै, शम्भुपत्न्यै, शम्भुरतायै, शम्भुजायायै, महोदर्यै, शिवपत्न्यै, शिवरतायै, शिवजायायै, शिवप्रियायै, हरपत्न्यै, हररतायै, हरजायायै, हरप्रियायै, मदनान्तककान्तायै, मदनान्तक वल्लभायै, गिरिजायै, गिरिकन्यायै, गिरीशवल्लभायै, भूतायै, भव्यायै, भवायै, स्पष्टायै, पावन्यै, परपालिन्यै, अदृश्यायै, व्यक्तरूपायै, इष्टानिष्ट प्रवर्धिन्यै, अच्युतायै, अच्युतप्राणायै, प्रमदायै, वासवेश्वर्यै, अपांनिधिसमूद्भूतायै, धारिण्यै, प्रतिष्ठितायै, उद्भवायै, क्षोभणायै, क्षेमायै, श्रीगर्भायै, परमेश्वर्यै, कमलायै, पुष्पदेहायै, कामिन्यै, कञ्जलोचनायै, शरण्यायै, कमलायै, प्रीत्यै, विमलायै, आनन्दवर्धिन्यै, कपर्दिन्यै, करालायै, निर्मलायै, देवरूपिण्यै, उदीर्णभूषणायै, भव्यायै, सुरसेनायै, महोदर्यै, श्रीमत्यै, शिशिरायै, नव्यायै, शिशिराचलकन्यकायै, सुरमान्यायै, सुरश्रेष्ठायै, ज्येष्ठायै, प्राणेश्वर्यै, स्थिरायै, तमोघ्न्यै, ध्वान्तसंहन्त्र्यै, प्रयतात्मायै, पतिव्रतायै, प्रद्योतिन्यै, रथारूढायै, सर्वलोक प्रकाशिन्यै, मेधाविन्यै, महावीर्यायै, हंस्यै, संसारतारिण्यै, प्रणतप्राणिनामार्तिहारिण्यै, दैत्यनाशिन्यै, डाकिन्यै, शाकिनीदेव्यै, वरखट्वाङ्गधारिण्यै, कौमुद्यै, कुमुदानन्दायै, कौलिकायै, कुलजायै, अमरायै, गर्वितायै, गुणसम्पन्नायै, नगजायै, खगवाहिन्यै, चन्द्राननायै, महोग्रायै, चारुमूर्धज शोभनायै, मनोज्ञायै, माधव्यै, मान्यायै, माननीयायै तथा सतांसुहृदायै।।४०२।।

ज्येष्ठा श्रेष्ठा मघा पुष्या धनिष्ठा पूर्वफाल्गुनी।
रक्तबीजनिहन्त्री च रक्तबीजविनाशिनी।।७८।।

चण्डमुण्डनिहन्त्री च चण्डमुण्डविनाशिनी।
कर्त्री हर्त्री सुकर्त्री च विमलामलवाहिनी।।७९।।
विमला भास्करी वीणा महिषासुरघातिनी।
कालिन्दी यमुना वृद्धा सुरभिः बालिका सती।।८०।।
कौशल्या कौमुदी मैत्रीरूपिणी चाप्यरुन्धती।
पुरारिगृहिणी पूर्णा पूर्णानन्दस्वरूपिणी।।८१।।
पुण्डरीकाक्षपत्नी च पुण्डरीकाक्षवल्लभा।
संपूर्णचन्द्रवदना बालचन्द्रसमप्रभा।।८२।।
रेवती रमणी चित्रा चित्राम्बरविभूषणा।
सीता वीणावती चैव यशोदा विजया प्रिया।।८३।।
नवपुष्पसमुद्भूता नवपुष्पोत्सवोत्सवा।
नवपुष्पस्रजामाला माल्यभूषणभूषिता।।८४।।
नवपुष्पसमप्राणा नवपुष्पोत्सवप्रिया।
प्रेतमण्डलमध्यस्था सर्वाङ्गसुन्दरी शिवा।।८५।।
नवपुष्पात्मिका षष्ठी पुष्पस्तवकमण्डला।
नवपुष्पगुणोपेता श्मशानभैरवप्रिया।।८६।।
कुलशास्त्रप्रदीपा च कुलमार्गप्रवर्द्धिनी।
श्मशानभैरवी काली भैरवी भैरवप्रिया।।८७।।
आनन्दभैरवी ध्येया भैरवी कुरुभैरवी।
महाभैरवसंप्रीता भैरवीकुलमोहिनी।।८८।।
श्रीविद्याभैरवी नीतिभैरवी गुणभैरवी।
संमोहभैरवी पुष्टिभैरवी तुष्टिभैरवी।।८९।।
संहारभैरवी सृष्टिभैरवी स्थितिभैरवी।
आनन्दभैरवी वीरा सुन्दरी स्थितिसुन्दरी।।९०।।
गुणानन्दस्वरूपा च सुन्दरी कालरूपिणी।
श्रीमायासुन्दरी सौम्यसुन्दरी लोकसुन्दरी।।९१।।
श्रीविद्यामोहिनी बुद्धिर्महाबुद्धिस्वरूपिणी।
मल्लिका हाररसिका हार(ा)लम्बनसुन्दरी।।९२।।

ज्येष्ठायै, श्रेष्ठायै, मघायै, पुष्यायै, धनिष्ठायै, पूर्वफाल्गुन्यै, रक्तबीजनिहन्त्र्यै, रक्तबीजविनाशिन्यै, चण्डमुण्डनिहन्त्र्यै, चण्डमुण्डविनाशिन्यै, कर्त्र्यै, हर्त्र्यै, सुकर्त्र्यै, विमलावाहिन्यै, अमलावाहिन्यै, विमलायै, भास्कर्यै, वीणायै, महिषासुर

घातिन्यै, कालिन्द्यै, यमुनायै, वृद्धायै, सुरभ्यै, बालिकायै, सत्यै, कौशल्यायै, कौमुद्यै, मैत्रीरूपिण्यै, अरुन्धत्यै, पुरारिगृहिण्यै, पूर्णायै, पूर्णानन्दरूपिण्यै, पुण्डरीकाक्षपत्न्यै, पुण्डरीकाक्षवल्लभायै, सम्पूर्णचन्द्रवदनायै, बालचन्द्र समप्रभायै, रेवत्यै, रमण्यै, चित्रायै, चित्राम्बरविभूषणायै, सीतायै, वीणावत्यै, यशोदायै, विजयायै, प्रियायै, नवपुष्पसमुद्भूतायै, नवपुष्पोत्सवोत्सवायै, नवपुष्पस्रजायै, नवपुष्पमालायै, (नवपुष्प) माल्यभूषणभूषितायै, नवपुष्पसमायै, नवपुष्प प्राणायै, नवपुष्पोत्सवप्रियायै, प्रेतमण्डलमध्यस्थायै, सर्वाङ्गसुन्दर्यै, शिवायै, नवपुष्पात्मिकायै, षष्ठ्यै, पुष्पस्तवकमण्डलायै, नवपुष्पगुणोपेतायै, श्मशानभैरवप्रियायै, कुलशास्त्रप्रदीपायै, कुलमार्गप्रवर्धिन्यै, श्मशानभैरव्यै, काल्यै, भैरव्यै, कुलभैरव्यै, भैरवप्रियायै, आनन्दभैरव्यै, ध्येयायै, कुरुभैरव्यै, महाभैरव सम्प्रीतायै, भैरवीकुलमोहिन्यै, श्रीविद्याभैरव्यै, नीतिभैरव्यै, गुणभैरव्यै, सम्मोहभैरव्यै, पुष्टि भैरव्यै, स्थिति भैरव्यै, तुष्टिभैरव्यै, संहारभैरव्यै, सृष्टिभैरव्यै, आनन्दभैरव्यै, वीरायै, सुन्दर्यै, स्थितिसुन्दर्यै, गुणानन्दस्वरूपायै, कालरूपिण्यै, श्री मायासुन्दर्यै, सौम्यसुन्दर्यै, लोकसुन्दर्यै, श्रीविद्यामोहिन्यै, बुद्धयै, महाबुद्धिस्वरूपिण्यै, मल्लिकायै, हाररसिकायै तथा हारालम्बन सुन्दर्यै।।४९९।।

नीलपङ्कजवर्णा च नागकेसरभूषिता।
जपाकुसुमसङ्काशा जपाकुसुमशोभिता।।९३।।
प्रिया प्रियङ्करी विष्णोर्दानवेन्द्रविनाशिनी।
ज्ञानेश्वरी ज्ञानदात्री ज्ञानानन्दप्रदायिनी।।९४।।
गुणगौरवसंपन्ना गुणशीलसमन्विता।
रूपयौवनसंपन्ना रूपयौवनशोभिता।।९५।।
गुणाश्रया गुणरता गुणगौरवसुन्दरी।
मदिरामोदमत्ता च ताटङ्कद्वयशोभिता।।९६।।
वृक्षमूलस्थिता देवी वृक्षशाखोपरिस्थिता।
तालमध्याग्रनिलया वृक्षमध्यनिवासिनी।।९७।।
स्वयंम्भूपुष्पसंकाशा स्वयम्भूपुष्पधारिणी।
स्वयम्भूकुसुमप्रीता स्वयम्भूपुष्पशोभिनी।।९८।।
स्वयम्भूपुष्परसिका नग्ना ध्यानवती सुधा।
शुक्रप्रिया शुक्ररता शुक्रमज्जनतत्परा।।९९।।
पूर्णपर्णा सुपर्णा च निष्पर्णा पापनाशिनी।
मदिरामोदसंपन्ना मदिरामोदधारिणी।।१००।।

सर्वाश्रया सर्वगुणा नन्दनन्दनधारिणी।
नारीपुष्पसमुद्भृता नारीपुष्पोत्सवोत्सवा॥१०१॥
नारीपुष्पसमप्राणा नारीपुष्परता मृगी।
सर्वकालोद्भवप्रीता सर्वकालोद्भवोत्सवा॥१०२॥
चतुर्भुजा दशभुजा अष्टादशभुजा तथा।
द्विभुजा षड्भुजा प्रीता रक्तपङ्कजशोभिता॥१०३॥
कौबेरी कौरवी कौर्या कुरुकुल्ला कपालिनी।
सुदीर्घकदलीजङ्घा रम्भोरू रामवल्लभा॥१०४॥
निशाचरी निशामूर्तिर्निशाचन्द्रसमप्रभा।
चान्द्री चान्द्रकला चन्द्रा चारुचन्द्रनिभानना॥१०५॥
(श्रो?स्रो)तस्वती स्रुतिमती सर्वदुर्गतिनाशिनी।
सर्वाधारा सर्वमयी सर्वानन्दस्वरूपिणी॥१०६॥
सर्वचक्रेश्वरी सर्वा सर्वमन्त्रमयी शुभा।
सहस्रनयनप्राणा सहस्रनयनप्रिया॥१०७॥
सहस्रशीर्षा सुषमा सदम्भा सर्वभक्षिका।
यष्टिका यष्टिचक्रस्था षड्वर्गफलदायिनी॥१०८॥
षड्विंशपद्ममध्यस्था षड्विंशकुलमध्यगा।
हूँकारवर्णनिलया हूँकाराक्षरभूषणा॥१०९॥
हकारवर्णनिलया हकाराक्षरभूषणा।
हारिणी हारवलिता हारहीरकभूषणा॥११०॥
ह्रींकारबीजसहिता ह्रींकारैरुपशोभिता ।

नीलपङ्कजवर्णायै, नागकेसरविभूषितायै, जपाकुसुमसङ्काशायै, जपाकुसुम शोभितायै, प्रियायै, विष्णु-प्रियङ्कर्यै, दानवेन्द्रविनाशिन्यै, ज्ञानेश्वर्यै, ज्ञानदात्र्यै, ज्ञानानन्द प्रदायिन्यै, गुणगौरवसम्पन्नायै, गुणशील समन्वितायै, रूपयौवनसम्पन्नायै, रूपयौवनशोभितायै, गुणाश्रयायै, गुणरतायै, गुणगौरवसुन्दर्यै, मदिरामोदमत्तायै, ताटङ्कद्वय शोभितायै, वृक्षमूलस्थितायै, वृक्षशाखोपरिस्थितायै, तालमध्याग्रनिलयायै, वृक्षमध्यनिवासिन्यै, स्वयम्भूपुष्पसङ्काशायै, स्वयम्भूपुष्पधारिण्यै, स्वयम्भूपुष्पप्रीतायै, स्वयम्भूपुष्पशोभिन्यै, स्वयम्भूपुष्परसिकायै, नग्नायै, ध्यानवत्यै, सुधायै, शुक्रप्रियायै, शुक्ररतायै, शुक्रमज्जनतत्परायै, पूर्णपर्णायै, सुपर्णायै, निष्पर्णायै, पापनाशिन्यै, मदिरामोदसम्पन्नायै, मदिरामोदधारिण्यै, सर्वाश्रयायै, सर्वगुणायै, नन्दनन्दनधारिण्यै, नारीपुष्पसमुद्भूतायै, नारीपुष्पोत्सवोत्सवायै, नारीपुष्पसमप्राणायै, नारीपुष्परतायै, मृग्यै, सर्वकालोद्भवप्रीतायै, सर्वकालोद्भवोत्सवायै, चतुर्भुजायै, दशभुजायै,

अष्टादशभुजायै, द्विभुजायै, षड्भुजायै, प्रीतायै, रक्तपङ्कजशोभितायै, कौबेर्यै, कौरव्यै, कौर्यायै, कुरुकुल्लुकायै, कपालिन्यै, सुदीर्घकदलीजंघायै, रम्भोर्वै, रामवल्लभायै, निशाचर्यै, निशामूर्त्यै, निशाचन्द्रसमप्रभायै, चान्द्र्यै, चान्द्रकलायै, चन्द्रायै, चारुचन्द्रनिभाननायै, स्रोतस्वत्यै, स्रुतिमत्यै, सर्वदुर्गतिनाशिन्यै, सर्वधारायै, सर्वमय्यै, सर्वानन्दस्वरूपिण्यै, सर्वचक्रेश्वर्यै, सर्वायै, सर्वमन्त्रमय्यै, शुभायै, सहस्रनयनप्राणायै, सहस्रनयनप्रियायै, सहस्रशीर्षायै, सुषमायै, सदम्भायै, सर्वभक्षिकायै, यष्टिकायै, यष्टिचक्रस्थायै, षड्वर्गफलदायिन्यै, षड्विंशपद्ममध्यस्थायै, षड्विंशकुलमध्यगायै, हूँकारवर्णनिलयायै, हूँकाराक्षरभूषणायै, हकारवर्णनिलयायै, हकाराक्षरभूषणायै, हारिण्यै, हारवलितायै, हारहीरकभूषणायै, ह्रींकारबीजसहितायै तथा ह्रींकारैरुपशोभितायै।।६०१।।

कन्दर्पस्य कला कुन्दा कौलिनी कुलदर्पिता।।१११।।
केतकीकुसुमप्राणा केतकीकृतभूषणा।
केतकीकुसुमासक्ता केतकीपरिभूषिता।।११२।।
कर्पूरपूर्णवदना महामाया महेश्वरी।
कला केलिः क्रिया कीर्णा कदम्बकुसुमोत्सुका।।११३।।
कादम्बिनी करिशुण्डा कुञ्जेरेश्वरगामिनी।
खर्वा सुखञ्जनयना खञ्जनद्वन्द्वभूषणा।।११४।।
खद्योत इव दुर्लक्षा खद्योत इव चञ्चला।
महामाया जगद्धात्री गीतवाद्यप्रिया रतिः।।११५।।
गणेश्वरी गणेज्या च गुणपूज्या गुणप्रदा।
गुणाढ्या गुणसंपन्ना गुणदात्री गुणात्मिका।।११६।।
गुर्वी गुरुतरा गौरी गाणपत्यफलप्रदा।
महाविद्या महामेधा तुलिनी गणमोहिनी।।११७।।
भव्या भवप्रिया भाव्या भावनीया भवात्मिका।
घर्घरा घोरवदना घोरदैत्यविनाशिनी।।११८।।
घोरा घोरवती घोष्या घोरपुत्री घनाचला।
चर्चरी चारुनयना चारुवक्त्रा चतुर्गुणा।।११९।।
चतुर्वेदमयी चण्डी चन्द्रास्या चतुरानना।
चलच्चकोरनयना चलत्खञ्जनलोचना।।१२०।।
चलदम्भोजनिलया चलदम्भोजशोभिता।
छत्री छत्रप्रिया छत्रा छत्रचामरशोभिता।।१२१।।
छिन्नछद्मा छिन्नशिराश्छिन्ननासा छलात्मिका।
छलाढ्या छलसंक्रस्ता छलरूपा छलस्थिरा।।१२२।।

छकारवर्णनिलया छकाराढ्या छलप्रिया।
छद्मिनी छद्मनिरता छद्मच्छद्मनिवासिनी॥१२३॥
जगन्नाथप्रिया जीवा जगन्मुक्तिकरी मता।
जीर्णा जीमूतवनिता जीमूतैरुपशोभिता॥१२४॥
जामातृवरदा जम्भा जमलार्जुनभञ्जिनी।
झर्झरी झाकृतिर्झल्ली झरी झर्झरिका तथा॥१२५॥

कन्दर्पकलायै, कुन्दायै, कौलिन्यै, कुलदर्पितायै, केतकीकुसुम प्राणायै, केतकीकृतभूषणायै, केतकी कुसुमासक्तायै, केतकीपरिभूषितायै, कर्पूरपूर्णवदनायै, महामायायै, महेश्वर्यै, कलायै, केल्यै, क्रियायै, कीर्णायै, कदम्बकुसुमोत्सुकायै, कादम्बिन्यै, करिशुण्डायै, कुञ्जरेश्वरगामिन्यै, खर्वायै, सुखञ्जनयनायै, खञ्जनद्वन्द्वभूषणायै, खद्योत इव दुर्लक्षायै, खद्योत इव चञ्चलायै, जगद्धात्र्यै, गीतवाद्यप्रियायै, रत्यै, गणेश्वर्यै, गणेज्यायै, गुण पूज्यायै, गुण प्रदायै, गुणाढ्यायै, गुणसम्पन्नायै, गुणदात्र्यै, गुणात्मिकायै, गुर्व्यै, गुरुतरायै, गौर्यै, गाणपत्यफलप्रदायै, महाविद्यायै, महामेधायै, तुलिन्यै, गणमोहिन्यै, भव्यायै, भवप्रियायै, भाव्यायै, भावनीयायै, भवात्मिकायै, घर्घरायै, घोरवदनायै, घोरदैत्यविनाशिन्यै, घोरायै, घोरवत्यै, घोष्यायै, घोरपुत्र्यै, घनाचलायै, चर्च्यै, चारुनयनायै, चारुवक्त्रायै, चतुर्गुणायै, चतुर्वेदमय्यै, चण्ड्यै, चन्द्रास्यायै, चतुराननायै, चलच्चकोरनयनायै, चलत्खञ्जनलोचनायै, चलदम्भोजनिलयायै, चलदम्भोजशोभितायै, छत्र्यै, छत्रप्रियायै, छत्रायै, छत्रचामरशोभितायै, छिन्नछदायै, छिन्नशिरायै, छिन्ननासायै, छलात्मिकायै, छलाढ्यायै, छलसन्त्रस्तायै, छलरूपायै, छलस्थिरायै, छकारवर्णनिलयायै, छकाराढ्यायै, छलप्रियायै, छद्मिन्यै, छद्मनिरतायै, छद्मच्छद्मनिवासिन्यै, जगन्नाथ प्रियायै, जीवायै, जगन्मुक्तिकर्यै, मतायै, जीर्णायै, जीमूतवनितायै, जीमूतैरुपशोभितायै, जामातृवरदायै, जम्भायै, जमलार्जुनभञ्जिन्यै, झर्झर्यै, झाकृत्यै, झल्ल्यै, झर्यै, झर्झरिकायै॥७०२॥

टङ्कारकारिणी टीका सर्वटङ्कारकारिणी।
ठकाराङ्गी डमरुका डाकारा डमरुप्रिया॥१२६॥
ढक्कारावरता नित्या तुलसी मणिभूषिता।
तुला चा तोलिका तीर्णा तारा तारणिका तथा॥१२७॥
तन्त्रविज्ञा तन्त्ररता तन्त्रविद्या च तन्त्रदा।
तान्त्रिकी तन्त्रयोगा च तन्त्रसारा च तन्त्रिका॥१२८॥
तन्त्रधारी तन्त्रकरी सर्वतन्त्रस्वरूपिणी।
तुहिनांशुसमानास्या तुहिनांशुसमप्रभा॥१२९॥

तुषाराकरतुल्याङ्गी तुषाराधारसुन्दरी।
तन्त्ररूपा तन्त्रेश्वरी तन्त्रसारस्वरूपिणी॥१३०॥
तुषारधामतुल्यास्या तुषारांशुसमप्रभा।
तुषाराद्रिसुता ताक्ष्र्या ताराङ्गी तालसुन्दरी॥१३१॥
तारस्वरेण सहिता तारस्वरविभूषिता।
थकारकूटनिलया थकाराक्षरमालिनी॥१३२॥
दयावती दीनरता दु:खदारिद्र्यनाशिनी।
दौर्भाग्यदु:खदलिनी दौर्भाग्यपदनाशिनी॥१३३॥
दुहिता दीनवत्सला दानवेन्द्रविनाशिनी।
दानपात्री दानरता दानसंमानतोषिता॥१३४॥
दान्त्यादिसेविता दान्ता दया दामोदरप्रिया।
दधीचिवरदा तुष्टा दानवेन्द्रविमर्दिनी॥१३५॥
दीर्घनेत्रा दीर्घकचा दीर्घनासा च दीर्घिका।
दारिद्र्यदु:खसंनाशा दारिद्र्यदु:खनाशिनी॥१३६॥
दाम्भिका दन्तुरा दम्भा दम्भासुरवरप्रदा।
धनधान्यप्रदा धन्या धनेश्वरधनप्रदा॥१३७॥
धर्मपत्नी धर्मरता धर्माधर्मविनाशिनी।
धर्मिणी धर्मिका धर्म्या धर्माधर्मविवर्द्धिनी॥१३८॥
धनेश्वरी धर्मरता धर्मानन्दप्रवर्द्धिनी।
धनाध्यक्षा धनप्रीता धनाढ्या धनतोषिता॥१३९॥
धीरा धैर्यवती धिष्ण्या धवलाम्भोजसंनिभा।
धरिणी धारिणी धात्री धूरणी धरित्री धरा॥१४०॥

टङ्कारकारिण्यै, टीकायै, सर्वटङ्कारकारिण्यै, ठंकाराङ्ग्यै, डमरुकायै, डाकारायै (डकारायै), डमरुप्रियायै, ढक्कारावरतायै, नित्यायै, तुलस्यै, मणिभूषितायै, तुलायै, तोलिकायै, तीर्णायै, तारायै, तारणिकायै, तन्त्रविज्ञायै, तन्त्ररतायै, तन्त्रविद्यायै, तन्त्रदायै, तान्त्रिक्यै, तन्त्रयोग्यायै, तन्त्रसारायै, तन्त्रिकायै, तन्त्रधार्यै, तन्त्रकर्यै, सर्वतन्त्रस्वरूपिण्यै, तुहिनांशुसमानास्यायै, तुहिनांशुसमप्रभायै, तुषाराकरतुल्याङ्ग्यै, तुषाराधारसुन्दर्यै, तन्त्ररूपायै, तन्त्रेश्वर्यै, तन्त्रसारस्वरूपिण्यै, तुषारधामतुल्यास्यायै, तुषरांशुसमप्रभायै, तुषाराद्रिसुतायै, ताक्ष्र्यायै, ताराङ्ग्यै, तालसुन्दर्यै, तारस्वर सहितायै, तारस्वर विभूषितायै, थकारकूट निलयायै, थकाराक्षरमालिन्यै, दयावत्यै, दीनरतायै, दुख-दरिद्रनाशिन्यै, दौर्भाग्यदुखदलिन्यै,

दौर्भाग्यपदनाशिन्यै, दुहितायै, दीनवत्सलायै, दानवेन्द्रविनाशिन्यै, दानपात्र्यै, दानरतायै, दानसम्मानतोषितायै, दान्त्यादिसेवितायै, दान्तायै, दयायै, दामोदर प्रियायै, दधीचिवरदायै, तुष्टायै, दानवेन्द्रविमर्दिन्यै, दीर्घनेत्रायै, दीर्घकचायै, दीर्घनासायै, दीर्घिकायै, दारिद्र्यदुखसन्नाशायै, दारिद्र्यदुखनाशिन्यै, दम्भिकायै, दन्तुरायै, दम्भायै, दम्भासुर वरप्रदायै, धन धान्य प्रदायै, धन्यायै, धनेश्वर धनप्रदायै, धर्मपत्न्यै, धर्मरतायै, धर्माधर्मविनाशिन्यै, धर्मिण्यै, धर्मिकायै, धर्म्यायै, धर्माधर्मविवर्धिन्यै, धनेश्वर्यै, धर्मानन्द प्रवर्धिन्यै, धनाध्यक्षायै, धनप्रीतायै, धनाढ्यायै, धनतोषितायै, धीरायै, धैर्यवत्यै, धिष्ण्यायै, धवलाम्भोजसन्निभायै, धरिण्यै, धारिण्यै, धात्र्यै, धूरण्यै, धरित्र्यै तथा धरायै।।८००।।

धार्मिका धर्मसहिता धर्मनिन्दकवर्जिता।
नवीना नगजा निम्ना निम्ननाभिर्नगेश्वरी।।१४१।।
नूतनाम्भोजनयना नवीनाम्भोजसुन्दरी।
नागरी नगरज्येष्ठा नगराजसुता नगा।।१४२।।
नागराजकृततोषा नागराजविभूषिता।
नागेश्वरी नागरुढा नागराजकुलेश्वरी।।१४३।।
नवीनेन्दुकला नान्दी नन्दिकेश्वरवल्लभा।
नीरजा नीरजाक्षी च नीरजद्वन्द्वलोचना।।१४४।।
नीरा नीरभवा वाणी नीरनिर्मलदेहिनी।
नागयज्ञोपवीताढ्या नगायज्ञोपवीतिका।।१४५।।
नागकेसरसंतुष्टा नागकेसरमालिनी।
नवीनकेतकीकुन्द-मल्लिकाम्भोजभूषिता।।१४६।।
नायिका नायकप्रीता नायकप्रेमभूषिता।
नायकप्रेमसहिता नायकप्रेमभाविता।।१४७।।
नायकानन्दनिलया नायकानन्दकारिणी।
नर्मकर्मरता नित्या नर्मकर्मफलप्रदा।।१४८।।
नर्मकर्मप्रिया नर्मा नर्मकर्मकृतालया।
नर्मप्रीता नर्मरता नर्मध्यानपरायणा।।१४९।।
पौष्णप्रिया च पौष्पेज्या पुष्पदामविभूषिता।
पुण्यदा पूर्णिमा पूर्णा कोटिपुण्यफलप्रदा।।१५०।।
पुराणागमगोप्या च पुराणागमगोपिता।
पुराणगोचरा पूर्णा पूर्वा प्रौढा विलासिनी।।१५१।।

प्रह्लादहृदयाह्लादगेहिनी पुण्यचारिणी।
फाल्गुनी फाल्गुनप्रीता फाल्गुनप्रेमधारिणी।।१५२।।
फाल्गुनप्रेमदा चैव फणिराजविभूषिता।
फणिकाञ्ची फणिप्रीता फणिहारविभूषिता।।१५३।।
फणीशकृतसर्वाङ्गभूषणा फणिहारिणी।
फणिशीर्षा फणिरता फणिकङ्कणधारिणी।।१५४।।
फलदा त्रिफला शक्ता फलाभरणभूषिता।
फकारकूटसर्वाङ्गी फाल्गुनानन्दवर्द्धिनी।।१५५।।
वासुदेवरता विज्ञा विज्ञविज्ञानकारिणी।
वीणावती बलाकीर्णा बालपीयूषरोचिका।।१५६।।
बाला वसुमती विद्या विद्याहारविभूषिता।
विद्यावती वैद्यप्रदप्रीता वैवस्वती बलि:।।१५७।।
बलिविध्वंसिनी चैव वराङ्गस्था वरानना।
विष्णोर्वक्षःस्थलस्था च बाग्वती विन्ध्यवासिनी।।१५८।।

धार्मिकायै, धर्मसहितायै, धर्मनिन्दक वर्जितायै, नवीनायै, नगजायै, निम्नायै, निम्ननाभ्यै, नगेश्वर्यै, नूतनाम्भोजनयनायै, नवीनाम्भोजनयनायै, नागर्यै, नगरज्येष्ठायै, नगराजसुतायै, नगायै, नागराजकृततोषायै, नागराजविभूषितायै, नागेश्वर्यै, नागरूढायै, नागराजकुलैश्वर्यै,नवीनेन्दुकलायै, नान्द्यै, नन्दिकेश्वरवल्लभायै, नीरजायै, नीरजाक्ष्यै, नीरजद्वन्द्वलोचनायै, नीरायै, नीरभवायै, वाण्यै, नीरनिर्मलदेहिन्यै, नागयज्ञोपवीताढ्यायै, नागयज्ञोपवीतकायै, नागकेसरसन्तुष्टायै, नागकेसरमालिन्यै, नवीनकेतकी कुन्द मल्लिकाम्भोजभूषितायै, नायिकायै, नायकप्रीतायै, नायकप्रेमभूषितायै, नायकप्रेमसहितायै, नायकप्रेमभवितायै, नायकानन्दनिलयायै, नायकानन्द कारिण्यै, नर्मकर्मरतायै, नित्यायै, नर्मकर्मफलप्रदायै, नर्मकर्मप्रियायै, नर्मायै, नर्मकर्मकृतालयायै, नर्मप्रीतायै, नर्मरतायै, नर्मध्यानपरायणायै, पौष्णप्रियायै, पौष्पेज्यायै, पुष्पदामविभूषितायै, पुण्यदायै, पूर्णिमायै, पूर्णायै, कोटिपुण्यफल प्रदायै, पुराणागमगोप्यायै, पुराणागमगोपितायै, पुराणगोचरायै, पूर्वायै, प्रौढायै, विलासिन्यै, प्रह्लाद हृदयाह्लादगेहिन्यै, पुण्यचारिण्यै, फाल्गुन्यै, फाल्गुन प्रीतायै, फाल्गुन प्रेम धारिण्यै, फाल्गुन प्रेमदायै, फणिराज विभूषितायै, फणिकाञ्च्यै, फणिप्रीतायै, फणिहारविभूषितायै, फणीशकृत सर्वाङ्गभूषणायै, फणिहारिण्यै, फणिशीर्षायै, फणिरतायै, फणिकङ्कणधारिण्यै, फलदायै, त्रिफलायै, शक्तायै, फलाभरणभूषितायै, फकारकूटसर्वाङ्ग्यै, फाल्गुनानन्दवर्धिन्यै, वासुदेवरतायै, विज्ञायै, विज्ञविज्ञानकारिण्यै, वीणावत्यै,

बलाकीर्णायै, बालपीयूषरोचिकायै, बालायै, वसुमत्यै, विद्यायै, विद्याहार विभूषितायै, विद्यावत्यै, वैद्यप्रदप्रीतायै, वैवस्वत्यै,वल्यै, बलि विध्वंसिन्यै, वराङ्गस्थायै, वराननायै, विष्णोर्वक्षःस्थलस्थायै, वाग्वत्यै तथा विन्ध्यवासिन्यै।।९०४।।

भीतिदा भयदा भानोरंशुजालसमप्रभा।
भार्गवेज्या भृगोः पूज्या भरद्वाजनमस्कृता।।१५९।।
भीतिहा भयसंहन्त्री भीमाकारा च सुन्दरी।
मायावती मानरता मानसंमानतत्परा।।१६०।।
माधवानन्ददा माध्वी मदिरामुदितेक्षणा।
महोत्सवगुणोपेता महती च महद्गुणा।।१६१।।
मदिरामोदनिरता मदिरामज्जने रता।
यशोधरी यशोविद्या यशोदानन्दवर्द्धिनी।।१६२।।
यशःकर्पूरधवला यशोदामविभूषिता।
यमराजप्रिया योगमार्गानन्दप्रवर्द्धिनी।।१६३।।
यमस्वसा च यमुना योगमार्गप्रवर्द्धिनी।
यादवानन्दकर्त्री च यादवानन्दवर्द्धिनी।।१६४।।
यज्ञप्रीता यज्ञमयी यज्ञकर्मविभूषिता।
रामप्रीता रामरता रामतोषणतत्परा।।१६५।।
राज्ञी राजकुलेज्या च राजराजेश्वरी रमा।
रमणी रामणी रम्या रामानन्दप्रदायिनी।।१६६।।
रजनीकरपूर्णास्या रक्तोत्पलविलोचना।
लाङ्गलिप्रेमसंतुष्टा लाङ्गलिप्रणयप्रिया।।१६७।।
लाक्षारुणा च ललना लीला लीलावती लया।
लङ्केश्वरगुणप्रीता लङ्केश्वरदायिनी।।१६८।।
लवङ्गीकुसुमप्रीता लवङ्गकुसुमस्रजा।
धाता विवस्वद्गृहिणी विवस्वत्प्रेमधारिणी।।१६९।।
शवोपरिसमासीना शववक्षःस्थलस्थिता।
शरणागतरक्षित्री शरण्या श्रीः शरद्गुणा।।१७०।।
षट्कोणमध्यमध्यस्था संपद(ह?र्थ)निषेविता।
हूँकाराकारिणी देवी हूँकाररूपशोभिता।।१७१।।
क्षेमङ्करी तथा क्षेमा क्षेमधामविवर्द्धिनी।
क्षेमाम्नाया तथाज्ञा च इडा ईश्वरवल्लभा।।१७२।।

उग्रदक्षा तथा चोग्रा अकारादिस्वरोद्भवा।
ऋकारवर्णकूटस्था ॠकारस्वरभूषिता।।१७३।।
एकारा च तथा चैका एकाराक्षरवासिता।
ऐष्टा चैषा तथा चौषा औकाराक्षरधारिणी।।१७४।।
अंअःकारस्वरूपा च सर्वागमसुगोपिता।
इत्येतत् कथितं देवि तारानामसहस्रकम्।।१७५।।

भीतिदायै, भयदायै, भानोरंशुजालसमप्रभायै, भार्गवेज्यायै, भृगुपूज्यायै, भरद्वाजनमस्कृतायै, भीतिहायै, भयसंहन्त्र्यै, भीमाकारायै, मायावत्यै, मानरतायै, मानसम्मान तत्परायै, माधवानन्ददायै, माध्व्यै, मदिरायै, मुदितेक्षणायै, महोत्सव गुणोपेतायै, महत्यै, महद्गुणायै, मदिरामोद निरतायै, मदिरमज्जनरतायै, यशोधर्यै, यशोविद्यायै, यशोदानन्दवर्धिन्यै, यशःकर्पूरधवलायै, यशोदामविभूषितायै, यमराज प्रियायै, यमुनायै, योगमार्गानन्दप्रवर्धिन्यै, यमस्वसायै, योगमार्गप्रवर्धिन्यै, यादवानन्दकर्त्र्यै, यादवानन्दवर्धिन्यै, यज्ञप्रीतायै, यज्ञमय्यै, यज्ञकर्मविभूषितायै, रामप्रीतायै, रामरतायै, रामतोषण तत्परायै, राज्ञ्यै, राजकुलेज्यायै, राजराजेश्वर्यै, रमायै, रमण्यै, रामण्यै, रम्यायै, रामानन्दप्रदायिन्यै, रजनीकरपूर्णास्यायै, रक्तोपल विलोचनायै, लाङ्गलिप्रेमसन्तुष्टायै, लाङ्गलिप्रणयप्रियायै, लाक्षायै, अरुणायै, ललनायै, लीलायै, लीलावत्यै, लयायै, लङ्केश्वरगुणप्रीतायै, लङ्केश्वरवरदायिन्यै, लवङ्गीकुसुमप्रीतायै, लवङ्गकुसुमस्रजायै, धात्र्यै, विवस्वदगृहिण्यै, विववस्त् प्रेमधारिण्यै, शवोपरिसमासीनायै, शववक्षःस्थलस्थितायै, शरणागतरक्षित्र्यै, शरण्यायै, श्रियै, शरद्गुणायै, षट्कोणमध्यमध्यस्थायै, सम्पदर्थनिषेवितायै, हूँकार कारिण्यै, हूँकाररूपशोभितायै, क्षेमंकर्यै, क्षमायै, क्षेमायै, क्षेमधामविवर्धिन्यै, क्षेमाम्नायै, आज्ञायै, इडायै, ईश्वरवल्लभायै, उग्रदक्षायै, उग्रायै, अकारादिस्वरोद्भवायै, ऋकारवर्णकूटस्थायै, ॠकारस्वरभूषितायै, एकारायै, एकायै, एकाराक्षरवासितायै, ऐष्टायै, ऐषायै, ओषायै, औकाराक्षरधारिण्यै, अंअःकारस्वरूपायै तथा सर्वागम सुगोपितायै।।१०००।। इस प्रकार हे देवि! मैंने तुमसे तारासहस्रनाम का वर्णन किया।

।। तारासहस्रनामस्तोत्रपाठ-फलश्रुतिः।।

य इदं पठति स्तोत्रं प्रत्यहं भक्तिभावतः।
दिवा वा यदि वा रात्रौ सन्ध्ययोरुभयोरपि।।१७६।।
स्तवराजस्य पाठेन राजा भवति किङ्करः।
सर्वागमेषु पूज्यः स्यात् सर्वतन्त्रे स्वयं हरः।।१७७।।
शिवस्थाने श्मशाने च शून्यागारे चतुष्पथे।
य पठेच्छृणुयाद् वापि स योगी नात्र संशयः।।१७८।।

यानि नामानि सन्त्यस्मिन् प्रसङ्गाद् मुरवैरिणः।
ग्राह्याणि तानि कल्याणि नान्यान्यपि कदाचन॥१७९॥
हरेर्नाम न गृह्णीयाद् न स्पृशेत् तुलसीदलम्।
नान्यचिन्ता प्रकर्तव्या नान्यनिन्दा कदाचन॥१८०॥

जो भी मनुष्य इस सहस्रनाम स्तोत्र का पाठ दिन में, रात्रि में अथवा दोनों संध्याओं में प्रतिदिन भक्तिभाव से करता है, इस स्तवराज के पाठ के फलस्वरुप राजा भी उस मनुष्य का सेवक हो जाता है। वह स्वयं समस्त शास्त्रों तथा सभी तन्त्रों में पूज्य शिव के समान ही होता है। जो भी साधक शिवालय, श्मशान, शून्यगृह अथवा चतुष्पथ (चौराहे) पर इस स्तोत्र का पाठ या श्रवण करता है, वह निःसन्देह योगी ही है। इस स्तोत्र में प्रसङ्गवश मुरशत्रु कृष्ण (अथवा विष्णु) से सम्बन्धित जो नाम हैं उन्हीं का ही ग्रहण करना चाहिए, अन्य नामों को स्तोत्र के मध्य में प्रयोग नहीं करना चाहिए। साधक को पाठकाल में (अथवा अन्य समय में भी) इस स्तोत्र में आये हुए विष्णु नामों के अतिरिक्त अन्य विष्णु-नामों का उच्चारण नहीं करना चाहिए तथा तुलसीदल का भी स्पर्श नहीं करना चाहिए। किसी भी अन्य देवता का ध्यान अथवा उसकी निन्दा भी नहीं करनी चाहिए।

सिन्दूरकरवीराद्यैः पुष्पैर्लोहितकैस्तथा।
योऽर्चयेद् भक्तिभावेन तस्यासाध्यं न किञ्चन॥१८१॥
वातस्तम्भं जलस्तम्भं गतिस्तम्भं विवस्वतः।
वह्नेः स्तम्भं करोत्येव स्तवस्यास्य प्रकीर्तनात्॥१८२॥
श्रियमाकर्षयेत् तूर्णमानृण्यं जायते हठात्।
यथा तृणं दहेद् वह्निस्तथारीन् मर्दयेत् क्षणात्॥१८३॥
मोहयेद् राजपत्नीश्च देवानपि वशं नयेत्।
यः पठेत् शृणुयाद् वापि एकचित्तेन सर्वदा॥१८४॥
दीर्घायुश्च सुखी वाग्मी वाणी तस्य वशङ्करी।
सर्वतीर्थाभिषेकेण गयाश्राद्धेन यत् फलम्॥१८५॥
तत्फलं लभते सत्यं यः पठेदेकचित्ततः।
येषामाराधने श्रद्धा ये तु साधितुमुद्यताः॥१८६॥
तेषां कृतित्वं सर्वं स्याद् गतिर्देवि परा च सा।

जो पुरुष (पाठ से पूर्व) सिन्दूर, करवीर आदि पुष्पों तथा लाल पुष्पों द्वारा देवी की भक्तिभाव से अर्चना करता है, संसार में उसके लिए

कुछ भी असाध्य नहीं है। इस स्तोत्र के पाठ से ही साधक वायु, जल, गति, सूर्य, अग्नि आदि का स्तम्भन करने में समर्थ हो जाता है। वह ऐश्वर्य (लक्ष्मी) का आकर्षण करने में समर्थ हो जाता है और यदि किसी का ऋणी (धन रूप से) है तो शीघ्र ही उससे मुक्त हो जाता है। जैसे अग्नि सरलता एवं शीघ्रतापूर्वक (सूखे) तिनकों (घास के ढेरों) को जला डालता है, उसी प्रकार वह साधक भी शीघ्र ही अपने शत्रुओं का पराभव अथवा विनाश कर देता है। एकाग्रचित्त से सर्वदा इसका पाठ अथवा श्रवण करने वाला व्यक्ति (राजा सहित) राजपत्नी तथा देवताओं को भी अपने वश में कर लेता है। वह दीर्घायु वाला, सर्वदा सुखी, सत्यवादी होता है। उसकी वाणी उसके नियन्त्रण में रहती है अर्थात् किसी को वर अथवा शाप देने में वह समर्थ हो जाता है अथवा उसकी वाणी अपने प्रभाव से दूसरों को वश में करने वाली हो जाती है। सभी तीर्थों में स्नान करने तथा गया तीर्थ में पितरों का श्राद्ध करने से जिस फल की प्राप्ति होती है, उसे इस स्तोत्र को एकाग्रचित्त से पाठ करने वाला मनुष्य घर बैठे ही प्राप्त कर लेता है। जिन मनुष्यों की भगवती तारा की उपासना में श्रद्धा है तथा जो निरन्तर साधना में प्रयत्नशील है, उनके सम्पूर्ण कर्मों की गति (अन्तिम परिणति) वह परा भगवती ही है अर्थात् उन भक्तों को अपने समस्त कर्मों के फलस्वरुप साक्षात् भगवती की प्राप्ति होती है।

ऋतुयुक्तलतागारे स्थित्वा दण्डेन ताडयेत्।।१८७।।
जप्त्वा स्तुत्वा च भक्तया च गच्छेद् वै तारिणीपदम्।
अष्टम्यां च चतुर्दश्यां नवम्यां शनिवासरे।।१८८।।
संक्रान्त्यां मण्डले रात्रौ अमावास्यां च योऽर्चयेत्।
वर्षं व्याप्य च देवेशि तस्याधीनाश्च सिद्धयः।।१८९।।
सुतहीना च या नारी दौर्भाग्यामयपीडिता।
बन्ध्या वा काकवन्ध्या वा मृतगर्भा च याङ्गना।।१९०।।
धनधान्यविहीना च रोगशोकाकुला च या।
सापि चैतद् महादेवि भूर्जपत्रे लेखापयेत्।।१९१।।
सव्ये भुजे च बध्नीयात् सर्वसौख्यवती भवेत्।
एवं पुमानपि प्रायो दुःखेन परिपीडितः।।१९२।।
सभायां व्यसने घोरे विवादे शत्रुसंकटे।
चतुरङ्ग च तथा युद्धे सर्वत्रापत्प्रपीडिते।।१९३।।

स्मरणादेव कल्याणि संक्षयं यान्ति दूरतः।
पूजनीयं प्रयत्नेन शून्यागारे शिवालये॥१९४॥
बिल्वमूले श्मशाने च तटे वा कुलमण्डले।
शर्करासवसंयुक्तैर्भक्तैर्दुग्धैः सपायसैः॥१९५॥
अपूपापिष्टसंयुक्तैर्नैवेद्यैश्च यथोचितैः।
निवेदितं च यद्द्रव्यं भोक्तव्यं च विधानतः॥१९६॥
तन्न चेद् भुज्यते मोहाद् भोक्तुं नेच्छन्ति देवताः।
अनेनैव विधानेन योऽर्चयेत् परमेश्वरीम्॥१९७॥
स भूमिवलये देवि साक्षादीशो न संशयः।
महाशङ्खेन देवेशि सर्वं कार्यं जपादिकम्॥१९८॥

ऋतुयुक्त लता के कुलागार में स्वदण्ड को स्थापित करके बार-बार उसे ताड़ित करते हुए भी बिना किसी विक्षोभ के जो साधक इन सहस्र नामों का पाठ करता हुआ देवी की भक्तिपूर्वक स्तुति करता है, वह भगवती तारा के पद (धाम) को प्राप्त करता है। अष्टमी, नवमी, चतुर्दशी तथा शनिवार को (अथवा शनिवासरीय इन तिथियों में) सूर्य चन्द्र के ग्रहण काल में एवं अमावस्या की रात्रि में जो साधक भगवती तारा का विशेष रूप से अर्चन करके इस स्तोत्र का पाठ वर्ष पर्यन्त करता है, सारी सिद्धियाँ उसके आधीन (वश में) हो जाती हैं। जो भी स्त्री पुत्र-रहित है, दुर्भाग्य से पीड़ित, बन्ध्या, काक-बन्ध्या(एक ही पुत्र वाली), मृत गर्भा (गर्भ में ही अथवा जन्म लेते ही जिस स्त्री की सन्तान मर जाती है), धनधान्य से रहित अथवा रोग-शोक से सदैव पीड़ित रहने वाली है, हे देवि! यदि वह स्त्री इस स्तोत्र को भोज-पत्र पर लिख (अथवा लिखवा) कर अपनी बायीं भुजा पर बांधकर सदैव धारण किये रहती है तो वह सभी प्रकार के सुखों से सम्पन्न हो जाती है। इसी प्रकार यदि पुरुष भी विभिन्न प्रकार की आपत्तियों तथा दुखों से पीड़ित है, तो उसे भी उपर्युक्त रूप से इस स्तोत्र को अपनी दाहिनी भुजा (अथवा गले) में धारण करना चाहिए।

सभा के मध्य में (किसी विषय पर वाद-विवाद के समय), विपत्ति में, शत्रुओं के साथ भयंकर संघर्ष की स्थिति में, रण भूमि में चतुरङ्गिणी सेना (अथवा चारों ओर) से घिरकर शत्रुओं (विपत्तियों) द्वारा सब प्रकार से पीड़ित होने पर, हे कल्याणि! जो भी व्यक्ति भक्तिभाव से इस स्तोत्र के माध्यम से भगवती का स्मरण करता है, उसी समय उसकी सारी विपत्तियां दूर से ही पलायन कर (सम्पूर्णतया विनष्ट हो) जाती हैं। संकट-मुक्ति के

पश्चात् (तथा सामान्य रूप से भी) मनुष्य को घर के एकान्त कक्ष (अथवा बिल्कुल ही जनशून्य गृह) शिवालय, विल्वमूल, नदी तट अथवा शक्ति मन्त्र से दीक्षिता शाक्त स्त्रियों के मध्य (उनके साथ बैठकर) भगवती तारा का सामर्थ्यानुसार प्रयत्नपूर्वक पूजन करना चाहिए। शर्करा-घृत युक्त भात, दूध, खीर, मालपुआ, हलुआ आदि से युक्त जो कुछ भी भोजन के योग्य पदार्थ हो, उसे देवी को नैवेद्य के रूप में अर्पित करना चाहिए। वाममार्गी साधक को देवी के लिए आसव भी अर्पित करना चाहिए। जो भी भोज्यपदार्थ देवी को निवेदित किया गया है उसे स्वयं भी भक्तिपूर्वक प्रसाद रूप में ग्रहण करना चाहिए। यदि कोई साधक देवी को अर्पित नैवेद्यों को मोहवश ग्रहण नहीं करता (नहीं खाता), उसके नैवेद्य को देवता भी ग्रहण करने की इच्छा नहीं करते हैं। जो मनुष्य इस प्रकार भक्तिपूर्वक सम्पूर्ण विधि-विधान एवं सामर्थ्य सहित भगवती की अर्चना करता है, हे देवि! वह इस भूमण्डल पर निःसन्देह साक्षात् शिव के समान (हो जाता) है। देवी से सम्बन्धित सभी जप आदि कर्म महाशंख की माला द्वारा ही करना चाहिए।

कुलसर्वस्वकस्यैवं प्रभावो वर्णितो मया।
न शक्यते समाख्यातुं वर्षकोटिशतैरपि॥१९९॥
किञ्चिद् मया च चापल्यात् कथितं परमेश्वरि।
जन्मान्तरसहस्रेण वर्णितुं नैव शक्यते॥२००॥
कुलीनाय प्रदातव्यं ताराभक्तिपराय च।
अन्यभक्ताय नो देयं वैष्णवाय विशेषतः॥२०१॥
कुलीनाय महेच्छाय भक्तिश्रद्धापराय च।
महात्मने सदा देयं परीक्षितगुणाय च॥२०२॥
नाभक्ताय प्रदातव्यं पथ्यन्तरपराय च।
न देयं देवदेवेशि गोप्यं सर्वागमेषु च॥२०३॥
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च।
न स्तवं दर्शयेत् कापि संदर्श्य शिवहा भवेत्॥२०४॥
पठनीयं सदा देवि सर्वावस्थासु सर्वदा।
यः स्तोत्रं कुलनायिके प्रतिदिनं भक्त्या पठेद् मानवः
स स्याद्वित्तचयैर्धनेश्वरसमो विद्यामदैर्वाक्पतिः।
सौन्दर्येण च मूर्तिमान् मनसिजः कीर्त्या च नारायणः
शक्त्या शङ्कर एव सौख्यविभवैर्भूमेः पतिर्नान्यथा॥२०५॥

इति ते कथितं गुह्यं तारानामसहस्रकम्।
अस्मात् परतरं स्तोत्रं नास्ति तन्त्रेषु निश्चयः॥२०६॥

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे
(तारासहस्रनामनिरूपणं) अष्टादशः पटलः॥१८॥

कौल (शाक्त) साधकों की सर्वस्वरूपिणी, सर्वशक्तिसमन्विता तथा सर्वशक्तिस्वरूपिणी सर्वाधारा भगवती तारा के किञ्चित प्रभाव का मेरे द्वारा वर्णन किया गया। सम्पूर्ण प्रभाव का वर्णन तो सैकड़ों करोड़ वर्षों में भी नहीं किया जा सकता। अपनी वाणी की चञ्चलता (तथा तुम्हारे प्रेमाग्रह के वशीभूत होकर ही) मैंने भगवती के सम्बन्ध में कुछ कहने की धृष्टता की है, वैसे तो हजारों जन्मों में भी इनके महत्व का वर्णन करना असम्भव ही है। भगवती के इस सहस्रनाम का ज्ञान (उपदेश) केवल शाक्त साधक कौल सम्प्रदाय से सम्बन्धित तारा भक्ति परायण व्यक्ति को ही प्रदान करना चाहिए। अन्य देवता के उपासकों, विशेषत: वैष्णवों को इसका उपदेश नहीं करना चाहिए। जो मनुष्य कुलीन (शक्त्युपासक) अपने महान कल्याण (मोक्ष) का इच्छुक, श्रद्धाभक्ति परायण, उदार चित्त वाला हो तथा गुरु द्वारा जिसके गुणों का भली-भाँति परीक्षण किया जा चुका हो, उसे ही इसका उपदेश करना चाहिए। जो मनुष्य भगवती का भक्त न हो अथवा अन्य सम्प्रदाय से सम्बन्धित हो उसे तथा पूजन-जप आदि से रहित एवं स्त्री तथा देवताओं की निन्दा करने वाले व्यक्ति को, सर्वतन्त्र शास्त्रों में गोपनीय कहे गये इस स्तोत्र का उपदेश नहीं करना चाहिए। जो भी मनुष्य इसकी अवहेलना कर स्तोत्र को अनाधिकारी व्यक्ति के समक्ष प्रकाशित करता है, वह शिव-हत्या के पाप का भागी होता है। इस सहस्रनाम स्तोत्र का पाठ साधक सर्वदा सभी अवस्थाओं में कर सकता है। सामान्य रूप से शुद्धि-अशुद्धि तथा काल का कोई विशेष प्रतिबन्ध इस पर आरोपित नहीं है। हे कुलनायिके! जो भी साधक भक्ति सहित प्रतिदिन इस स्तोत्र का पाठ करता है, धन-संपत्ति के संग्रह में कुबेर के समान, विद्या तथा गौरव में वृहस्पति के तुल्य, सौन्दर्य में द्वितीय कामदेव विग्रहवत् तथा यशोपलब्धि में साक्षात् नारायण के समकक्ष हो जाता है। वह शक्ति सामर्थ्य द्वारा शङ्कर की समता तथा सुख-सम्पत्ति एवं ऐश्वर्य की प्राप्ति द्वारा इस संसार में पृथिवीपति महाराज की भाँति शोभित होता है। मेरा यह कथन कभी मृषा (असत्य) नहीं हो सकता। हे देवि! यह मैंने तुमसे तारासहस्र नाम स्तोत्र का वर्णन किया।

निश्चय ही समस्त तन्त्रागमों में इससे बढ़कर श्रेष्ठ कल्याणकारी अन्य कोई स्तोत्र नहीं है।

।। श्री बृहन्नील तन्त्र के भैरव-भैरवी संवाद के अन्तर्गत
तारासहस्र नाम निरूपण नामक अट्ठारहवें पटल की
'आशा-सुशीला' हिन्दी व्याख्या सम्पूर्ण हुई।।

* * *

॥ एकोनविंशः पटलः॥

(तारा कवच-गुप्त मन्त्र निरूपणम्)

॥ तारा-कवच-माहात्म्यम्॥

श्रीभैरव उवाच

**अथ वक्ष्ये महेशानि कवचं परमाद्भुतम्।
यज्ज्ञात्वा साधकाः सर्वे अवश्यं मुक्तिमाप्नुयुः॥१॥
श्रूयतां परमं गुह्यं कवचं मन्मुखोदितम्।
जपाद्धि सर्वकल्याणं जायते नात्र संशयः॥२॥
अप्रकाश्यं महादेवि तव स्नेहात् प्रकाशितम्।
उद्धृतं सारभूतानां सारात् सारतरं परम्॥३॥
कवचं धारयेद् यस्तु पठेद् वा भक्तिभावतः।
स शिवः स च विद्येशः स च योगी न संशयः॥४॥
कवचेन बिना देवि योऽर्चयेत् तारिणीं पराम्।
कल्पकोटिशतेनापि न सिद्धिर्जायते प्रिये॥५॥**

हे महेशानि! अब मैं भगवती तारा के परम आश्चर्यजनक (फलदायक) कवच-स्तोत्र का वर्णन करता हूँ, जिसका ज्ञान प्राप्त कर (तथा उसका नित्य भक्ति सहित पाठ करके) सभी साधक निश्चय ही मुक्ति को प्राप्त करने में समर्थ हो जाते हैं। तुम साक्षात् मेरे मुख से प्रकट होने (कहे जाने) वाले इस परमगोपनीय कवच को सुनो। इसके पाठ से निःसन्देह साधक का सर्वविध कल्याण होता है। समस्त तन्त्रशास्त्रों के सार भाग को ग्रहण कर पुनः उसके सार के भी सारतर भाग के रूप में कहे गये इस परमोत्तम कवच को जो भी मनुष्य भक्तिभाव से अपने चित्त में धारण करता है, वही निःसन्देह शिव-वृहस्पति (के तुल्य) तथा योगी है। हे देवि! इस कवचपाठ के बिना जो भी साधक पराशक्ति तारा की अर्चना करता है, उसे सैकड़ों करोड़ों कल्पों तक अर्चना करने पर भी सिद्धि की प्राप्ति नहीं होती है।

।। तारा-कवच-स्तोत्रम्।।

ब्रह्मविष्णुशिवानां च बीजं रक्षतु मूलकम्।
तदैव शक्तिमूलं च लिङ्गं रक्षतु यत्नतः।।६।।
मणिपूरं सदा पातु वधूबीजमशेषतः।
अनाहतं वर्मबीजं पातु मे सर्वसर्वतः।।७।।
अस्त्रादि सर्वदा पातु विशुद्धं कण्ठदेशकम्।
शेषं हि पातु मे नित्यमाज्ञास्थानं द्विपत्रकम्।।८।।
शीर्ष पातु सदा तारा जटा पातु सदाननम्।
नीलासरस्वती पातु हृदयं मे सदा पुनः।।९।।
मूलाधारं सदा पातु महानीलसरस्वती।
अक्षोभ्यः पातु सर्वाङ्गं बृहती पातु भालकम्।।१०।।
उग्रतारा देवता मे शङ्खं रक्षतु सर्वदा।
कर्णौ (तु) मे सदा पातु ह्रींबीजं तदशेषतः।।११।।

ब्रह्मा, विष्णु तथा शिव के बीज स्वरूप वाला 'ॐ' मेरे मूल (मूलाधार) की रक्षा करे। इसी प्रकार समस्त शक्तियों का जो मूल है, वह 'ह्रीं' मेरे लिङ्ग (स्वाधिष्ठान चक्र) की रक्षा करे। वधू बीज 'स्त्रीं' सम्पूर्ण 'मणिपूर' चक्र की सदा रक्षा करे। वर्मबीज 'हूं' चारों ओर से मेरे पूरे 'अनाहत' चक्र की रक्षा करे। तारा मन्त्र का पञ्चम अस्त्र बीज (फट्) सर्वदा कण्ठ में स्थित विशुद्ध चक्र की रक्षा करे। शेष भाग (स्वाहा) द्विदल वाले मेरे आज्ञाचक्र की सदा रक्षा करे। मेरे शीर्ष की तारा तथा मुख की एकजटा नित्य रक्षा करे, नीलसरस्वती सदैव हृदय की रक्षा करती रहे। पुनः मूलाधार की (मन्त्र देवता) महानील सरस्वती सदैव रक्षा करें। सर्वाङ्गों की अक्षोभ्य (ऋषि) तथा वृहती (छन्द) भाल की रक्षा करे। उग्रतारा देवता मेरे शंख (कनपटी स्थल अथवा गले) की सर्वदा रक्षा करें। दोनों कर्णों की 'ह्रीं' बीज सम्पूर्णतः रक्षा करे।

स्तनद्वयं सदा पातु हूंशक्तिर्विघ्नघातकः।
रसनां मे सदा पातु लक्ष्मीर्देवी च शाश्वती।।१२।।
रसनाग्रं सदा पातु सरस्वती प्रयत्नतः।
रतिः पातु सदा बीजं प्रीतिर्मे वदनं सदा।।१३।।
कीर्तिः कीर्ति सदा पातु शान्तिः शान्ति सदावतु।
पुष्टिर्मे पातु पुष्टिं च तुष्टिसंतुष्टि सदावतु।।१४।।
वैरोचनः सदा पातु शङ्खं च शङ्खपाण्डुरः।
पाण्डुरो मे सदा गुह्यं पातु नित्यं च सर्वशः।।१५।।

पद्मनाभः सदा पातु नाभिं मे दशपत्रिकाम्।
असिताङ्गः पातु लिङ्गं नामकः पातु कर्णकौ॥१६॥
मामकः पातु मे बाहू हस्तौ पातु महेश्वरी।
तारा मे पातु सततं पृष्ठं पद्मान्तको मम॥१७॥

विघ्नों का विनाश करने वाली 'हूँ कार' शक्ति मेरे दोनों स्तनों (दोनों वक्षस्थलों) की रक्षा करे। सनातनी देवी लक्ष्मी मेरी जिह्वा की रक्षा करें। रति मेरे बीज (शुक्र) की तथा प्रीति सदैव मुख की रक्षा करे। कीर्ति मेरे यश की, शान्ति मेरे शान्ति की, पुष्टि मेरे जीवन में पुष्टि की तथा तुष्टि सदा मेरे मनस्तुष्टि की रक्षा करे। वैरोचन मेरे शंखस्थल को तथा शंख पाण्डुर एवं पाण्डुर सब प्रकार से मेरे गुह्य भाग की नित्य रक्षा करे। पद्नाभ दश दल वाले नाभिस्थ पद्म मणिपूरक चक्र की, असिताङ्ग लिङ्ग की तथा नामक मेरे दोनों कर्णो की रक्षा करें। मामक दोनों बाहुओं तथा महेश्वरी दोनों हाथों की रक्षा करे। पद्मान्तक के मेरे पृष्ठ भाग की तथा तारा निरन्तर मेरी रक्षा करें।

पार्श्वे मे च सदा पा(तु?तां)यमान्तकवदान्तकौ।
चरणौ मे सदा पातां विघ्नान्तनरकान्तकौ॥१८॥
तारा मे पातु सततं अष्टाङ्गं परमेश्वरी।
इतीदं कवचं देवि कथितं मन्मुखोदितम्॥१९॥
प्रमादात् परमेशानि न प्रकाश्यं कदाचन।
योगिनीभिस्तदा हन्यात्स्वयं च वधकारिणी॥२०॥
यदि भाग्यवशाद् देवि लब्धं साधकसत्तमैः।
तदा तस्य महासिद्धिर्जायते देवि निश्चितम्॥२१॥
निषिद्धेभ्यो न दातव्यं न प्रकाश्यं कदाचन।
यदि दद्याद् निषिद्धेभ्यो तदा मृत्युमवाप्नुयात्॥२२॥
दद्यात् शान्ताय शिष्याय तन्त्रमन्त्रयुताय च।
गुरुभक्तियुतायैव तत्र सिद्धिरनुत्तमा॥२३॥

यमान्तक तथा वदान्तक मेरे दोनों पार्श्व भागों की सदा रक्षा करें। विघ्नान्तक तथा नरान्तक सदैव मेरे दोनों चरणों की रक्षा करें। परमेश्वरी तारा सदैव मेरे अष्टाङ्गों की रक्षा करें। कथन के माध्यम द्वारा अनायास मेरे मुख से प्रकट हुए इस कवच को हे देवि! परमेशानि! अपनी असावधानीवश किसी अपात्र के सम्मुख कभी प्रकाशित न करना। अन्यथा वध करने वाली स्वयं योगिनियों के द्वारा ही वह (इस कवच को प्रकाशित करने वाला) मारा

जाता है। यदि सौभाग्यवश किसी श्रेष्ठ गुणवान साधक को इस कवच की उपलब्धि हो जाती है, तो निश्चय ही उसे महान सिद्धियों की प्राप्ति हो जाती है। जो मनुष्य इस कवच की प्राप्ति के लिए निषिद्ध (अपात्र) हैं, उन्हें न तो इसका उपदेश प्रदान करे और न ही उनके सामने इसका कथन करे। यदि कोई व्यक्ति अनधिकारी को भी इसका ज्ञान प्रदान करता है तो अवश्य ही वह मृत्यु का वरण करता है। शान्त चित्त वाले संयमी, पूजन-जपादि तन्त्र साधना युक्त तथा गुरु में देवतावत् भक्तिभाव रखने वाले सत् शिष्य को ही इस कवच का उपदेश करना चाहिए जिससे उस शिष्य को सर्वश्रेष्ठ सिद्धियों की प्राप्ति होती है।

रहस्य कथितं सर्वमनन्तफलदायकम्।
गोप्तव्यं परमेशानि न प्रकाश्यं कदाचन॥२४॥
कवचेन बिना देवि योऽर्चयेत् तारिणीं शिवाम्।
तमश्नाति महोग्रा सा योगिनीभिः सुनिश्चितम्॥२५॥
इति ते कथितं गुह्यं कवचं देवि दुर्लभम्।
अथ वक्ष्ये महेशानि गोपनीयं प्रयत्नतः॥२६॥

हे परमेशानि! अनन्तफलों को प्रदान करने वाले रहस्य युक्त इस कवच को मैंने सम्पूर्ण रूप से कहा। इसे सदैव गुप्त रखना, कभी अनावश्यक रूप से प्रकाशित न करना। जो साधक कवच (पाठ के) बिना शिवारूपिणी तारा की अर्चना करता है उसे निश्चय ही वह महोग्रा देवी योगिनियों के साथ भक्षित कर लेती है। हे देवि! तुमसे यह मैंने गुह्य एवं दुर्लभ कवच का वर्णन किया। अब आगे जो कहने जा रहा हूँ, उसे भी सब प्रकार से गुप्त ही रखना।

॥ त्र्यक्षरी गुप्तमन्त्रोद्धार साधनञ्च॥

गुप्तमन्त्रं गुप्तजापं शृणुष्व क(म)लानने।
महाशक्तिं समुद्धृत्य मातङ्गीं परमेश्वरीम्॥२७॥
वह्निबीजं महेशानि बीजत्रयमुदाहृतम्।
बीजत्रयात्मकं मन्त्रं सर्वसारस्वतप्रदम्॥२८॥
एकादशसहस्रं तु पुरश्चरणमिष्यते।
होमयेत् तद्दशांशेन दशांशनैव तर्पणम्॥२९॥
अभिषेकं दशांशेन भोजयेद् ब्राह्मणान् दश।
मधूनि पायसं चैव महाज्यं च महेश्वरि॥३०॥
जुहुयाद् भक्तिभावेन सर्वतन्त्रेषु गोपितम्।
अनेन मन्त्रराजेन साधयेत् तारिणीं शुभाम्॥३१॥

(श्लोक २७ तथा २८ के द्वारा वास्तव में महानील सरस्वती के त्र्यक्षरी मन्त्र का उद्धार कहा गया है, जो सारस्वतप्रद है, परन्तु दोनों श्लोक अशुद्ध हैं।)

हे कमलानने! अब मैं एक अत्यन्त गोपनीय मन्त्र को, जिसका जप भी गुप्त रूप से करना चाहिए, कहता हूँ। तीन बीजों से युक्त यह मन्त्र सारस्वत (ज्ञान विद्या) प्रदान करने वाला कहा जाता है।

मन्त्र स्वरूप – **"ह्रीं स्त्रीं हूँ।"**

ग्यारह हजार जप द्वारा इसका पुरश्चरण कहा गया है। जप का दशांश हवन तथा हवन का दशांश तर्पण करना चाहिए। तर्पण का दशांश अभिषेक तथा दश ब्राह्मणों को भोजन प्रदान करना चाहिए। तर्पण-अभिषेक की संख्या एक सौ आठ से कम होने पर भी इतनी (१०८) संख्या में अवश्य करना चाहिए। मधुत्रय, खीर तथा घृत से साधक को भक्तिभाव से हवन करना चाहिए। इस प्रकार इस मन्त्रराज के द्वारा भगवती तारा की साधना करनी चाहिए।

ततः सिद्धो महादेवि भवत्येव महेश्वरि।
युवतीयोनिदेशे तु हस्तमारोप्य सुन्दरि॥३२॥
उत्तरास्यो महेशानि भूत्वा परमसुन्दरीम्।
तारिणीं भावयेद् देवि मनसा काममोहिनीम्॥३३॥
संभाव्य परमेशानि योनिमध्ये महेश्वरि।
तत्र मुखं समानीय जपेदष्टोत्तरं शतम्॥३४॥
सिद्धमन्त्री महेशानि जायते नात्र संशयः।
पञ्चदिनप्रयोगेन कुबेर इव जायते॥३५॥
सर्वैश्वर्ययुतो भूत्वा विहरेत् क्षितिमण्डले।
अष्टोत्तरशतं जप्यं स्तनमर्दनपूर्वकम्॥३६॥
क्षिपेत् लिङ्गं योनिगर्ते लघु शीर्षे च मस्तकम्।
घाताघातेन देवेशि शुक्रमुत्सार्य सुन्दरि॥३७॥
वामहस्ते तदाधाय तिलकं कारयेद् यदि।
सर्वसंपत्तिमान् भूत्वा मोदते पृथिवीतले॥३८॥
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः।
तस्य पादपद्मद्वन्द्वं रा(ज्ञः?ज्ञां)किरीटभूषणम्॥३९॥
सभायां जायते देवि बृहस्पतिरिवापरः।
इति ते कथितं गुप्तमन्त्रजापं महाधनम्॥४०॥

मन्त्रराजं महादेवि कथितं नगनन्दिनि।
गोपनीयं पशोरग्रे सिद्धमन्त्रं सदा शिवे।।४१।।

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे
(ताराकवच-गुप्तमन्त्रनिरूपणं)एकोनविंश पटलः।।१९।।

उपर्युक्त पुरश्चरण रूप पञ्चाङ्गों सहित भगवती तारा की साधना करने से, हे महादेवि साधक को मन्त्र-सिद्धि प्राप्त हो जाती है। हे सुन्दरि! जो साधक उत्तर की ओर मुख करके बैठकर, युवती की योनि स्थल पर अपना हाथ रखकर, परमसुन्दरी-काममोहिनी तारा का मानसिक ध्यान करके तथा योनि के मध्य भगवती की स्थिति की सम्भावना करके, उसके समीप स्वमुख को लाकर उपर्युक्त त्रिबीजात्मक मन्त्र का एक सौ आठ बार (प्रतिदिन) जप करता है, तो हे महेशानि! उस साधक को निश्चय ही मन्त्र-सिद्धि की प्राप्ति हो जाती है। इस प्रयोग को केवल पाँच दिनों तक करने से ही मनुष्य समस्त ऐश्वर्यों से युक्त कुबेर के समान होकर पृथिवी मण्डल पर सुख पूर्वक विहार (जीवन व्यतीत) करता है।

जो साधक स्त्री स्तन का मर्दन करते हुए मन्त्र का एक सौ आठ बार जप करके फिर स्त्री-योनि में स्वलिङ्ग को प्रविष्ट करके पहले धीरे-धीरे पुनः शीघ्रता पूर्वक उसके मस्तक पर बार-बार आघात करके शुक्र का उत्सर्जन कर तथा उसे बांये हाथ में लेकर स्वयं मस्तक पर तिलक करता है, वह सर्वसम्पत्तिशाली होकर इस भूतल पर आनन्दपूर्ण जीवन व्यतीत करता है। राजा भी ऐसे साधक की दासता स्वीकार कर लेते हैं, फिर दूसरे सामान्य व्यक्तियो की बात ही क्या है। उसके दोनों चरण कमल सदा राजाओं के मुकुट रूपी आभूषणों से सुशोभित होते रहते हैं। राज-सभा (अथवा विद्वानों की सभा) के मध्य वह द्वितीय-वृहस्पति के समान प्रतीत होता है। हे महादेवि पार्वति! मैने तुमसे परम वैभवशाली मन्त्र राजस्वरूप इस गुप्त मन्त्र के जपविधि का वर्णन किया। हे शिवे! इस सिद्धमन्त्र को सदैव गुप्त ही रखना, किसी पशु साधक के समक्ष कभी भी प्रकाशित न करना।

।।श्री बृहन्नील तन्त्र के भैरव-भैरवी संवाद के अन्तर्गत
तारा कवच-गुप्त मन्त्र निरूपण नामक
उन्नीसवें पटल की 'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

◆

॥ विंशः पटलः॥

(तारा-शतनाम-निरूपणम्)

॥ तारा-शतनाम-निरूपण-हेतवे प्रार्थना॥

श्रीदेव्युवाच

पूर्वं संसूचितं देव नाम्नां शतं महेश्वर।
यत्नैः शतैर्महादेव मयि नात्र प्रकाशितम्॥१॥
पठित्वा परमेशान हठात् सिद्ध्यति साधकः।
नाम्नां शतं महादेव कथयस्व समासतः॥२॥

हे महेश्वर! आपने पूर्वकाल में तारा-वर्णन प्रसङ्ग में भगवती तारा के शतनामों के सम्बन्ध में सङ्केत किया था। परन्तु सैकड़ों बार प्रयत्न करने (पूछने) पर भी आपने उनका वर्णन नहीं किया। हे परमेशान! महादेव! जिस शतनाम के पढ़ने (पाठ) मात्र से साधक को वरवश ही सिद्धियों की प्राप्ति हो जाती है, उसे संक्षेप में आप मुझसे कहें।

॥ तारा-शतनाम स्तोत्रस्य माहात्म्यम्॥

श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि भक्तानां हितकारकम्।
यज्ज्ञात्वा साधकाः सर्वे जीवन्मुक्तिमुपागताः॥३॥
कृतार्थास्ते हि विस्तीर्णा यान्ति देवीपुरे स्वयम्।
नाम्नां शतं प्रवक्ष्यामि जपात स(ा)र्वज्ञदायकम्॥४॥
नाम्नां सहस्रं संत्यज्य नाम्नां शतं पठेत् सुधीः।
कलौ नास्ति महेशानि कलौ नान्या गतिर्भवेत्॥५॥
शृणु साध्वि वरारोहे शतं नाम्नां पुरातनम्।
सर्वसिद्धिकरं पुंसां साधकानां सुखप्रदम्॥६॥

हे देवि! भक्तों के लिए सर्वविध कल्याणकारक उस ताराशतनाम स्तोत्र को मैं कहता हूँ, जिसे जानकर (नित्य श्रद्धा सहित पाठ करने से) मनुष्य इस जीवन में ही जीवन्मुक्ति रूप आनन्द को प्राप्त कर कृतार्थ हो

देहावसानोपरान्त देवी धाम को प्रयाण करता है। यह शतनाम स्तोत्र साधक को सर्वज्ञता प्रदान करने वाला है। इस कलियुग में इसके अतिरिक्त मनुष्य के कल्याण हेतु अन्य कोई श्रेष्ठ साधन नहीं है। साधकों को चाहिए कि वे तारा-सहस्रनाम को छोड़कर केवल शतनाम का ही आश्रय ग्रहण करें, क्योंकि यह मनुष्यों को सर्वप्रकार की सिद्धि देने वाला तथा उन्हें (साधकों को) सुख प्रदान करने वाला (साधन में सुखद) है।

।। तारा-शतनाम-स्तोत्रम्।।

तारिणी तारसंयोगा महातारस्वरूपिणी।
तारकप्राणहर्त्री च तारानन्दस्वरूपिणी।।७।।
महानीला महेशानि महानीलसरस्वती।
उग्रतारा सती साध्वी भवानी भवमोचिनी।।८।।
महाशङ्‌खरता भीमा शाङ्करी शङ्करप्रिया।
महादानरता चण्डी चण्डासुरविनाशिनी।।९।।
चन्द्रवद्‌रूपवदना चारुचन्द्रमहोज्ज्वला।
एकजटा कुरङ्गाक्षी वरदाभयदायिनी।।१०।।
महाकाली महादेवी गुह्यकाली वरप्रदा।
महाकालरता साध्वी महैश्वर्यप्रदायिनी।।११।।
मुक्तिदा स्वर्गदा सौम्या सौम्यरूपा सुरारिहा।
शठविज्ञा महानादा कमला बगलामुखी।।१२।।
महामुक्तिप्रदा काली कालरात्रिस्वरूपिणी।
सरस्वती सरिच्‌श्रेष्ठा स्वर्गङ्गा स्वर्गवासिनी।।१३।।
हिमालयसुता कन्या कन्यारूपविलासिनी।
शवोपरिसमासीना मुण्डमालाविभूषिता।।१४।।
दिगम्बरा पतिरता विपरीतरतातुरा।
रजस्वला रजःप्रीता स्वयम्भूकुसुमप्रिया।।१५।।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्सुका।
शिवप्राणा शिवरता शिवदात्री शिवासना।।१६।।
अट्‌टहासा घोररूपा नित्यानन्दस्वरूपिणी।
मेघवर्णा किशोरी च युवतीस्तनकुङ्कुमा।।१७।।
खर्वा खर्वजनप्रीता मणिभूषितमण्डना।
किङ्किणीशब्दसंयुक्ता नृत्यन्ती रक्तलोचना।।१८।।

कृशाङ्गी कृसरप्रीता शरासनगतोत्सुका।
कपालखर्परधरा पञ्चाशन्मुण्डमालिका।।१९।।
हव्यकव्यप्रदा तुष्टिः पुष्टिश्चैव वराङ्गना।
शान्तिः क्षान्तिर्मनो बुद्धिः सर्वबीजस्वरूपिणी।।२०।।
उग्रापत्तारिणी तीर्णा निस्तीर्णगुणवृन्दका।
रमेशी रमणी रम्या रामानन्दस्वरूपिणी।।२१।।
रजनीकरसंपूर्णा रक्तोत्पलविलोचना(१००)।
इति ते कथितं दिव्यं शतं नाम्नां महेश्वरि।।२२।।

यदि साधक (उपासक) इस शतनाम स्तोत्र के पाठ के पूर्व अथवा पश्चात् चतुर्थ्यन्त नामों के पूर्व 'ॐ' तथा पश्चात् में 'नमः' का संयोग कर नाम मन्त्रों का उच्चारण करते हुए भगवती तारा की रक्त पुष्पों से अर्चना भी करे (अथवा यदि केवल नाम मन्त्रों से ही अर्चना करे) तो उसके लिए अति श्रेयस्कर होगा। अतः यहाँ प्रत्येक नाम को चतुर्थ्यन्त रूप से ही दिया जा रहा है।

तारिण्यै, तारसंयोगायै, महातारस्वरूपिण्यै, तारक प्राण हर्त्र्यै, तारानन्द स्वरूपिण्यै, महानीलायै, महेशान्यै, महानील सरस्वत्यै, उग्रतारायै, सत्यै, साध्व्यै, भवान्यै, भवमोचिन्यै, महाशंखरतायै, भीमायै, शाङ्कर्यै, शङ्करप्रियायै, महादानरतायै, चण्ड्यै, चण्डासुरविनाशिन्यै, चन्द्रवद्रूपवदनायै, चारुचन्द्रमहोज्ज्वलायै, एकजटायै, कुरङ्गाक्ष्यै, वरदायै, अभयदायिन्यै, महाकाल्यै, महादेव्यै, गुह्यकाल्यै, वरप्रदायै, महाकालरतायै, महैश्वर्यप्रदायिन्यै, मुक्तिदायै, स्वर्गदायै, सौम्यायै, सौम्यरूपायै, सुरारिहायै, शठविज्ञायै, महानादायै, कमलायै, बगलामुख्यै, महामुक्तिप्रदायै, काल्यै, कालरात्रिस्वरूपिण्यै, सरस्वत्यै, सरित्श्रेष्ठायै, स्वर्गङ्गायै, स्वर्गवासिन्यै, हिमालय सुतायै, कन्यायै, कन्यारूपविलासिन्यै, शवोपरिसमासीनायै, मुण्डमालाविभूषितायै, दिगम्बरायै, पतिरतायै, विपरीतरतातुरायै, रजस्वलायै, रजःप्रीतायै, स्वयम्भूकुसुमप्रियायै, स्वयम्भूकुसुमप्राणायै, स्वयम्भूकुसुमोत्सुकायै, शिवप्राणायै, शिवरतायै, शिवदात्र्यै, शिवासनायै, अट्टहासायै, घोररूपायै, नित्यानन्दस्वरूपिण्यै, मेघवर्णायै, किशोर्यै, युवत्यै, स्तनकुंकुमायै, खर्वायै, खर्वजनप्रीतायै, मणिभूषितमण्डनायै, किङ्किणीशब्दसंयुक्तायै, नृत्यन्त्यै, रक्तलोचनायै, कृशाङ्ग्यै, कृसरप्रीतायै, शरासनगतोत्सुकायै, कपालखर्परधरायै, पञ्चाशन्मुण्डमालिकायै, हव्यकव्यप्रदायै, तुष्ट्यै, पुष्ट्यै, वराङ्गनायै, शान्त्यै, क्षान्त्यै, मनोबुद्ध्यै, सर्वबीजस्वरूपिण्यै, उग्रापत्तारिण्यै, तीर्णायै, निस्तीर्णगुणवृन्दकायै, रमेश्यै, रमण्यै, रम्यायै, रामानन्दस्वरूपिण्यै, रजनीकरसम्पूर्णायै तथा रक्तोपलविलोचनायै।।१००।। हे महेश्वरि! भगवती तारा के इन सौ नामों को मैंने तुमसे कहा।

।। फल–श्रुतिः।।

प्रपठेद् भक्तिभावेन तारिण्यास्तारणक्षमम्।
सर्वासुरमहानादस्तूयमानमनुत्तमम् ।।२३।।
षण्मासाद् महदैश्वर्यं लभते परमेश्वरि।
भूमिकामेन जप्तव्यं वत्सरात्तां लभेत् प्रिये।।२४।।
धनार्थी प्राप्नुयादर्थं मोक्षार्थी मोक्षमाप्नुयात्।
दारार्थी प्राप्नुयाद् दारान् सर्वागम(पुरो?प्रचो)दितान्।।२५।।
अष्टम्यां च शतावृत्त्या प्रपठेद् यदि मानवः।
सत्यं सिद्ध्यति देवेशि संशयो नास्ति कश्चन।।२६।।
अति सत्यं पुनः सत्यं सत्यं सत्यं महेश्वरि।
अस्मात् परतरं नास्ति स्तोत्रमध्ये न संशयः।।२७।।

समस्त देवताओं द्वारा स्तुति रूप में उच्च स्वरों से गाये जाने वाले भगवती तारा के इस मुक्तिप्रद सर्वोत्तम स्तोत्र का पूर्ण भक्तिभाव सहित साधक को पाठ करना चाहिए। जो भी मनुष्य ऐसा प्रतिदिन करता है, हे परमेश्वरि! उसे छः मास में ही महान ऐश्वर्य की प्राप्ति हो जाती है तथा भूमि की कामना से पाठ करने वाले की वर्ष भर में ही उसकी अभिलाषा पूरी हो जाती है। इस स्तोत्र के नियमित पाठ से सम्पत्ति का अभिलाषी धन, मोक्ष का इच्छुक मुक्ति, स्त्री (पत्नी) की कामना वाला पत्नी तथा समस्त शास्त्रों में वर्णित और जो भी कुछ फल प्राप्तियाँ हैं, उन्हें भी भगवती तारा की कृपा से मनुष्य प्राप्त कर लेता है। इस शतनाम स्तोत्र का नियमित पाठ करते हुए प्रत्येक अष्टमी को (संभव हो तो रात्रि में पूजन के पश्चात्) सौ पाठ करने वाला मनुष्य अवश्य ही सिद्धि को उपलब्ध हो जाता है। हे महेश्वरि! मेरा यह कथन सत्य है, सत्य है, निःसन्देह पूर्णतया सत्य है। भगवती की सभी स्तुतियों में इससे बढ़कर श्रेष्ठ तथा कल्याणकारी अन्य कोई स्तोत्र नहीं है।

।। सर्वविद्याप्राप्त्युपायः (साधनम्)।।

नाम्नां शतं पठेद् मन्त्रं संजप्य भक्तिभावतः।
प्रत्यहं प्रपठेद् देवि यदीच्छेत् शुभमात्मनः।।२८।।
इदानीं कथयिष्यामि विद्योत्पत्तिं वरानने।
येन विज्ञानमात्रेण विजयी भुवि जायते।।२९।।
योनिबीजत्रिरावृत्त्या मध्यरात्रौ वरानने।
अभिमन्त्र्य जलं स्निग्धं अष्टोत्तरशतेन च।।३०।।

तञ्जलं तु पिबेद् देवि षणमासं जपते यदि।
सर्वविद्यामयो भूत्वा मोदते पृथिवीतले।।३१।।

यदि कोई मनुष्य अपना सर्वविध कल्याण चाहता है तो उसे नित्य भगवती के पूजन–मन्त्र जप के पश्चात् श्रद्धा–भक्ति सहित इस स्तोत्र का पाठ करना चाहिए। अब मैं इस स्तोत्र के पाठ द्वारा सभी प्रकार की विद्याओं की प्राप्ति के साधन को कहता हूँ। जिसको क्रिया–विधि सहित जानने मात्र से ही मनुष्य संसार में सर्वत्र विजय प्राप्त कर लेता है। यदि मनुष्य प्रत्येक रात्रि में 'ऐं' बीज से सम्पुटित कर शतनाम स्तोत्र की तीन आवृत्ति पाठ करे (अथवा त्रि–आवृत्ति रूप 'ऐं' का एक सौ आठ बार जप करे) तथा पाठोपरान्त 'ऐं' से ही (अथवा त्रि आवृत्ति रूप 'ऐं ऐं ऐं' से) एक सौ आठ बार अभिमंत्रित करके जल का पान करे तो छः मास में सभी विद्याओं को प्राप्त कर स्वयं विद्यामय सा होकर इस संसार में सुखपूर्वक निवास करता है।

।। शक्ति माहात्म्यं तत्साक्षात्कारम् च।।

शक्तिरूपां महादेवीं शृणु हे नगनन्दिनि।
वैष्णवः शैवमार्गो वा शाक्तो वा गाणपोऽपि वा।।३२।।
तथापि शक्तेराधिक्यं शृणु भैरवसुन्दरि।
सच्चिदानन्दरूपाच्च सकलात् परमेश्वरात्।।३३।।
शक्तिरासीत् ततो नादो नादाद् बिन्दुस्ततः परम्।
अथ बिन्द्वात्मनः कालरूपबिन्दुकलात्मनः।।३४।।
जायते च जगत्सर्व सस्थावरचरात्मकम्।
श्रोतव्यः स च मन्तव्यो निर्ध्यातव्यः स एव हि।।३५।।
साक्षात्कार्यश्च देवेशि आगमैर्विविधैः शिवे।
श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यो मननादिभिः।।३६।।
उपपत्तिभिरेवायं ध्यातव्यो गुरुदेशतः।
तदा स एव सर्वात्मा प्रत्यक्षो भवति क्षणात्।।३७।।

निष्कल निराकार ब्रह्म की उपासना उसके सकल–साकार विष्णु–शिव–शक्ति–गणेश तथा सूर्य इन पाँच रूपों द्वारा की जाती है। इन्हीं के आधार पर इनके साधना मार्गों तथा साधकों को क्रमशः वैष्णव–शैव–शाक्त–गाणपत्य तथा सौर कहा जाता है। परन्तु इन सभी साधना मार्गों तथा साधकों में 'शाक्त' को, शक्ति का विशेष महत्व होने के कारण अत्यधिक श्रेष्ठ माना जाता है। क्योंकि सच्चिदानन्द स्वरूप सकल परमेश्वर से सर्वप्रथम शक्ति की ही उत्पत्ति होती है, फिर शक्ति से नाद तथा नाद से बिन्दु की उत्पत्ति होती है।

सच्चिदानन्द विभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः॥(शा०ति० प१/७)

पुनः काल रूप बिन्दु से ही सदाशिव से लेकर पृथिवी तक छत्तीस तत्वों (कलाओं) की उत्पत्ति होती है। इन्हीं कलाओं से चराचर सहित सम्पूर्ण जगत की तत्पश्चात् सृष्टि होती है। हे शिवे! विविध प्रकार के आगमों के श्रवण-मनन तथा निदिध्यासन द्वारा इस शक्ति का प्रत्यक्ष अनुभव कर लेना ही ब्रह्मसाक्षात्कार कहा जाता है। जब साधक गुरु मुख से श्रुति वाक्यों का श्रवण कर, श्रुत्यनुकूल तर्कों के अनुसार उस पर मनन करके प्राप्त निष्कर्षों के अनुरूप गुरुपदेशानुसार ध्यान (निदिध्यासन) करता है तब ही क्षण-भर में इस सर्वात्मा रूप शक्ति का प्रत्यक्ष अनुभव (साक्षात्कार) उसे प्राप्त हो जाता है।

॥ नानात्वे एकं एके च नानात्व-दर्शनम्॥

तस्मिन् देवेशि प्रत्यक्षे शृणुष्व परमेश्वरि।
भावैर्बहुविधैर्देवि भावस्तत्रापि नीयते॥३८॥
भुक्तेभ्यो नानाघासेभ्यो गवि चैको यथा रसः।
स(तु)दुग्धाख्यसंयोगे नानात्वं लभते प्रिये॥३९॥
तृणेन जायते देवि रसस्तस्मात् परो रसः।
तस्मात् दधि ततो हव्यं तस्मादपि रसोदयः॥४०॥
स एव कारणं तत्र तत्कार्यं स च लक्ष्यते।
दृश्यते च महादे(व?वि)न कार्यं न च कारणम्॥४१॥
तथैवायं स एवात्मा नानाविग्रहयोनिषु।
जायते च ततो जातः कालभेदो हि भाव्यते॥४२॥
स जातः स मृतो बद्धः स मुक्तः स सुखी पुमान्।
स वृद्धः स च विद्वांश्च न स्त्री पुमान् नपुंसकः॥४३॥
नानाध्याससमायोगादात्मना जायते शिवे।
एक एव स एवात्मा सर्वरूपः सनातनः॥४४॥

हे देवेशि परमेश्वरि! उस सर्वात्मा रूप शक्ति का साक्षात्कार हो जाने पर उसी में संसार के अनेकों प्रकार के भावों (पदार्थों) को देखते हुए भी उन सबके एकात्म कारण रूप से उसी शक्ति की कल्पना करनी चाहिए। जैसे अनेकों प्रकार के घासों को खाने वाली गाय में विभिन्न प्रकार के तृणों के संयोग से एक रूप रस की पुनः उससे परम रस रूप दुग्ध की उत्पत्ति होती है उसी प्रकार समस्त भावों के द्वारा (उन्हें परस्पर विलीन कर) एक

शक्ति रूप भाव का ही चिन्तन करना चाहिए। यह दुग्ध भी पुनः प्रकृति संयोग से नानात्व (अनेक रूप) को प्राप्त करता है। इस प्रकार तृण (घासादि) से रस (गाय के शरीर में) की उत्पत्ति पुनः इससे परम रस रूप दुग्ध, दुग्ध से दधि (दधि से मक्खन तथा मक्खन) से घृत की उत्पत्ति होती है। पुनः इन सभी को यदि भक्षण किया जाय तो (शरीर में) रस की उत्पत्ति होती है। इस प्रकार ये परस्पर कारण-कार्य रूप से परिलक्षित होते हैं। परन्तु एक तत्व दृष्टि से न तो कोई कार्य है और न ही कोई कारण। इसी तरह यह एक आत्मा (सर्वात्मारूप शक्ति ही) विभिन्न योनियों में अनेकों प्रकार के शरीरों में उत्पन्न होती है। कालभेद के कारण ही यह 'उत्पन्न हुआ सा' अनुभव होता है। वह उत्पन्न हुआ, वह मर गया, वह बद्ध (जीव) है, वह मुक्त है, वह पुरुष सुखी है, वह वृद्ध है तथा वह विद्वान है, इस प्रकार का एक ही आत्मा के विषय में अनुभव कालभेद के कारण ही होता है। वास्तव में यह आत्मा न तो स्त्री है, न ही पुरुष और न ही नपुंसक। स्वयं में अनेकों प्रकार के अध्यासों को स्वीकार यह उन अध्यासों के संयोग द्वारा ही स्वयं को अनेकों रूपों में उत्पन्न सा करता है। हे शिवे! यह सनातन (शाश्वत-अविनाशी) आत्मा एक (अद्वितीय) होते हुए भी सर्वरूप है।

।। प्रकृति योगेन (ज्ञानेन) बिना आत्मज्ञानस्यासम्भवत्वम्।।

अव्यक्तश्च स च व्यक्तः प्रकृत्या ज्ञायते ध्रुवम्।
तस्मात् प्रकृतियोगेन बिना न ज्ञायते क्वचित्।।४५।।
बिना घटत्वयोगेन न प्रत्यक्षो यथा घटः।
इतराद् भिद्यमानोऽपि स भेदमुपगच्छति।।४६।।
मां बिना पुरुषे भेदो न च याति कथञ्चन।
न प्रयोगैर्न च ज्ञानैर्न श्रुत्या न गुरुक्रमैः।।४७।।
न स्नानैस्तर्पणैर्वापि नच (ज्ञा?दा)नैः कदाचन।
प्रकृत्या ज्ञायते ह्यात्मा प्रकृत्या लुप्यते पुमान्।।४८।।
प्रकृत्याधिष्ठितं सर्वं प्रकृत्या वञ्चितं जगत्।
प्रकृत्य भेदमाप्नोति प्रकृत्याभेदमाप्नुयात्।।४९।।
नरस्तु प्रकृतिर्नैव न पुमान् परमेश्वरः।
इति ते कथितं तत्त्वं सर्वसारमनोरमम्।।५०।।

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे
(ताराशतनाम-तत्त्वसारनिरूपणं) विंशः पटलः।।२०।।

निश्चित रूप से जो आत्मा (ब्रह्म अथवा परमेश्वर) अव्यक्त रूप है, वह प्रकृति के द्वारा (सहयोग से ही) व्यक्त भाव को प्राप्त होता है। इसलिए प्रकृति के ज्ञान के बिना कुछ भी जाना नहीं जा सकता। जैसे कि घट के समक्ष होने पर भी बिना घटत्व योग के उसका प्रत्यक्षीकरण नहीं होता। वस्तुओं में परस्पर विद्यमान भेदत्व रूप गुण का ज्ञान होने पर ही मनुष्य को उनमें भेद की उपलब्धि होती है। मेरे बिना पुरुष (आत्मा अथवा जीव) में किसी भी प्रकार से भेद की उत्पत्ति नहीं हो सकती। इस आत्मा (आत्म तत्व) का ज्ञान अनेकों प्रकार के प्रयोगों (कर्मो-साधनाओं), (विभिन्न प्रकार के लौकिक) ज्ञानों, वैदिक श्रुतियों, अनेकों गुरुओं (के वरण तथा उनके उपदेशों), अनेक तीर्थ स्थानों तथा विभिन्न देव पितरों के तर्पणों एवं बहुविध दानों आदि किसी भी कर्म के द्वारा सम्भव नहीं है। प्रकृति (शक्ति के ज्ञान) द्वारा ही इस आत्मा को जाना जा सकता है और इसी प्रकृति के ज्ञान से ही इसके पुरुष (जीव) भाव का लोप भी होता है। सब कुछ प्रकृति के द्वारा प्रकृति में ही अधिष्ठित है। प्रकृति के बिना संसार का कुछ भी अस्तित्व नहीं है। प्रकृति के कारण ही भेद तथा अभेद दोनों की उपलब्धि होती है, क्योंकि इन दोनों का कारण प्रकृति ही है। यह पुरुष (जीव-आत्मा) न तो प्रकृति है और न परमेश्वर ही पुरुष है। इस प्रकार हे देवि! मैंने तत्व के समस्त सार भावों को सुन्दर मनोरम (रुचिकर) रूप से तुमसे स्पष्ट रूप से वर्णन किया है।

।। श्री बृहन्नील तन्त्र के भैरव भैरवी संवाद के अन्तर्गत
तारा शतनाम-तत्वसार निरूपण नामक
बीसवें पटल की 'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

* * *

।। एकविंशः पटलः ।।

(रसायन-भाव निरूपणम्)

।। स्वर्ण-रजत निर्माण विधिः ।।

श्री भैरव उवाच

अथ वक्ष्ये महेशानि तत्त्वसारं पुरातनम्।
येन विज्ञानमात्रेण कुबेर इव जायते।।१।।
ताम्रसीसकमेतत्तु पित्तलं चापि यत्नतः।
चतुर्हस्तप्रमाणं हि गर्तं कृत्वा तु साधकः।।२।।
सरलं भस्म कुर्याच्च विवर्जाङ्गारसंयुतम्।
करीषमर्धसं(युक्तं?शुष्कं)ताम्रस्योपरि पूरितम्।।३।।
तापयेत् परमेशानि दिनानि सप्त चैवहि।
ततः प(रे?रं)महेशानि उत्तोल्य यत्नतः शिवे।।४।।
पात्रे लोहमये देवि तमादाय महेश्वरि।
वि(वज?वर्जा)ङ्गारजैर्देवि अलातैस्तापयेद् दृढम्।।५।।
द्रवीभूतं तथा ताम्रं येन जायेत सुन्दरि।
तदर्धं च रसं तत्र दद्यात् प्रयतमानसः।।६।।
विजावरसकेनैव अटरूषरसेन च।
सिंहिकारसकेनाथ युक्तं कुर्याद् महेश्वरि।।७।।
ततश्च स्वर्णं जायेत सत्यं सुरगणार्चिते।
मूलमन्त्रस्य जाप्येन सिद्ध्यत्येव न संशयः।।८।।
सहस्रदशजापेन सिद्ध्यत्येव न संशयः।
पूर्वोक्तेन रसेनैव शुद्धसूतेन वा पुनः।।९।।
संहृत्य तत्र दद्याच्चसीसकं रूप्यतां व्रजेत्।
इति ते कथितं सर्वं सर्वसारस्वतप्रदम्।।१०।।

हे महेशानि! अब मैं समस्त तत्वों के सार रूप प्राचीन तत्व (ज्ञान) को कहता हूँ जिसके प्रयोगात्मक ज्ञान के द्वारा साधक कुबेर के समान

(सम्पत्ति शाली) हो जाता है। साधक पहले ताँबा तथा शीशा धातुओं के पत्रक (फलक) संग्रह करे फिर चार हाथ लम्बा इतना ही चौड़ा तथा गहरा गड्ढा खोदकर उसमें सरल (धूप) वृक्ष की लकड़ी को जलाकर भस्म तैयार करे। इस भस्म से कोयलों को अलग करके उसके ऊपर ताम्र पत्र रखकर पुनः ऊपर अर्धशुष्क कण्डों (गाय के गोबर से बने उपलों) का ढेर लगाकर उसे जलाकर सात दिनों तक तांबे को तपाये। फिर उसे सावधानीपूर्वक निकाल कर किसी लोहे के पात्र में लेकर प्रज्वलित अग्नि के लपटों के द्वारा भली-भाँति तपायें। इस प्रकार तांबे को द्रवित कर (पिघला) दें। इसके बाद उसमे तांबे के अर्धभाग के बराबर शुद्ध पारद भस्म डालें। तत्पश्चात् उसमें विजाव रस, अटरुष (अडूसा) रस तथा सिंहिका रस डालकर भली-भाँति मिश्रित कर दें। इस प्रकार हे सुरगणार्चिते देवि! स्वर्ण तैयार हो जाता है। समस्त क्रिया करते समय मूल मन्त्र का जप करते रहना चाहिए तथा मिश्रण के पश्चात् भी दश हजार मन्त्रों का जप करना चाहिए। इससे निःसन्देह कार्य की सिद्धि होती है। पूर्वोक्त रसों तथा शुद्ध पारद भस्म को मिलाकर द्रवित शीशा धातु पर डालने से वह चाँदी में परिवर्तित हो जाता है। हे देवि! इस प्रकार मैंने तुमसे यह स्वर्ण-रजत निर्माण के ज्ञान का वर्णन किया।

॥ पारद (सूत) भस्म निर्माण-विधिः॥

प्रयोगार्हो भवेद् देवि सत्यं सत्यं वरानने।
इदानीं शृणु चार्वङ्गि सूतभस्म तथैव च॥११॥
येन विज्ञानमात्रेण मंत्रसिद्धिर्भवेत् प्रिये।
सार्धहस्तप्रमाणेन गर्तं कृत्वा तु देशिकः॥१२॥
हरिद्रागोमयेनाथ लेपयेत् परमेश्वरि।
ततस्तु गजमूत्रेण भस्म कुर्याद यथाविधि॥१३॥
वैजयन्त्याश्च मूलेन तथा सिद्धरसेन च।
करीषकेण देवेशि भस्मीकुर्याद् विधानतः॥१४॥
शुद्धसूतं समादाय मङ्गले वासरे निशि।
ऊर्ध्वाधो लवणं दत्त्वा भस्मीभवति तत्क्षणात्॥१५॥
अश्वत्थपल्लवेनैव संयुक्तं परमेश्वरि।
सूतभस्म भवत्येव परेशि नात्र संशयः॥१६॥
अश्वदन्तेन देवेशि वाजिमारेण चैव हि।
संयुक्तसूतं तत्रत्यं भस्मीभवति तत्क्षणात्॥१७॥
धातुना सह युक्तं तद् बद्धीभवति सुन्दरि।

पातालरसकेनैव भवेच्च स्वर्णमुत्तमम्।।१८।।
आदौ च गुलिकां वद्ध्वा पश्चाद् रसेन ताडयेत्।
ततो बद्धीभवत्येव सत्यं गुगणार्चिते।।१९।।
त्रिरात्रस्य विधानेन जपं कुर्याच्छुचिस्मिते।
ततः प्रयोगो देवेशि सिद्धो नास्त्यत्र संशयः।।२०।।

हे चार्वङ्गि! अब पारदभस्म निर्माण की विधि सुनो, जिसके ज्ञान से मन्त्र की सिद्धि तथा साधक विभिन्न प्रकार के प्रयोगों को करने में सत्य ही समर्थ हो जाता है।

डेढ़ हाथ लम्बा, चौड़ा तथा गहरा गड्ढा खोदकर उसे हल्दी तथा गाय के गोबर के मिश्रण द्वारा लिप्त करे। इसके पश्चात् गजमूल अथवा वैजयन्ती मूल के साथ पारे को गाय के गोबर से बने उपलों को प्रज्वलित करके उसमें तपा करके विधिपूर्वक भस्म तैयार करें। मङ्गलवार की रात्रि में शुद्ध पारद (पारा) लेकर उसके ऊपर तथा नीचे लवण रखकर (लवण से सम्पुटित कर) तपाने से शीघ्र ही भस्म निर्मित हो जाता है। पीपल के पत्तों के साथ पारे को रखकर तपाने से भी शीघ्र भस्म तैयार हो जाता है।

अश्वगन्ध तथा हयारि पुष्प (अथवा मूल) के साथ पारे को संयुक्त करके भी शीघ्र भस्म निर्मित किया जा सकता है। द्रवित धातु के साथ पारे (भस्म) को संयुक्त करने से वह दृढ़ बद्ध हो जाता है। तत्पश्चात् उस धातु को पाताल रस से संयुक्त करने पर उत्तम स्वर्ण प्राप्त होता है। पहले धातु तथा पारदभस्म को गोली की भाँति बद्ध बना लेना चाहिए फिर पूर्वोक्त रस द्वारा ताड़न (जोर-जोर से छींटे मारना) करना चाहिए जिससे ठोस स्वर्ण की प्राप्ति होती है। इस प्रयोग को करने से पहले तीन रात्रियों में विधिपूर्वक मूल मन्त्र का (न्यूनतम दश हजार) जप करना चाहिए। इसके पश्चात् ही इस प्रयोग को करने से सफलता प्राप्त होती है।

।। भाव-त्रय-निरूपणम्।।

भावनारससंपन्नो भवेद् योगी महाकविः।
भावस्य निर्णयं देवि कथितमपि शोभने।।२१।।
भावस्तु त्रिविधो देवि दिव्यवीरपशुक्रमात्।
गुरवस्तु त्रिधा ज्ञेयास्तथैव मन्त्रदेवताः।।२२।।
आद्यो भावो महादेवि श्रेयान् सर्वागमेषु च।
द्वितीयो मध्यमः प्रोक्तस्तृतीयः सर्वनिन्दितः।।२३।।
बहुजापात् तथा होमात् कायक्लेशादिविस्तरैः।
न भावेन बिना देवि मन्त्रविद्या फलप्रदा।।२४।।

किं वीरसाधनैर्लक्षैः किं वा कृष्टिकुलाकुलैः।
किं पीठपूजनेनैव किं कन्याभोजनादिभिः॥२५॥
स्वयोषितप्रीतिदानेन किं परेषां तथैव च।
किं जितेन्द्रियभावेन किं कुलाचारकर्मणा॥२६॥
यदि भावविशुद्धात्मा न स्यात् कुलपरायणः।
भावेन लभते मुक्तिं भावेन कुलवर्द्धनम्॥२७॥
भावेन गोत्रवृद्धिः स्याद् भावेन कुलसाधनम्।
किं न्यासविस्तरेणैव किं भूतशुद्धिविस्तरैः॥२८॥
किं तथा पूजनेनैव यदि भावो न जायते।
शेषभावो महादे(व?वि)सर्वकर्मसुखावहः॥२९॥
तेन भावेन देवेशि पूजयेत् परमेश्वरीम्।
बिना हेतुकमासाद्य क्षोभयुक्तो महेश्वरः॥३०॥

हे देवि! अब मैं साधक के भावों (जिस मानसिक चिन्तन अथवा विचार में स्थित होकर साधक साधना करता है) के विषय में शास्त्रीय निर्णय (मत) को कहता हूँ। भावना रस से सम्पन्न (क्रमशः एक-एक भावों से ऊपर उठता हुआ दिव्य भाव प्राप्त किया) हुआ साधक महान विद्वान तथा योगी हो जाता है। हे देवि! भाव तीन प्रकार के कहे गये हैं। दिव्य भाव, वीर भाव तथा पशु भाव। इसी आधार पर गुरु भी तीन प्रकार के जानना चाहिए। मन्त्र तथा देवताओं की साधना भी इसी प्रकार त्रिविध होती है।

इनमें जो प्रथम 'दिव्य-भाव' है, उसे सभी तन्त्रों (तन्त्र-ग्रन्थों तथा साधनाओं) में सर्वश्रेष्ठ कहा जाता है। द्वितीय 'वीर-भाव' मध्यम तथा तीसरा 'पशु-भाव' सबसे निन्दित (अधम-निम्नतर) माना जाता है। मन्त्रों का चाहे जितना अधिक जप किया जाय, हवन किया जाय तथा शरीर को कष्ट देने वाले कर्म-काण्डों तथा साधनाओं को विस्तारपूर्वक किया जाय, जब तक साधक के हृदय में किसी भी भाव के प्रति दृढ़ता नहीं होती, मन्त्र विद्या की सिद्धि प्राप्त नहीं होती है।

लाखों प्रकार की वीर-साधनाओं के करने से, कुण्डलिनी का आरोहण-अवरोहण करने से, पीठ-पूजन से, अनेकों कन्याओं को भोजन कराने से, अपनी स्त्री अथवा पर-स्त्री को भली-भाँति प्रसन्न करने से, जितेन्द्रिय होने से तथा कुलाचार से सम्बन्धित विविध कर्मों को करने से तब तक कोई भी लाभ नहीं होगा जब तक कि कुल साधन परायण साधक के चित्त में विशुद्ध रूप से दिव्य भाव की जागृति नहीं होगी।

पशु भाव से ऊपर उठते हुए जब साधक दिव्य भाव को प्राप्त होता है। तब ही उस भाव के कारण उसे मुक्ति प्राप्त होती है। भाव से ही कुल (वंश) वृद्धि, गोत्र वृद्धि तथा कुल साधना में साधक प्रगति की ओर अग्रसर होता है। यदि साधक के चित्त में अपने इष्ट के साथ तादात्म्य भाव (यहाँ तक कि गुरु तथा मन्त्र के साथ भी तादात्म्य भाव) उत्पन्न नहीं हुआ है तो विस्तार पूर्वक भूतशुद्धि करने से, विभिन्न प्रकार के न्यासों को करने से तथा विविध बहुमूल्य उपचारों द्वारा विस्तार पूर्वक पूजन करने से भी यथोचित अभीष्ट की प्राप्ति नहीं होती है। हृदय में शेष भाव (स्वयं की देवता के अंश रूप में कल्पना अथवा अन्तिम भाव दिव्य भाव) की उत्पत्ति होने पर ही सभी साधन कर्म सुख प्राप्ति के कारण होते हैं। अतः शेषभाव के द्वारा ही परेमश्वरी का पूजन करना चाहिए। परन्तु यदि साधक बिना हेतु (मद्य) को ग्रहण किये साधना करता है तो महेश्वर को क्षोभ की प्राप्ति होती है।

यत्र कुत्र कुजे वारे श्मशानगमने कृते।
पूजाफलं लभेत् तत्र सप्तवासरसंमितम्॥३१॥
चतुर्दश्यां गते तत्र पक्षपुण्यफलं लभेत्।
नागते नार्चिते स्थाने पशुरेव न संशयः॥३२॥
नान्यः स्यादधिको देव इति चिन्तापरायणः।
साधके क्षोभमापन्ने मम क्षोभः प्रजायते॥३३॥
तस्माद् यत्नाद् भोगयुतो भवेद् वीरवरः सदा।
भोगेन मोक्षमाप्नोति भोगेन कुलसुन्दरीम्॥३४॥
बिना हेतुकमासाद्य क्षोभयुक्तो महेश्वरः।
न पूजां मानसीं कुर्याद् न ध्यानं न च चिन्तनम्॥३५॥
यद्यद् वदति निद्राति यत्करोति यदर्चति।
तत्सर्वं कुलरूपं तु ध्यात्वैवं विहरेत् सुधीः॥३६॥
तस्माद् भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम्।
न चैव श्रुतिदोषोऽत्र नापराधादिदूषणम्॥३७॥
एकाकी निर्जने देशे श्मशाने पर्वते वने।
शून्यागारे नदीतीरे निःशङ्को विहरेत् सदा॥३८॥
वीराणां जपकालस्तु सर्वकालः प्रशस्यते।
सर्वदेशे सर्वपीठे कर्तव्यं कुलतोषणम्॥३९॥

इति विज्ञाय देवेशि सर्वं कुर्याद् वरानने।
बहुनात्र किमुक्तेन किमन्यत् कथयामि ते॥४०॥

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे (रसायन-भावनिरूपणं)
एकविंश पटलः॥२१॥

जिस किसी भी मङ्गलवार को श्मशान में जाकर यदि (वीरभावापन्न) साधक (वीरसाधक) देवी का पूजन करता है तो उसे सात दिनों की पूजा का फल प्राप्त होता है। इसी भाँति चतुर्दशी (की रात्रि) में पूजन करने से पन्द्रह दिनों की पूजा के समान फल की प्राप्ति होती है। जो साधक ऐसे स्थान में नहीं जाता तथा इस प्रकार की पूजा नहीं करता, वह निश्चय ही पशु भावापन्न साधक है। यह साधक देवता से अभिन्न होते हुए भी, ऐसा न जानकर सदैव देवता को स्वयं से श्रेष्ठ (तथा भिन्न) मानता हुआ उसके ध्यान में संलग्न रहता है।

यदि कोई साधक शास्त्र विहित भोगों का भी परित्याग कर शरीर को अनावश्यक कष्ट देता हुआ साधना करता है तो उसके चित्त में क्षोभ उत्पन्न होता है जिसके कारण (जीवात्मा रूप) मुझे भी क्षोभ की प्राप्ति होती है। अतः वीर साधक सदैव भोगयुक्त होकर ही साधना करे। भोग से ही मुक्ति तथा देवी की प्राप्ति होती है।

दिव्य साधक न तो मानस पूजन करे और न ही इष्ट का ध्यान-चिन्तन, अर्थात् उसे विशेष रूप से इन्हें करने की आवश्यकता नहीं होती। वह जो कुछ भी बोलता है वही इष्ट की स्तुति है, उसका शयन ही इष्ट का ध्यान है तथा वह जो कुछ भी कर्म करता है, वह सभी इष्ट का अर्चन है। ऐसी भावना से युक्त होकर वह सम्पूर्ण सृष्टि में देवी का चिन्तन करता हुआ अर्थात् समस्त सृष्टि को देवी स्वरूप ही मानता हुआ सुख पूर्वक स्वच्छन्द जीवन व्यतीत करे।

सम्पूर्ण सृष्टि को देवी (स्व-इष्ट) स्वरूप अनुभव करने वाला मनुष्य यदि कभी देवी का पूजन करे तो सदैव खा पीकर ही पूजन करे। ऐसा करना न तो वेद विरुद्ध है और न ही इससे कोई अपराध एवं दोष लगता है। वीर साधक हो अथवा दिव्य साधक सदैव अकेला जनशून्य स्थानों में, पर्वत, श्मशान, वन, शून्य भवन, नदी तट आदि सर्वत्र बिना किसी भय के निश्चिन्त होकर भ्रमण (निवास) करता हुआ सुख पूर्वक जीवन व्यतीत करे। वीर साधकों के लिए जपकार्य हेतु सभी काल श्रेष्ठ हैं। वीर साधक को सभी स्थानों तथा सभी पीठों पर देवी की प्रसन्नता के लिए पूजन (विशेषतः स्त्री पूजन) करना चाहिए। तात्पर्य यह है कि वीरसाधक कभी भी, कहीं भी देवी

का पूजन-जप करने का अधिकारी होता है। हे देवि! इस प्रकार भावों के विषय में जानकर स्व-स्व भावानुसार साधक को अपना सभी पूजनादि कर्म करना चाहिए। इस विषय में और अधिक कहने से क्या लाभ। अब कहिए देवि! तुमसे मैं और क्या कहूँ?

।।श्री बृहन्नील तन्त्र के भैरव-भैरवी संवाद के अन्तर्गत
रसायन-भाव निरूपण नामक इक्कीसवें पटल
की 'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

* * *

।। द्वाविंशः पटलः।।

(काली सहस्रनाम-निरूपणम्)

।। काली-सहस्र-नाम-श्रुत्यर्थ कामना।।

श्री देव्युवाच

पूर्वं हि सूचितं देव कालीनामसहस्रकम्।
तद्वदस्व महादेव यदि स्नेहोऽस्ति मां प्रति।।१।।

हे देव महादेव! पूर्व काल में आपने जिस काली सहस्रनाम को केवल सङ्केत रूप से सूचित किया था, उन नामों को, यदि आपका मेरे प्रति सत्य ही प्रेम है तो, विस्तार पूर्वक वर्णन कीजिए।

।। सविनियोग काली सहस्र नाम वर्णनम्।।

श्रीभैरव उवाच

तन्त्रेऽस्मिन् परमेशानि कालीनामसहस्रकम्।
शृणुष्वैकमना देवि भक्तानां प्रीतिवर्द्धनम।।२।।
कालिका कामदा कुल्ला भद्रकाली गणेश्वरी।
भैरवी भैरवप्रीता भवानी भवमोचिनी।।३।।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी।
महाकालरता सूक्ष्मा कौलव्रतपरायणा।।४।।
कोमलाङ्गी करालाङ्गी कमनीया वराङ्गना।
गन्धचन्दनदिग्धाङ्गी सती साध्वी पतिव्रता।।५।।
काकिनी वर्णरूपा च महाकालकुटुम्बिनी।
कामहन्त्री कामकला कामविज्ञा महोदया।।६।।
कान्तरूपा महालक्ष्मीर्महाकालस्वरूपिणी।
कुलीना कुलसर्वस्वा कुलवर्त्मप्रदर्शिका।।७।।
कुलरूपा चकोराक्षी श्रीदुर्गा दुर्गनाशिनी।
कन्या कुमारी गौरी तु कृष्णदेहा महामनाः।।८।।
कृष्णाङ्गी नीलदेहा च पिङ्गकेशी कृशोदरी।
पिङ्गाक्षी कमलप्रीता काली कालपराक्रमा।।९।।

कलानाथप्रिया देवी कुलकान्ताऽपराजिता।
उग्रतारा महोग्रा च तथा चैकजटा शिवा॥१०॥
नीला घना बलाका च कालदात्री कलात्मिका।
नारायणप्रिया सूक्ष्मा वरदा भक्तवत्सला॥११॥
वरारोहा महाबाणा किशोरी युवती सती।
दीर्घाङ्गी दीर्घकेशा च नृमुण्डधारिणी तथा॥१२॥
मालिनी नरमुण्डाली शवमुण्डास्थिधारिणी।
रक्तनेत्रा विशालाक्षी सिन्दूरभूषणा मही॥१३॥
घोररात्रिर्महारात्रिर्घोरान्तकविनाशिनी ।
नारसिंही महारौद्री नीलरूपा वृषासना॥१४॥
विलोचना विरूपाक्षी रक्तोत्पलविलोचना।
पूर्णेन्दुवदना भीमा प्रसन्नवदना तथा॥१५॥

हे देवि परमेशानि! भक्तों के हृदय में भगवती महाकाली के प्रति भक्तिभाव को संवर्धित करने वाले, इस तन्त्र-शास्त्र में कहे गये काली के सहस्र नामों को एकाग्रचित्त होकर सुनो! (इन नामों का पाठ करने से पूर्व निम्न प्रकार से इसका विनियोग करना चाहिए।)

विनियोग :- **ॐ अस्य श्रीकालीदेव्याः सहस्रनामस्तोत्रमन्त्रस्य महाकाल भैरव ऋषिः, अनुष्टुप् छन्दः श्री (महा) काली देवता, क्रीं बीजं, हूँ शक्तिः, ह्रीं कीलकं धमार्थ काम मोक्षार्थे (पुरुषार्थ चतुष्टये) विनियोगः।**

इसके पश्चात् **'ऋष्यादि न्यास'**, क्रां, क्रीं, क्रूं आदि से **'कर-षडङ्ग न्यास'**, **'ध्यान'** तथा **'मानसोपचारार्चन'** करके **'सहस्रनाम'** का पाठ करना चाहिए। साधक अपनी इच्छानुसार श्लोक रूप से पाठ न करके निम्न रूप से भी पाठ कर सकता है। यहाँ चतुर्थ्यन्त रूप नामों का उल्लेख किया जा रहा है। इनके पूर्व **'ॐ'** (अथवा ह्रीं) तथा पश्चात् में **'नमः'** का संयोग करके ही पाठ (जप) करना चाहिए। यथा –

ह्रीं (ॐ) कालिकायै नमः। कामदायै, (कुरु) कुल्लायै, भद्रकाल्यै, गणेश्वर्यै, भैरव्यै, भैरव प्रीतायै, भवान्यै, भवमोचिन्यै, कालरात्र्यै, महारात्र्यै, मोहरात्र्यै, मोहिन्यै, महाकालरतायै, सूक्ष्मायै, कौलव्रतपरायणायै, कोमलाङ्ग्यै, करालाङ्ग्यै, कमनीयायै, वराङ्गनायै, गन्धचन्दनदिग्धाङ्ग्यै, सत्यै, साध्व्यै, पतिव्रतायै, काकिन्यै, वर्णरूपायै, महाकालकुटुम्बिन्यै, कामहन्त्र्यै, कामकलायै, कामविज्ञायै, महोदयायै, कान्तरूपायै, महालक्ष्मी स्वरूपिण्यै, महाकालस्वरूपिण्यै, कुलीनायै,

कुलसर्वस्वायै, कुलवर्त्मप्रदर्शिकायै, कुलरूपायै, चकोराक्ष्यै, श्रीदुर्गायै, दुर्गनाशिन्यै, कन्यायै, कुमार्यै, गौर्यै, कृष्णदेहायै, महामनायै, कृष्णाङ्ग्यै, नीलदेहायै, पिङ्गकेश्यै, कृशोदर्यै, पिङ्गाक्ष्यै, कमलप्रीतायै, काल्यै, कालपराक्रमायै, कलानाथप्रियायै, देव्यै, कुलकान्तायै, अपराजितायै, उग्रतारायै, महोग्रायै, एक-जटायै, शिवायै, नीलायै, घनायै, बलाकायै, कालदात्र्यै, कलात्मिकायै, नारायणप्रियायै, सूक्ष्मायै, वरदायै, भक्तवत्सलायै, वरारोहायै, महाबाणायै, किशोर्यै, युवत्यै, सत्यै, दीर्घाङ्ग्यै, दीर्घकेशायै, नृमुण्डधारिण्यै, मालिन्यै, नरमुण्डाल्यै, शवास्थिधारिण्यै, मुण्डास्थिधारिण्यै, रक्तनेत्रायै, विशालाक्ष्यै, सिन्दूरभूषणायै, मह्यै, घोररात्र्यै, महारात्र्यै, घोरान्तकविनाशिन्यै, नारसिंह्यै, महारौद्र्यै, नीलरूपायै, वृषासनायै, विलोचनायै, विरूपाक्ष्यै, रक्तोत्पल विलोचनायै, पूर्णेन्दुवदनायै, भीमायै तथा प्रसन्नवदनायै। (१००)

पद्मनेत्रा विशालाक्षी शरज्ज्योत्सनासमाकुला।
प्रफुल्लपुण्डरीकाभलोचना भयनाशिनी॥१६॥
अट्टहासा महोच्छ्वासा महाविघ्नविनाशिनी।
कोटराक्षी कृशग्रीवा कुलतीर्थप्रस(ा)धिनी॥१७॥
कुलगर्तप्रसन्नास्या महती कुलभूषिका।
बहुवाक्यामृतरसा चण्डरूपाति(रो?वे)गिनी॥१८॥
वेगदर्पा विशालैन्द्री प्रचण्डचण्डिका तथा।
चण्डिका कालवदना सतीक्ष्णनासिका तथा॥१९॥
दीर्घकेशी सुकेशी च कपिलाङ्गी महारुणा।
प्रेतभूषणसंप्रीता प्रेतदोर्दण्डघण्टिका॥२०॥
शङ्खिनी शङ्खमुद्रा च शङ्खध्वनिनिनादिनी।
श्मशानवासिनी पूर्णा पूर्णेन्दुवदना शिवा॥२१॥
शिव प्रीता शिवरता शिवासनसमाश्रया।
पुण्यालया महापुण्या पुण्यदा पुण्यवल्लभा॥२२॥
नरमुण्डधरा भीमा भीमासुरविनाशिनी।
दक्षिणा दक्षिणाप्रीता नागयज्ञोपवीतिनी॥२३॥
दिगम्बरी महाकाली शान्ता पीनोन्नतस्तनी।
घोरासना घोररूपा सृक्प्रान्ते-रक्तधारिका॥२४॥
महाध्वनिः शिवासक्ता महाशब्दा महोदरी।
कामातुरा कामसक्ता प्रमत्ता शक्तभावना॥२५॥

समुद्रनिलया देवी महामत्तजनप्रिया।
कर्षिता कर्षणप्रीता सर्वाकर्षणकारिणी॥२६॥
वाद्यप्रीता महागीतरक्ता प्रेतनिवासिनी।
नरमुण्डसृजा गीता मालिनी माल्यभूषिता॥२७॥
चतुर्भुजा महारौद्री दशहस्ता प्रियातुरा।
जगन्माता जगद्धात्री जगती मुक्तिदा परा॥२८॥
जगद्धात्री जगत्त्रात्री जगदानन्दकारिणी।
जगज्जीवमयी हैमवती माया महाकचा॥२९॥
नागाङ्गी संहृताङ्गी च नागशय्यासमागता।
कालरात्रिर्दारुणा च चन्द्रसूर्यप्रतापिनी॥३०॥

पद्मनेत्रायै, विशालाक्ष्यै, शरज्ज्योत्सनायै, समाकुलायै, प्रफुल्लपुण्डरीकाभलोचनायै, भयनाशिन्यै, अट्टहासायै, महोच्छ्वासायै, महाविघ्नविनाशिन्यै, कोटराक्ष्यै, कृशग्रीवायै, कुलतीर्थप्रसाधिन्यै, कुलगर्तप्रसन्नास्यायै, महत्यै, कुलभूषिकायै, बहुवाक्यामृतरसायै, चण्डरूपायै, अतिवेगिन्यै, वेगदर्पायै, विशालैन्द्र्यै, प्रचण्डचण्डिकायै, चण्डिकायै, कालवदनायै, सुतीक्ष्ण नासिकायै, दीर्घकेश्यै, सुकेश्यै, कपिलाङ्ग्यै, महारुणायै, प्रेतभूषणसम्प्रीतायै, प्रेतदोर्दण्डघण्टिकायै, शंखिन्यै, शंखमुद्रायै, शंखध्वनिनिनादिन्यै, श्मशानवासिन्यै, पूर्णायै, पूर्णेन्दुवदनायै, शिवायै, शिवप्रीतायै, शिवरतायै, शिवासनसमाश्रयायै, पुण्यालयायै, महापुण्यायै, पुण्यदायै, पुण्यवल्लभायै, नरमुण्ड धरायै, भीमायै, भीमासुरविनाशिन्यै, दक्षिणायै, दक्षिणा प्रीतायै, नागयज्ञोपवितिन्यै, दिगम्बर्यै, महाकाल्यै, शान्तायै, पीनोन्नतस्तन्यै, घोरासनायै, घोररूपायै, सृक्प्रान्तेरक्त धारिकायै, महाध्वन्यै, शिवासक्तायै, महाशब्दायै, महोदर्यै, कामातुरायै, कामसक्तायै, प्रमत्तायै, शक्तभावनायै, समुद्रनिलयायै, देव्यै, महामत्तजनप्रियायै, कर्षितायै, कर्षणप्रीतायै, सर्वाकर्षणकारिण्यै, वाद्यप्रीतायै, महागीतरक्तायै, प्रेतनिवासिन्यै, नरमुण्डसृजायै, गीतायै, मालिन्यै, माल्यभूषितायै, चतुर्भुजायै, महारौद्र्यै, दशहस्तायै, प्रियातुरायै, जगन्मातायै, जगद्धात्र्यै, जगत्यै, मुक्तिदायै, परायै, जगद्धात्र्यै, जगत्त्रात्र्यै, जगदानन्दकारिण्यै, जगज्जीवमय्यै, हैमवत्यै, मायायै, महाकचायै, नागाङ्ग्यै, संहृताङ्ग्यै, नागशय्यासमागतायै, कालरात्र्यै, दारुणायै तथा चन्द्रसूर्य प्रतापिन्यै।(२००)

नागेन्द्रनन्दिनी देवकन्या च श्रीमनोरमा।
विद्याधरी वेदविद्या यक्षिणी शिवमोहिनी॥३१॥
राक्षसी डाकिनी देवमयी सर्वजगज्जया।
श्रुतिरूपा तथाग्नेयी महामुक्तिर्जनेश्वरी॥३२॥

पतिव्रता पतिरता पतिभक्तिपरायणा।
सिद्धिदा सिद्धिसंदात्री तथा सिद्धजनप्रिया॥३३॥
कर्त्रिहस्ता शिवारूढा शिवरूपा शवासना।
तमिस्रा तामसी विज्ञा महामेघस्वरूपिणी॥३४॥
चारुचित्रा चारुवर्णा चारुकेशसमाकुला।
चार्वङ्गी चञ्चला लोला चीनाचारपरायणा॥३५॥
चीनाचारपरा लज्जावती जीवप्रदाऽनघा।
सरस्वती तथा लक्ष्मीर्महानीलसरस्वती॥३६॥
गरिष्ठा धर्मनिरता धर्माधर्मविनाशिनी।
विशिष्टा महती मान्या तथा सौम्यजनप्रिया॥३७॥
भयदात्री भयरता भयानकजनप्रिया।
वाक्यरूपा छिन्नमस्ता छिन्नासुरप्रिया सदा॥३८॥
ऋग्वेदरूपा सावित्री रागयुक्ता रजस्वला।
रजःप्रीता रजोरक्ता रजःसंसर्गवर्द्धिनी॥३९॥
रजःलुप्ता रजःस्फीता रजःकुन्तलशोभिता।
कुण्डली कुण्डलप्रीता तथा कुण्डलशोभिता॥४०॥
रेवती रेवतप्रीता रेवा चैरावती शुभा।
शक्तिनी चक्रिणी पद्मा महापद्मनिवासिनी॥४१॥
पद्मालया महापद्मा पद्मिनी पद्मवल्लभा।
पद्मप्रिया पद्मरता महापद्मसुशोभिता॥४२॥
शूलहस्ता शूलरता शूलिनी शूलसङ्गिका।
पि(णा?ना)कधारिणी वीणा तथा वीणावती मघा॥४३॥
रोहिणी बहुलप्रीता तथा वाहनवर्द्धिता।
रणप्रीता रणरता रणासुरविनाशिनी॥४४॥

नागेन्द्रनन्दिन्यै, देवकन्यायै, श्रीमनोरमायै, विद्याधर्यै, वेदविद्यायै, यक्षिण्यै, शिवमोहिन्यै, राक्षस्यै, डाकिन्यै, देवमय्यै, सर्वजगज्जयायै, श्रुतिरूपायै, आग्नेय्यै, महामुक्त्यै, जनेश्वर्यै, पतिव्रतायै, पतिरतायै, पतिभक्तिपरायणायै, सिद्धिदायै, सिद्धिसंदात्र्यै, सिद्धजनप्रियायै, कर्त्रिहस्तायै, शिवारूढायै, शिवारूपायै, शवासनायै, तमिस्रायै, तामस्यै, विज्ञायै, महामेघस्वरूपिण्यै, चारुचित्रायै, चारुवर्णायै, चारुकेश समाकुलायै, चार्वङ्ग्यै, चञ्चलायै, लोलायै, चीनाचारपरायणायै, चीनाचारपरायै, लज्जावत्यै, जीवप्रदायै, अनघायै, सरस्वत्यै, लक्ष्म्यै, महानीलसरस्वत्यै, गरिष्ठायै,

धर्मनिरतायै, धर्माधर्मविनासिन्यै, विशिष्टायै, महत्यै, मान्यायै, सौम्यजनप्रियायै, भयदात्र्यै, भयरतायै, भयानकजनप्रियायै, वाक्यरूपायै, छिन्नमस्तायै, छिन्नायै, सदासुरप्रियायै, ऋग्वेदरूपायै, सावित्र्यै, रागयुक्तायै, रजस्वलायै, रज:प्रीतायै, रजोरक्तायै, रज:संसर्गवर्धिन्यै, रजः प्लुतायै, रजः स्फीतायै, रजः कुन्तलशोभितायै, कुण्डल्यै, कुण्डल प्रीतायै, कुण्डल शोभितायै, रेवत्यै, रेवत प्रीतायै, रेवायै, ऐरावत्यै, शुभायै, शक्तिन्यै, चक्रिण्यै, पद्मायै, महापद्मनिवासिन्यै, पद्मालायै, महापद्मायै, पद्मिन्यै, पद्मवल्लभायै, पद्मप्रियायै, पद्मरतायै, महापद्मसुशोभितायै, शूलहस्तायै, शूलरतायै, शूलिन्यै, शूलसङ्गिकायै, पिनाकधारिण्यै, वीणायै, वीणावत्यै, मघायै, रोहिण्यै, बहुलप्रीतायै, वाहनवर्धितायै, रणप्रीतायै, रणरतायै तथा रणासुरविनासिन्यै।(३००)

रणाग्रवर्तिनी राणा रणाग्रा रणपण्डिता।
जटायुक्ता जटापिङ्गा वज्रिणी शूलिनी तथा॥४५॥
रतिप्रिया रतिरता रतिभक्ता रतातुरा।
रतिभीता रतिगता महिषासुरनाशिनी॥४६॥
रक्तपा रक्तसंप्रीता रक्ताख्या रक्तशोभिता।
रक्तरूपा रक्तगता रक्तखर्परधारिणी॥४७॥
गलच्छोणितमुण्डाली कण्ठमालाविभूषिता।
वृषासना वृषरता वृषासनकृताश्रया॥४८॥
व्याघ्रचर्मावृता रौद्री व्याघ्रचर्मावली तथा।
कामाङ्गी परमा प्रीता परासुरनि(वा?रा)सिनी॥४९॥
तरुणा तरुणप्राणा तथा तरुणमर्दिनी।
तरुणप्रेमदा वृद्धा तथा वृद्धप्रिया सती॥५०॥
स्वप्नावती स्वप्नरता नारसिंही महालया।
अमोघारुन्धती रम्या तीक्ष्णा भोगवती सदा॥५१॥
मन्दाकिनी मन्दरता महानन्दा वरप्रदा।
मानदा मानिनी मान्या माननीया मदातुरा॥५२॥
मदिरा मदिरोन्मादा मदिराक्षी मदालया।
सुदीर्घा मध्यमा नन्दा विनतासुरनिर्गता॥५३॥
जयप्रदा जयरता दुर्ज(या?य्या)सुरनाशिनी।
दुष्टदैत्यनिहन्त्री च दुष्टासुरविनाशिनी॥५४॥
सुखदा मोक्षदा मोक्षा महामोक्षप्रदायिनी।
कीर्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया॥५५॥

गुणातीता गुणप्रीता गुणरक्ता गुणात्मिका।
सगुणा निर्गुणा सीता निष्ठा काष्ठा प्रतिष्ठिता॥५६॥
धनिष्ठा धनदा धन्या वसुदा सुप्रकाशिनी।
गुर्वी गुरुतरा धौम्या धौम्यासुरविनाशिनी॥५७॥

रणाग्रवर्तिन्यै, राणायै, रणाग्रायै, रण पण्डितायै, जटायुक्तायै, जटापिङ्गायै, वज्रिण्यै, शूलिन्यै, रतिप्रियायै, रतिरतायै, रतिभक्तायै, रतातुरायै, रतिभीतायै, रतिगतायै, महिषासुरनाशिन्यै, रक्तपायै, रक्तसम्प्रीतायै, रक्ताख्यायै, रक्तशोभितायै, रक्तरूपायै, रक्तगतायै, रक्तखर्परधारिण्यै, गलच्छोणितमुण्डाल्यै, कण्ठमालाविभूषितायै, वृषासनायै, वृषरतायै, वृषासनकृताश्रयायै, व्याघ्रचर्मवृतायै, रौद्र्यै, व्याघ्रचर्मावल्यै, कामाङ्ग्यै, परमायै, प्रीतायै, परासुरनिरासिन्यै, तरुणायै, तरुणप्राणायै, तरुणमर्दिन्यै, तरुणप्रेमदायै, वृद्धायै, वृद्धप्रियायै, सत्यै, स्वप्नावत्यै, स्वप्नरतायै, नारसिंह्यै, महालयायै, अमोघायै, अरुन्धत्यै, रम्यायै, तीक्ष्णायै, भोगवत्यै, मन्दाकिन्यै, मन्दरतायै, महानन्दायै, वरप्रदायै, मानदायै, मानिन्यै, मान्यायै, माननीयायै, मदातुरायै, मदिरायै, मदिरोन्मादायै, मदिराक्ष्यै, मदालयायै, सुदीर्घायै, मध्यमायै, नन्दायै, विनतासुरनिर्गतायै, जयप्रदायै, जयरतायै, दुर्जयायै, दुर्जय्यासुरविनासिन्यै, दुष्टदैत्यनिहन्त्र्यै, दुष्टासुरविनासिन्यै, सुखदायै, मोक्षदायै, मोक्षायै, महामोक्षप्रदायिन्यै, कीर्तियशस्विन्यै, भूषायै, भूष्यायै, भूतपति प्रियायै, गुणातीतायै, गुणप्रीतायै, गुणरक्तायै, गुणात्मिकायै, सगुणायै, निर्गुणायै, सीतायै, निष्ठायै, काष्ठायै, प्रतिष्ठितायै, धनिष्ठायै, धनदायै, धन्यायै, वसुदायै, सुप्रकाशिन्यै, गुर्व्यै, गुरुतरायै, धौम्यायै तथा धौम्यासुरविनाशिन्यै।(४००)

निष्कामा धनदा कामा सकामा कामजीवना।
चिन्तामणिः कल्पलता तथा शङ्करवाहिनी॥५८॥
शङ्करी शङ्कररता तथा शङ्करमोहिनी।
भवानी भवदा भव्या भवप्रीता भवालया॥५९॥
महादेवप्रिया रम्या रमणी कामसुन्दरी।
कदलीस्तम्भसंरामा निर्मलासनवासिनी॥६०॥
माथुरी मथुरा माया तथा सुरभिवर्द्धिनी।
व्यक्ताव्यक्तानेकरूपा सर्वतीर्थास्पदा शिवा॥६१॥
तीर्थरूपा महारूपा तथागस्त्यवधूरपि।
शिवानी शैवलप्रीता तथा शैवलवासिनी॥६२॥
कुन्तला कुन्तलप्रीता तथा कुन्तलशोभिता।
महाकचा महाबुद्धिर्महामाया महागदा॥६३॥

महामेघस्वरूपा च तथा कङ्कणमोहिनी।
देवपूज्या देवरता युवती सर्वमङ्गला॥६४॥
सर्वप्रियङ्करी भोग्या भोगरूपा भगाकृतिः।
भगप्रीता भगरता भगप्रेमरता सदा॥६५॥
भगसंमर्दनप्रीता भगोपरि-निवेशिता।
भगदक्षा भगाक्रान्ता भगसौभाग्यवर्द्धिनी॥६६॥
दक्षकन्या महादक्षा सर्वदक्षा प्रचण्डिका।
दण्डप्रिया दण्डरता दण्डताडनतत्परा॥६७॥
दण्डभीता दण्डगा दण्डसंमर्दने रता।
सुवेदिदण्डमध्यस्था भूर्भुवःस्वःस्वरूपिणी॥६८॥
आद्या दुर्गा जया सूक्ष्मा सूक्ष्मरूपा जयाकृतिः।
क्षेमङ्करी महाघूर्णा घूर्णनासा वशङ्करी॥६९॥
विशालावयवा मेध्या त्रिवलीवलया शुभा।
मदोन्मत्ता मदरता मत्तासुरविनाशिनी॥७०॥
मधुकैटभसंहन्त्री निशुम्भासुरमर्दिनी।
चण्डरूपा महाचण्डी चण्डिका चण्डनायिका॥७१॥

निष्कामायै, धनदायै, कामायै, सकामायै, कामजीवनायै, चिन्तामण्यै, कल्प लतायै, शंकरवाहिन्यै, शंकर्यै, शङ्कररतायै, शङ्करमोहिन्यै, भवान्यै, भवदायै, भव्यायै, भवप्रीतायै, भवालयायै, महादेवप्रियायै, रम्यायै, रमण्यै, कामसुन्दर्यै, कदलीस्तम्भसंरामायै, निर्मलासनवासिन्यै, माथुर्यै (माधुर्यै), मथुरायै (मधुरायै), मायायै, सुरभिवर्द्धिन्यै, व्यक्तायै, अव्यक्तायै, व्यक्ताव्यक्तानेकरूपायै, सर्वतीर्थास्पदायै, शिवायै, तीर्थरूपायै, महारूपायै, अगस्त्यवध्वै, शिवान्यै, शैवलप्रीतायै, शैवलवासिन्यै, कुन्तलायै, कुन्तलप्रीतायै, कुन्तलशोभितायै, महाकचायै, महाबुद्ध्यै, महामायायै, महागदायै, महामेघस्वरूपायै, कङ्कणमोहिन्यै, देवपूज्यायै, देवरतायै, युवत्यै, सर्वमङ्गलायै, सर्वप्रियङ्कर्यै, भोग्यायै, भोगरूपायै, भगाकृत्यै, भगप्रीतायै, भगरतायै, सदाभगप्रेमरतायै, भगसम्मर्दनप्रीतायै, भगोपरि निवेशितायै, भगदक्षायै, भगाक्रान्तायै, भगसौभाग्यवर्द्धिन्यै, दक्षकन्यायै, महादक्षायै, सर्वदक्षायै, प्रचण्डिकायै, दण्डप्रियायै, दण्डरतायै, दण्डताडनतत्परायै, दण्डभीतायै, दण्डगतायै, दण्डसम्मर्दनेरतायै, सुवेदिदण्डमध्यस्थायै, भूर्भुवः स्वः स्वरूपिण्यै, आद्यायै, दुर्गायै, जयायै, सूक्ष्मायै, सूक्ष्मरूपायै, जयाकृत्यै, क्षेमकर्यै, महाघूर्णायै, घूर्णनासायै, वशङ्कर्यै, विशालावयवायै, मेध्यायै,

त्रिवलीवलयायै, शुभायै, मदोन्मत्तायै, मदरतायै, मत्तासुरविनाशिन्यै, मधुकैटभ संहन्त्र्यै, निशुम्भासुरमर्दिन्यै, चण्डरूपायै, महाचण्ड्यै, चण्डिकायै तथा चण्डनायिकायै।(४९७)

चण्डोग्रा चण्डवर्णा प्रचण्डा चण्डावती शिवा।
नीलाकारा नीलवर्णा नीलेन्दीवरलोचना।।७२।।
खड्गहस्ता च मृद्वङ्गी तथा खर्परधारिणी।
भीमा च भीमवदना महाभीमा भयानका।।७३।।
कल्याणी मङ्गला शुद्धा तथा परमकौतुका।
परमेष्ठी पररता पर(ा)त्परतरा परा।।७४।।
परानन्दस्वरूपा च नित्यानन्दस्वरूपिणी।
नित्या नित्यप्रिया तन्द्री भवानी भवसुन्दरी।।७५।।
त्रैलोक्यमोहिनी सिद्धा तथा सिद्धजनप्रिया।
भैरवी भैरवप्रीता तथा भैरवमोहिनी।।७६।।
मातङ्गी कमला लक्ष्मीः षोडशी विषयातुरा।
विषमग्ना विषरता विषरक्षा जयद्रथा।।७७।।
काकपक्षधरा नित्या सर्वविस्मयकारिणी।
गदिनी कामिनी खड्गमुण्डमालाविभूषिता।।७८।।
योगीश्वरी योगमाता योगानन्दस्वरूपिणी।
आनन्दभैरवी नन्दा तथा नन्दजनप्रिया।।७९।।
नलिनी ललना शुभ्रा शुभ्राननविभूषिता।
ललज्जिह्वा नीलपदा तथा सु(मु?म)खदक्षिणा।।८०।।
बलिभक्ता बलिरता बलिभोग्या महारता।
फलभोग्या फलरसा फलदा श्रीफलप्रिया।।८१।।
फलिनी फलसंवज्ञा फलाफलनिवारिणी।
फलप्रीता फलगता फलसंदानसन्धिनी।।८२।।
फलोन्मुखी सर्वसत्त्वा महासत्त्वा च सात्त्विकी।
सर्वरूपा सर्वरता सर्वसत्त्वनिवासिनी।।८३।।
महारूपा महाभागा महामेघस्वरूपिणी।
भयनासा गणरता गणप्रीता महागतिः।।८४।।
सद्गतिः सत्कृतिः स्वक्षा शवासनगता शुभा।
त्रैलोक्यमोहिनी गङ्गा स्वर्गङ्गा स्वर्गवासिनी।।८५।।

महानन्दा सदानन्दा नित्यानित्यस्वरूपिका।
सत्यगन्धा सत्यगणा सत्यरूपा महाकृतिः॥८६॥

चण्डोग्रायै, चण्डवर्णायै, प्रचण्डायै, चण्डवत्यै, शिवायै, नीलाकारायै, नीलवर्णायै, नीलेन्दीवरलोचनायै, खड्गहस्तायै, मृद्वङ्ग्यै, खर्परधारिण्यै, भीमायै, भीमवदनायै, महाभीमायै, भयानकायै, कल्याण्यै, मङ्गलायै, शुद्धायै, परम कौतुकायै, परमेष्ठ्यै, पररतायै, परात्परतरायै, परायै, परानन्दस्वरूपायै, नित्यानन्दस्वरूपिण्यै, नित्यायै, नित्यप्रियायै, तन्द्र्यै, भवान्यै, भवसुन्दर्यै, त्रैलोक्यमोहिन्यै, सिद्धायै, सिद्धजनप्रियायै, भैरव्यै, भैरवप्रीतायै, भैरवमोहिन्यै, मातङ्ग्यै, कमलायै, लक्ष्म्यै, षोडश्यै, विषयातुरायै, विषमग्नायै, विषरतायै, विषरक्षायै, जयद्रथायै, काकपक्षधरायै, नित्यायै, सर्वविस्मयकारिण्यै, गदिन्यै, कामिन्यै, खड्गमुण्डमालाविभूषितायै, योगीश्वर्यै, योगमातायै, योगानन्दस्वरूपिण्यै, आनन्दभैरव्यै, नन्दायै, नन्दजनप्रियायै, नलिन्यै, ललनायै, शुभ्रायै, शुभ्राननाविभूषितायै, ललज्जिह्वायै, नीलपदायै, सुमखदक्षिणायै, बलिभक्तायै, बलिरतायै, बलिभोग्यायै, महारतायै, फलभोग्यायै, फलरसायै, फलदायै, श्रीफलप्रियायै, फलिन्यै, फलसंवज्रायै, फलाफलनिवारिण्यै, फलप्रीतायै, फलगतायै, फलसदानन्दसन्धिन्यै, फलोन्मुख्यै, सर्वसत्वायै, महासत्वायै, सात्विक्यै, सर्वरूपायै, सर्वरतायै, सर्वसत्वनिवासिन्यै, महारूपायै, महाभागायै, महामेघस्वरूपिण्यै, भयनासायै, गणरतायै, गणप्रीतायै, महागत्यै, सद्गत्यै, सत्कृत्यै, स्वक्षायै, शवासनगतायै, शुभायै, त्रैलोक्यमोहिन्यै, गङ्गायै, स्वर्गङ्गायै, स्वर्गवासिन्यै, महानन्दायै, सदानन्दायै, नित्यानित्य स्वरूपिकायै, सत्यगन्धायै, सत्यगणायै, सत्यरूपायै तथा महाकृत्यै। (६०५)

श्मशानभैरवी काली तथा भयविमर्दिनी।
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी॥८७॥
त्रिपुरेशी पञ्चदशमी पञ्चमी पुरवासिनी।
महासप्तदशी षष्ठी सप्तमी (चा)ष्टमी तथा॥८८॥
नवमी दशमी देवप्रिया चैकादशी शिवा।
द्वादशी परमा दिव्या नीलरूपा त्रयोदशी॥८९॥
चतुर्दशी पौर्णमासी राजराजेश्वरी तथा।
त्रिपुरा त्रिपुरेशी च तथा त्रिपुरमर्दिनी॥९०॥
सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोपवीतिनी।
चामरी चामरप्रीता चमरासुरमर्दिनी॥९१॥
मनोज्ञा सुन्दरी रम्या हंसी च चारुहासिनी।
नितम्बिनी नितम्बाढ्या नितम्बगुरुशोभिता॥९२॥

पट्टवस्त्रप(रि?री)धाना पट्टवस्त्रधरा-शुभा।
कर्पूरचन्द्रवदना कुङ्कुमद्रवशोभिता॥९३॥
पृथिवी पृथुरूपा सा पार्थिवेन्द्रविनाशिनी।
रत्नवेदिः सुरेशा च सुरेशी सुरमोहिनी॥९४॥
शिरोमणिर्मणिग्रीवा मणिरत्नविभूषिता।
उर्वशी शमनी काली महाकालस्वरूपिणी॥९५॥
सर्वरूपा महासत्त्वा रूपान्तरविलासिनी।
शिवा शैवा च रुद्राणी तथा शिवनिनादिनी॥९६॥
मातङ्गिनी भ्रामरी च तथैवा(ङ्गन?नङ्ग)मेखला।
योगिनी डाकिनी चैव तथा महेश्वरि-परा॥९७॥
अलम्बुषा भवानी च महाविद्यौघसंभृता।
गृध्ररूपा ब्रह्मयोनिर्महानन्दा महोदया॥९८॥
विरूपाक्षा महानादा चण्डरूपा कृताकृतिः।
वरारोहा महावल्ली महात्रिपुरसुन्दरी॥९९॥
भगात्मिका भगाधाररूपिणी भगमालिनी।
लिङ्गाभिधायिनी देवी महामाया महास्मृतिः॥१००॥

श्मशानभैरव्यै, काल्यै, भयविमर्दिन्यै, त्रिपुरायै, परमेशान्यै, सुन्दर्यै, पुरसुन्दर्यै, त्रिपुरेश्यै, पञ्चदश्यै, पञ्चम्यै, पुरवासिन्यै, महासप्तदश्यै, षष्ठ्यै, सप्तम्यै, अष्टम्यै, नवम्यै, दशम्यै, देवप्रियायै, एकादश्यै, शिवायै, द्वादश्यै, परमायै, दिव्यायै, नीलरूपायै, त्रयोदश्यै, चतुर्दश्यै, पौर्णमास्यै, राजराजेश्वर्यै, त्रिपुरायै, त्रिपुरेश्यै, त्रिपुर मर्दिन्यै, सर्वाङ्गसुन्दर्यै, रक्तायै, रक्तवस्त्रोपवीतिन्यै, चामर्यै, चामरप्रीतायै, चमरासुरमर्दिन्यै, मनोज्ञायै, सुन्दर्यै, रम्यायै, हंस्यै, चारुहासिन्यै, नितम्बिन्यै, नितम्बाढ्यायै, नितम्बगुरुशोभितायै, पट्टवस्त्रपरीधानायै, पट्टवस्त्र धराशुभायै, कर्पूरचन्द्रवदनायै, कुंकुमद्रवशोभितायै, पृथिव्यै, पृथुरूपायै, पार्थिवेन्द्र विनाशिन्यै, रत्नवेद्यै, सुरेशायै, सुरेश्यै, सुरमोहिन्यै, शिरोमण्यै, मणिग्रीवायै, मणिरत्नविभूषितायै, उर्वश्यै, शमन्यै, महाकाल स्वरूपिण्यै, काल्यै, सर्वरूपायै, महासत्वायै, रूपान्तर विलासिन्यै, शिवायै, शैवायै, रुद्राण्यै, शिवनिनादिन्यै, मातङ्गिन्यै, भ्रामर्यै, अनङ्गमेखलायै, योगिन्यै, डाकिन्यै, महेश्वरीपरायै, अलम्बुषायै, भवान्यै, महाविद्यौघस्मृतायै, गृध्ररूपायै, ब्रह्मयोन्यै, महानन्दायै, महोदयायै, विरूपाक्षायै, महानादायै, चण्डरूपायै, कृताकृत्यै, वरारोहायै, महावल्ल्यै, महात्रिपुर सुन्दर्यै, भगात्मिकायै, भगाधार रूपिण्यै, भगमालिन्यै, लिङ्गाभिधायिनी देव्यै, महामायायै तथा महास्मृत्यै॥(७०१)

महामेधा महाशान्ता शान्तरूपा वरानना।
लिङ्गमाला लिङ्गभूषा भगमालाविभूषणा॥१०१॥
भगलिङ्गामृतप्रीता भगलिङ्गामृतात्मिका।
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी॥१०२॥
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमासना।
स्वयम्भूकुसुमरता लतालिङ्गनतत्परा॥१०३॥
सुराशना सुराप्रीता सुरासवविमर्दिता।
सुरापानमहातीक्ष्णा सर्वागमविनिन्दिता॥१०४॥
कुण्डगोलसदाप्रीता गोलपुष्पसदारतिः।
कुण्डगोलोद्भवप्रीता कुण्डगोलोद्भवात्मिका॥१०५॥
स्वयम्भवा शिवा-धात्री पावनी लोकपावनी।
महालक्ष्मीर्महेशानी महाविष्णुप्रभाविनी॥१०६॥
विष्णुप्रिया विष्णुरता विष्णुभक्तिपरायणा।
विष्णोर्वक्षःस्थलस्था च विष्णुरूपा च वैष्णवी॥१०७॥
अश्विनी भरणी चैव कृत्तिका रोहिणी तथा।
धृतिर्मेघा तथा तुष्टिः पुष्टिरूपा चिता चितिः॥१०८॥
चितिरूपा चित्स्वरूपा ज्ञानरूपा सनातनी।
सर्वविज्ञजया गौरी गौरवर्णा शची शिवा॥१०९॥
भवरूपा भवपरा भवानी भवमोचिनी।
पुनर्वसुस्तथा पुष्या तेजस्वी सिन्धुवासिनी॥११०॥
शुक्राशना शुक्रभोगा शुक्रोत्सारणतत्परा।
शुक्रपूज्या शुक्रवन्दया शुक्रभोग्या पुलोमजा॥१११॥
शुक्रार्च्या शुक्रसंतुष्टा सर्वशुक्रविमुक्तिदा।
शुक्रमूर्त्तिः शुक्रदेहा शुक्राङ्गी शुक्रमोहिनी॥११२॥
देवपूज्या देवरता युवती सर्वमङ्गला।
सर्वप्रियङ्करी भोग्या भोगरूपा (भो?भ)गाकृतिः॥११३॥
भगप्रेता भगरता भगप्रेमपरा तथा।
भगसंमर्दनप्रीता भगोपरि-निवेशिता॥११४॥
भगदक्षा भगाक्रान्ता भगसौभाग्यवर्द्धिनी।
दक्षकन्या महादक्षा सर्वदक्षा प्रदन्तिका॥११५॥

महामेधायै, महाशान्तायै, शान्तरूपायै, वराननायै, लिङ्गमालायै, लिङ्गभूषायै, भगमालाविभूषणायै, भगलिङ्गामृतप्रीतायै, भगलिङ्गामृतात्मिकायै, भगलिङ्गार्चन प्रीतायै, भगलिङ्गस्वरूपिण्यै, स्वयम्भूकुसुमप्रीतायै, स्वयम्भूकुसुमासनायै, स्वयम्भूकुसुम रतायै, लतालिङ्गनतत्परायै, सुराशनायै, सुराप्रीतायै, सुरासवविमर्दितायै, सुरापान महातीक्ष्णायै, सर्वागमविनिन्दितायै, कुण्डगोलसदाप्रीतायै, गोलपुष्पसदारत्यै, कुण्डगोलोद्भवप्रीतायै, कुण्डगोलोद्भवात्मिकायै, स्वयम्भवायै, शिवायै, धात्र्यै, पावन्यै, लोकपावन्यै, महालक्ष्म्यै, महेशान्यै, महाविष्णु प्रभाविन्यै, विष्णुप्रियायै, विष्णुरतायै, विष्णुभक्तिपरायणायै, विष्णोर्वक्षस्थलस्थायै, विष्णुरूपायै, वैष्णव्यै, अश्विन्यै, भरण्यै, कृतिकायै, रोहिण्यै, धृत्यै, मेधायै, तुष्ट्यै, पुष्टिरूपायै, चितायै, चित्यै, चितिरूपायै, चित्स्वरूपायै, ज्ञानरूपायै, सनातन्यै, सर्वविज्ञजयायै, गौर्यै, गौरवर्णायै, शच्यै, शिवायै, भवरूपायै, भवपरायै, भवान्यै, भवमोचिन्यै, पुनर्वसवे, पुष्यायै, तेजस्व्यै, सिन्धुवासिन्यै, शुक्राशनायै, शुक्रभोगायै, शुक्रोत्सारण तत्परायै, शुक्रपूज्यायै, शुक्रवन्द्यायै, शुक्रभोग्यायै, पुलोमजायै, शुक्रार्च्यायै, शुक्रसन्तुष्टायै, सर्वशुक्रविमुक्तिदायै, शुक्रमूर्त्यै, शुक्रदेहायै, शुक्राङ्ग्यै, शुक्रमोहिन्यै, देवपूज्यायै, देवरतायै, युवत्यै, सर्वमङ्गलायै, सवप्रियङ्कर्यै, भोग्यायै, भोगरूपायै, भगाकृत्यै, भगप्रेतायै, भगरतायै, भगप्रेमपरायै, भगसम्मर्दनप्रीतायै, भगोपरि निवेशितायै, भगदक्षायै, भगाक्रान्तायै, भगसौभाग्यवर्द्धिन्यै, दक्षकन्यायै, महादक्षायै, सर्व-दक्षायै तथा प्रदन्तिकायै। (८००)

दण्डप्रिया दण्डरता दण्डताडनतत्परा।
दण्डभीता दण्डगता दण्डसंमर्दने-रता॥११६॥
वेदिमण्डलमध्यस्था भूर्भुवःस्वःस्वरूपिणी।
आद्या-दुर्गा जया सूक्ष्मा सूक्ष्मरूपा जयाकृतिः॥११७॥
क्षेमङ्करी महाघूर्णा घूर्णनासा वशङ्करी।
विशालावयवा मेध्या त्रिवलीवलया-शुभा॥११८॥
मद्योन्मत्ता मद्यरता मत्तासुरविलासिनी।
मधुकैटभसंहन्त्री निशुम्भासुरमर्दिनी॥११९॥
चण्डरूपा महाचण्डा चण्डिका चण्डनायिका।
चण्डोग्रा च चतुर्वर्गा तथा चण्डावती-शिवा॥१२०॥
नीलदेहा नीलवर्णा नीलेन्दीवरलोचना।
नित्यानित्यप्रिया भद्रा भवानी भवसुन्दरी॥१२१॥
भैरवी भैरवप्रीता तथा भैरवमोहिनी।
मातङ्गी कमला लक्ष्मीः षोडशी भीषणातुरा॥१२२॥

विषमग्ना विषरता विषभक्ष्या जया तथा।
काकपक्षधरा नित्या सर्वविस्मयकारिणी॥१२३॥
गदिनी कामिनी खड्गा मुण्डमालाविभूषिता।
योगेश्वरी योगरता योगानन्दस्वरूपिणी॥१२४॥
आनन्दभैरवी नन्दा तथानन्दजनप्रिया।
नलिनी ललना शुभ्रा शुभाननविराजिता॥१२५॥
ललज्जिह्वा नीलपदा तथा संमुखदक्षिणा।
बलिभक्ता बलिरता बलिभोग्या महारता॥१२६॥
फलभोग्या फलरसा फलदात्री फलप्रिया।
फलिनी फलसंरक्ता फलाफलनिवारिणी॥१२७॥
फलप्रीता फलगता फलसन्धानसन्धिनी।
फलोन्मुखी सर्वसत्त्वा महासत्त्वा च सात्त्विका॥१२८॥
सर्वरूपा सर्वरता सर्वसत्त्वनिवासिनी।
महारूपा महाभागा महामेघस्वरूपिणी॥१२९॥
भयनाशा गणरता गणगीता महागतिः।
सद्गतिः सत्कृतिः साक्षात्-सदासनगता-शुभा॥१३०॥

दण्डप्रियायै, दण्डरतायै, दण्डताडनतत्परायै, दण्डभीतायै, दण्डगतायै, दण्डसम्मर्दनेरतायै, वेदिमण्डलमध्यस्थायै, भूभुर्वः स्वः स्वरूपिण्यै, आद्यादुर्गायै, जयायै, सूक्ष्मायै, सूक्ष्मरूपायै, जयाकृत्यै, क्षेमकर्यै, महाघूर्णायै, घूर्णनासायै, वशङ्कर्यै, विशालावयवायै, मेध्यायै, त्रिवलीवलयाशुभायै, मद्योन्मत्तायै, मद्यरतायै, मत्तासुरविलासिन्यै, मधुकैटभसंहन्त्र्यै, निशुम्भासुरमर्दिन्यै, चण्डरूपायै, महाचण्डायै, चण्डिकायै, चण्डनायिकायै, चण्डोग्रायै, चतुर्वगायै, चण्डावती शिवायै, नीलदेहायै, नीलवर्णायै, नीलेन्दीवरलोचनायै, नित्यानित्यप्रियायै, भद्रायै, भवान्यै, भवसुन्दर्यै, भैरव्यै, भैरवप्रीतायै, भैरवमोहिन्यै, मातङ्ग्यै, कमलायै, लक्ष्म्यै, षोडश्यै, भीषणातुरायै, विषमग्नायै, विषरतायै, विषभक्ष्यायै, जयायै, काकपक्षधरायै, नित्यायै, सर्वविस्मयकारिण्यै, गदिन्यै, कामिन्यै, खड्गायै, मुण्डमालाविभूषितायै, यौगेश्वर्यै, योगरतायै, योगानन्दस्वरूपिण्यै, आनन्दभैरव्यै, नन्दायै, नन्दजनप्रियायै, नलिन्यै, ललनायै, शुभ्रायै, शुभाननविराजितायै, ललज्जिह्वायै, नीलपदायै, सम्मुखदक्षिणायै, बलिभक्तायै, बलिरतायै, बलिभोग्यायै, महारतायै, फलभोग्यायै, फलरसायै, फलदात्र्यै, फलप्रियायै, फलिन्यै, फलसंरक्तायै, फलाफलनिवारिण्यै, फलप्रीतायै, फलगतायै, फलसन्धानसन्धिन्यै, फलोन्मुख्यै, सर्वसत्वायै, महासत्वायै, सात्विकायै,

सर्वरूपायै, सर्वरतायै, सर्वसत्वनिवासिन्यै, महारूपायै, महाभागायै, महामेघस्वरूपिण्यै, भयनाशायै, गणरतायै, गणगीतायै, महागत्यै, सद्गत्यै, सत्कृत्यै तथा साक्षात् सदासनगता-शुभायै।(९०२)

त्रैलोक्यमोहिनी गङ्गा स्वर्गङ्गा स्वर्गवासिनी।
महानन्दा सदानन्दा नित्या सर्वस्वरूपिणी॥१३१॥
शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी।
महाशुक्रा शुक्ररता शुक्रसृष्टिविधायिनी॥१३२॥
सारदा साधकप्राणा साधकप्रेमवर्द्धिनी।
साधकाभीष्टदा नित्यं साधकप्रेमसेविता॥१३३॥
साधकप्रेमसर्वस्वा साधकाभक्तरक्तपा।
मल्लिका मालती जातिः सप्तवर्णा महाकचा॥१३४॥
सर्वमयी सर्वशुभ्रा गाणपत्यप्रदा तथा।
गगना गगनप्रीता तथा गगनवासिनी॥१३५॥
गणनाथप्रिया भव्या भवार्चा सर्वमङ्गला।
गुह्यकाली भद्रकाली शिवरूपा सतांगतिः॥१३६॥
सद्भक्ता सत्परा सेतुः सर्वाङ्गसुन्दरी मघा।
क्षीणोदरी महावेगा वेगानन्दस्वरूपिणी॥१३७॥
रुधिरा रुधिरप्रीता रुधिरानन्दशोभना।
पञ्चमी-पञ्चमप्रीता तथा पञ्चमभूषणा॥१३८॥
पञ्चमीजपसंपन्ना पञ्चमीयजने-रता।
ककारवर्णरूपा च ककाराक्षररूपिणी॥१३९॥
मकारपञ्चमप्रीता मकारपञ्चगोचरा।
ऋवर्णरूपप्रभवा ऋवर्णा सर्वरूपिणी॥१४०॥
(स?श)र्वाणी सर्वनिलया सर्वसारसमुद्भवा।
सर्वेश्वरी सर्वसारा सर्वे(षा?च्छा) सर्वमोहिनी॥१४१॥
गणेशजननी दुर्गा महामाया महेश्वरी।
महेशजननी मोहा विद्या-विद्योतनी विभा॥१४२॥
स्थिरा च स्थिरचित्ता च सुस्थिरा धर्मरञ्जिनी।
धर्मरूपा धर्मरता धर्माचरणतत्परा॥१४३॥
धर्मानुष्ठानसन्दर्भा सर्वसन्दर्भसुन्दरी।
स्वधा-स्वाहा-वषट्कारा श्रौषट्-वौषट्-स्वधात्मिका॥१४४॥

ब्राह्मणी ब्रह्मसंबन्धा ब्रह्मस्थाननिवासिनी।
पद्मयोनिः पद्मसंस्था चतुर्वर्गफलप्रदा॥१४५॥
चतुर्भुजा शिवयुता शिवलिङ्गप्रवेशिनी।

त्रैलोक्यमोहिन्यै, गङ्गायै, स्वर्गङ्गायै, स्वर्गवासिन्यै, महानन्दायै, सदानन्दायै, नित्यायै, सर्वस्वरूपिण्यै, शुक्रस्नातायै, शुक्रकर्यै, शुक्रसेव्यातिशुक्रिण्यै, महाशुक्रायै, शुक्ररतायै, शुक्रसृष्टिविधायिन्यै, सारदायै, साधकप्राणायै, साधक प्रेमवर्धिन्यै, साधकाभीष्टदायै, नित्यसाधकप्रेमसेवितायै, साधकप्रेमसर्वस्वायै, साधकाभक्तरक्तपायै, मल्लिकायै, मालत्यै, जात्यै, सप्तवर्णायै, महाकचायै, सर्वमय्यै, सर्वशुभ्रायै, गाणपत्यप्रदायै, गगनायै, गगनप्रीतायै, गगनवासिन्यै, गणनाथप्रियायै, भव्यायै, भवार्चायै, सर्वमङ्गलायै, गुह्काल्यै, भद्रकाल्यै, शिवरूपायै, सतांगत्यै, सद्भक्तायै, सत्परायै, सेतवे, सर्वाङ्गसुन्दर्यै, मघायै, क्षीणोदर्यै, महावेगायै, वेगानन्दस्वरूपिण्यै, रुधिरायै, रुधिरप्रीतायै, रुधिरानन्द शोभनायै, पञ्चम्यै, पञ्चमीप्रीतायै, पञ्चमभूषणायै, पञ्चमीजपसम्पन्नायै, पञ्चमीयजनेरतायै, ककारवर्णरूपायै, ककाराक्षररूपिण्यै, मकारपञ्चमप्रीतायै, मकारपञ्चमगोचरायै, ॠवर्णरूपप्रभवायै, ॠवर्णायै, सर्वरूपिण्यै, शर्वाण्यै, सर्वनिलयायै, सर्वसारसमुद्भवायै, सर्वेश्वर्यै, सर्वसारायै, सर्वेच्छायै, सर्वमोहिन्यै, गणेशजनन्यै, दुर्गायै, महामायायै, महेश्वर्यै, महेशजनन्यै, मोहायै, विद्या-विद्योतन्यै, विभायै, स्थिरायै, स्थिरचित्तायै, सुस्थिरायै, धर्मरञ्जिन्यै, धर्मरूपायै, धर्मरतायै, धर्माचरणतत्परायै, धर्मानुष्ठानसन्दर्भायै, सर्वसन्दर्भसुन्दर्यै, स्वधा-स्वाहा-वषट्कारायै, श्रौषट्-वौषट्-स्वधात्मिकायै, ब्राह्मण्यै, ब्रह्मसम्बन्धायै, ब्रह्मस्थान निवासिन्यै, पद्मयोन्यै, पद्मसंस्थायै, चतुर्वगफलप्रदायै, चतुर्भुजायै, शिवयुतायै तथा शिवलिङ्गप्रवेशिन्यै।(१०००)

महाभीमा चारुकेशी गन्धमादनसंस्थिता॥१४६॥
गन्धर्वपूजिता गन्धा सुगन्धा सुरपूजिता।
गन्धर्वनिरता-देवी सुरभी सुगन्धा तथा॥१४७॥
पद्मगन्धा महागन्धा गन्धामोदितदिङ्मुखा।
कालदिग्धा कालरता महिषासुरमर्दिनी॥१४८॥
विद्या-विद्यावती चैव विद्येशा विज्ञसंभवा।
विद्याप्रदा महावाणी महाभैरवरूपिणी॥१४९॥
भैरवप्रेमनिरता महाकालरता-शुभा।
माहेश्वरी गजारूढा गजेन्द्रगमना तथा॥१५०॥
यज्ञेन्द्रललना चण्डी गजासनपराश्रया।
गजेन्द्रमन्दगमना महाविद्या महोज्ज्वला॥१५१॥

बगला-वाहिनी वृद्धा बाला च बालरूपिणी।
बालक्रीडारता बाला-बलासुरविनाशिनी॥१५२॥
बाल्यस्था यौवनस्था च महायौवनसंरता।
विशिष्टयौवना काली कृष्णदुर्गा सरस्वती॥१५३॥
कात्यायनी च चामुण्डा चण्डासुरविघातिनी।
चण्डमुण्डधरा देवी मधुकैटभनाशिनी॥१५४॥
ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा।
रुद्रकाली विशालाक्षी भैरवी कालरूपिणी॥१५५॥
महामाया महोत्साहा महाचण्डविनाशिनी।
कुलश्रीः कुलसंकीर्णा कुलगर्भनिवासिनी॥१५६॥
कुलाङ्गारा कुलयुता कुलकुन्तलसंयुता।
कुलदर्भग्रहा चैव कुलगर्तप्रदायिनी॥१५७॥
कुलप्रेमयुता साध्वी शिवप्रीतिः शिवाबलिः।
शिवसक्ता शिवप्राणा महादेवकृतालया॥१५८॥
महादेवप्रिया कान्ता महादेवमदातुरा।
मत्ता-मत्तजनप्रेमधात्री विभववर्द्धिनी॥१५९॥
मदोन्मत्ता महाशुद्धा मत्तप्रेमविभूषिता।
मत्तप्रमत्तवदना मत्तचुम्बनतत्परा॥१६०॥
मत्तक्रीडातुरा भैमी तथा हैमवती मतिः।
मदातुरा मदगता विपरीतरतातुरा॥१६१॥
वित्तप्रदा वित्तरता वित्तवर्धनतत्परा(११००)।
इति ते कथितं सर्वं कालीनामसहस्रकम्॥१६२॥

महाभीमायै, चारुकेश्यै, गन्धमादनसंस्थितायै, गन्धर्वपूजितायै, गन्धायै, सुगन्धायै, सुरपूजितायै, गन्धर्वनिरतादेव्यै, सुरभ्यै, पद्मगन्धायै, महागन्धायै, गन्धामोदितदिङ्मुखायै, कालदिग्धायै, कालरतायै, महिषासुरमर्दिन्यै, विद्यायै, विद्यावत्यै, विद्येशायै, विज्ञसम्भवायै, विद्याप्रदायै, महावाण्यै, महाभैरवरूपिण्यै, भैरवप्रेमनिरतायै, महाकालरतायै, शुभायै, माहेश्वर्यै, गजारूढायै, गजेन्द्रगमनायै, यज्ञेन्द्रललनायै, चण्ड्यै, गजासनपराश्रयायै, गजेन्द्रमन्दगमनायै, महाविद्यायै, महोज्ज्वलायै, बगलावाहिन्यै, वृद्धायै, बालायै, बालरूपिण्यै, बालक्रीडारतायै, बाला-बलासुरविनाशिन्यै, बाल्यस्थायै, यौवनस्थायै, महायौवनसंरतायै, विशिष्टयौवनायै, काल्यै, कृष्णायै, दुर्गायै, सरस्वत्यै, कात्यायिन्यै, चामुण्डायै,

चण्डासुरविघातिन्यै, चण्डमुण्डधरायै, मधुकैटभनाशिन्यै, ब्राह्म्यै, माहेश्वर्यै, ऐन्द्रयै, वाराह्यै, वैष्णव्यै, रुद्रकाल्यै, विशालाक्ष्यै, भैरव्यै, कालरूपिण्यै, महामायायै, महोत्साहायै, महाचण्डविनाशिन्यै, कुलश्रियै, कुलसङ्कीर्णायै, कुलगर्भनिवासिन्यै, कुलाङ्गारायै, कुलयुतायै, कुलकुन्तलसंयुतायै, कुलदर्भग्रहायै, कुलगर्तप्रदायिन्यै, कुलप्रेमयुतायै, साध्व्यै, शिवप्रीत्यै, शिवाबल्यै, शिवसक्तायै, शिवप्राणायै, महादेवकृतालयायै, महादेवप्रियायै, कान्तायै, महादेवमदातुरायै, मत्ता-मत्तजनप्रेमधात्र्यै, विभववर्द्धिन्यै, मदोन्मत्तायै, महाशुद्धायै, मत्तप्रेमविभूषितायै, मत्तप्रमत्तवदनायै, मत्तचुम्बनतत्परायै, मत्तक्रीडातुरायै, भैम्यै, हैमवत्यै, मत्यै, मदातुरायै, मदगतायै, विपरीतरतातुरायै, वित्तप्रदायै, वित्तरतायै तथा वित्तवर्धनतत्परायै।(११००)

इस प्रकार मैंने काली के सहस्र (शताधिकसहस्र)नामों का तुमसे वर्णन किया।

।। सहस्रनाम-स्तोत्र-पाठ-फलश्रुतिः।।

सारात्सारतरं दिव्यं महाविभववर्द्धनम्।
गाणपत्यप्रदं राज्यप्रदं षट्कर्मसाधकम्।।१६३।।
यः पठेत् साधको नित्यं स भवेत् संपदां पदम्।
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदथ।।१६४।।
न किञ्चिद् दुर्लभं लोके स्तवस्यास्य प्रसादतः।
ब्रह्महत्या सुरापानं सुवर्णहरणं तथा।।१६५।।
गुरुदाराभिगमनं यच्चान्यद् दुष्कृतं कृतम्।
सर्वमेतत्पुनात्येव सत्यं सुरगणार्च्चिते।।१६६।।
रजस्वलाभगं दृष्ट्वा पठेत् स्तोत्रमनन्यधीः।
स शिवः सत्यवादी च भवत्येव न संशयः।।१६७।।
परदारयुतो भूत्वा पठेत् स्तोत्रं समाहितः।
सर्वैश्वर्ययुतो भूत्वा महाराजात्वमाप्नुयात्।।१६८।।
परनिन्दां परद्रोहं परहिंसां न कारयेत्।
शिवभक्ताय शान्ताय प्रियभक्ताय वा पुनः।।१६९।।
स्तवं च दर्शयेदेनमन्यथा मृत्युमाप्नुयात्।
अस्मात् परतरं नास्ति तन्त्रमध्ये सुरेश्वरि।।१७०।।
महाकाली महादेवी तथा नीलसरस्वती।
न भेदः परमेशानि भेदकृन्नरकं व्रजेत्।।१७१।।
इदं स्तोत्रं मया दिव्यं तव स्नेहात् प्रकथ्यते।
उभयोरेवमेकत्वं भेदबुद्धया न तां भजेत्।
स योगी परमेशानि समो मानापमानयोः।।१७२।।

इति श्रीबृहन्नीलतन्त्रे भैरवभैरवीसंवादे
(कालीसहस्रनाम निरूपणं) द्वाविंशः पटलः॥२२॥

सार के भी सारतर रूप काली का यह सहस्रनाम स्तोत्र महान ऐश्वर्य की वृद्धि करने वाला संगठन का आधिपत्य गणनायक पद अथवा गणेश कासेवकत्व रूप प्रदान करने वाला, राज्य प्रदान करने वाला तथा षट्कर्मों को सिद्ध करने वाला है। जो भी साधक इसका नित्य पाठ करता है, वह सम्पत्तिशाली हो जाता है। इस सहस्रनाम स्तोत्र की कृपा से इसका पाठ करने वाला, पाठ कराने वाला, सुनने वाला तथा सुनाने वाला सभी के लिए इस लोक में कुछ भी प्राप्त करना असम्भव नहीं होता है। हे सुरपूजिते देवि! ऐसा साधक ब्रह्महत्या, सुरापान, स्वर्णचोरी तथा गुरुपत्नी गमन जैसे जघन्य पापों का एवं अन्य किसी भी प्रकार के दुष्कर्मों का कर्ता होने पर भी इस स्तोत्र के प्रभाव से पवित्र हो जाता है। यह कथन निःसन्देह सत्य है। रजस्वला स्त्री के भग को देखते हुए (विकृत चित्त हुए बिना) जो साधक इसका पाठ करता है, वह साक्षात् शिव के समान ही होता है तथा उसकी वाणी निःसन्देह सत्यभाषण करने वाली हो जाती है। पर स्त्री संयोग सहित पाठ करने वाला सभी प्रकार के ऐश्वर्यों का स्वामी होकर महाराज तक का पद प्राप्त करने वाला हो जाता है। साधक को कभी भी दूसरों की निन्दा, उनसे वैरभाव तथा उनकी हिंसा नहीं करनी चाहिए। जो व्यक्ति शिव-भक्त हो, शान्त प्रकृति वाला हो तथा अपना प्रियभक्त (शिष्य अथवा पुत्र) हो उसे ही इस स्तोत्र का ज्ञान-उपदेश देना चाहिए। अनधिकारी के समक्ष इसे प्रकट नहीं करना चाहिए अन्यथा साधक की मृत्यु हो सकती है। हे सुरेश्वरि! तन्त्रशास्त्रों में इससे श्रेष्ठ अन्य कोई भी स्तोत्र नहीं है। हे परमेशानि! महाकाली तथा महादेवी नील सरस्वती (तारा) इन दोनों में कोई भेद नहीं है। इनमें भेद-भावना वाला साधक नरक को गमन करने वाला होता है। इस दिव्य स्तोत्र को मैंने तुम्हारे प्रति प्रेम के कारण ही विशेष रूप से कहा है। काली तथा तारा दोनों को एक मानते हुए ही इनकी उपासना करनी चाहिए। इनमें कभी भी भेद बुद्धि रखकर साधना नहीं करनी चाहिए। जो साधक स्वयं के मान-अपमान के प्रति समभाव वाला होता है, वही वास्तव में योगी (श्रेष्ठ साधक) कहलाने का अधिकारी होता है।

॥ श्री बृहन्नील तन्त्र के भैरव भैरवी संवाद के अन्तर्गत
काली सहस्रनाम निरूपण नामक
बाईसवें पटल की 'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई॥

* * *

।। त्रयोविंशः पटलः।।

(काली शतनाम निरूपणम्)

।। श्री महाकाल्याःशतनामप्रकाशनाय प्रार्थना।।

श्री देव्युवाच

पुरा प्रतिश्रुतं देव क्रीडासक्तो यदा भवान्।
नाम्नां शतं महाकाल्याः कथयस्व मयि प्रभो।।१।।

हे प्रभो! पहले (कभी) क्रीडासक्त-काल में आपके द्वारा महाकाली के सौ नामों के विषय में मैंने सुना था। कृपया उन नामों को आप अब मुझसे कहें।

।। श्री महाकाल्याःशतनाम-वर्णनाय-प्रतीज्ञा।।

श्रीभैरव उवाच

साधु पृष्टं महादेवि अकथ्यं कथयामि ते।
न प्रकाश्यं वरारोहे स्वयोनिरिव सुन्दरि।।२।।
प्राणाधिकप्रियतरा भवती मम मोहिनी।
क्षणमात्रं न जीवामि त्वां बिना परमेश्वरि।।३।।
यथादर्शेऽमले बिम्बं घृतं दध्यादिसंयुतम्।
तथाहं जगतामाद्ये त्वयि सर्वत्र गोचरः।।४।।
शृणु देवि प्रवक्ष्यामि जपात् सार्वज्ञदायकम्।

हे महादेवि! आपने यह बहुत ही श्रेष्ठ विषय को पूछा (कहने के लिए प्रार्थना की) है। यह विषय (शतनाम कथन) अवर्णनीय होने पर भी (तुम्हारे प्रति प्रेम के कारण विवश होकर) मैं तुमसे कहता हूँ। हे सुन्दरि! स्वयोनि की भाँति इसे गुप्त रखना तथा कभी किसी (अनधिकारी) के सम्मुख प्रकट न करना। आप सदैव मुझको मोहित (प्रेम) करने वाली तथा प्राणों से भी अधिक प्रिय हैं। जैसे दर्पण में बिम्ब तथा दधि में सर्वत्र घृत की स्थिति होती है, उसी प्रकार सर्वत्र प्रकाशित होते हुए भी, हे विश्व की आदि कारण भूते! तुझमें ही मेरी स्थिति है। हे देवि! सर्वज्ञता प्रदान करने वाले महकाली के शतनामों को मैं कहता हूँ, सुनो।

।। विनियोग सहित शतनाम वर्णनम्।।

सदाशिव ऋषिः प्रोक्तोऽनुष्टुप् छन्दश्च ईरितः।।५।।
देवता भैरवो देवि पुरुषार्थचतुष्टये।
विनियोगः प्रयोक्तव्यः सर्वकर्मफलप्रदः।।६।।
महाकाली जगद्धात्री जगन्माता जगन्मयी।
जगदम्बा जगत्सारा जगदानन्दकारिणी(१०)।।७।।
जगद्विध्वंसिनी गौरी दुःखदारिद्र्यनाशिनी।
भैरवभाविनी भावानन्ता सारस्वतप्रदा।।८।।
चतुर्वर्गप्रदा साध्वी सर्वमङ्गलमङ्गला।
भद्रकाली(२०)विशालाक्षी कामदात्री कलात्मिका।।९।।
नीलवाणी महागौरसर्वाङ्गा सुन्दरी-परा।
सर्वसंपत्प्रदा भीमनादिनी वरवर्णिनी।।१०।।
वरारोहा (३०) शिवरुहा महिषासुरघातिनी।
शिवपूज्या शिवप्रीता दानवेन्द्रप्रपूजिता।।११।।
सर्वविद्यामयी शर्वसर्वाभीष्टफलप्रदा।
कोमलाङ्गी विधात्री च विधातृवरदायिनी(४०)।।१२।।
पूर्णेन्दुवदना नीलमेघवर्णा कपालिनी।
कुरुकुल्ला विप्रचित्ता कान्तचित्ता मदोन्मदा।।१३।।
मत्ताङ्गी मदनप्रीता मदाघूर्णितलोचना(५०)।
मदोत्तीर्णा खर्परासिनरमुण्डविलासिनी।।१४।।
नरमुण्डस्रजा देवी खड्गहस्ता भयानका।
अट्टहासयुता पद्मा पद्मरागोपशोभिता।।१५।।
वराभयप्रदा (६०) काली कालरात्रिस्वरूपिणी।
स्वधा स्वाहा वषट्कारा शरदिन्दुसमप्रभा।।१६।।
शरत्ज्योत्स्ना च संह्लादा विपरीतरतातुरा।
मुक्तकेशी (७०)छिन्नजटा जटाजूटविलासिनी।।१७।।
सर्पराजयुता-भीमा स(र्व?र्प)राजोपरि-स्थिता।
श्मशानस्था महानन्दिस्तुता संदीप्तलोचना।।१८।।
शवासनरता नन्दा सिद्धचारणसेविता(८०)।
बलिदानप्रिया गर्भा भूर्भुवःस्वःस्वरूपिणी।।१९।।
गायत्री चैव सावित्री महानीलसरस्वती।
लक्ष्मीर्लक्षणसंयुक्ता सर्वलक्षणलक्षिता।।२०।।

व्याघ्रचर्मावृता (९०) मेध्या त्रिवलीवलयाञ्चिता।
गन्धर्वैः संस्तुता सा हि तथा चेन्द्रा महापरा॥२१॥
पवित्रा परमा माया महामाया महोदया(१००)।
इति ते कथितं दिव्यं शतं नाम्नां महेश्वरि॥२२॥

इस शतनाम स्तोत्र के ऋषि सदाशिव, छन्द अनुष्टुप्, देवता भैरवी (महाकाली) तथा पुरुषार्थ चतुष्ट्य एवं सर्वकर्मफल की प्राप्ति के लिए इसका, विनियोग करना चाहिए।

[विनियोग:- **ॐ अस्य श्री महाकाल्याः शतनाम स्तोत्रस्य सदाशिव ऋषिः अनुष्टुप् छन्दः, श्री महाकाली देवता पुरुषार्थ चतुष्टये सर्वकर्मफल प्राप्त्यर्थे च पाठे (जपे) विनियोगः।**]

ॐ महाकाल्यै नमः। जगद्धात्र्यै नमः। जगन्मातायै नमः। जगन्मय्यै नमः। जगदम्बायै नमः। जगत्सारायै नमः। जगदानन्दकारिण्यै नमः। जगद्विध्वंसिन्यै नमः। गौर्यै नमः। दुखदारिद्र्य नाशिन्यै नमः। भैरव भाविन्यै नमः। भावानन्तायै नमः। सारस्वतप्रदायै नमः। चतुर्वग प्रदायै नमः। साध्व्यै नमः। सर्वमङ्गलमङ्गलायै नमः। भद्रकाल्यै नमः। विशालाक्ष्यै नमः। कामदात्र्यै नमः। कलात्मिकायै नमः। नीलवाण्यै नमः। महागौरसर्वाङ्गायै नमः। सुन्दर्यै नमः। परायै नमः। सर्वसम्पत्प्रदायै नमः। भीमनादिन्यै नमः। वरवर्णिन्यै नमः। वरारोहायै नमः। शिवरुहायै नमः। महिषासुरघातिन्यै नमः। शिव पूज्यायै नमः। शिव प्रीतायै नमः। दानवेन्द्र प्रपूजितायै नमः। सर्वविद्यामय्यै नमः। शर्वायै नमः। सर्वाभीष्ट फलप्रदायै नमः। कोमलाङ्ग्यै नमः। विधात्र्यै नमः। विधातृवरदायिन्यै नमः। पूर्णेन्दुवदनायै नमः। नीलमेघवर्णायै नमः। कपालिन्यै नमः। कुरुकुल्लायै नमः। विप्रचित्तायै नमः। कान्तचित्तायै नमः। मदोन्मदायै नमः। मत्ताङ्ग्यै नमः। मदनप्रीतायै नमः। मदाघूर्णितलोचनायै नमः। मदोत्तीर्णायै नमः। खर्परासिनरमुण्डविलासिन्यै नमः। नरमुण्डस्रजायै नमः। देव्यै नमः। खड्गहस्तायै नमः। भयानकायै नमः। अट्टहासयुतायै नमः। पद्मायै नमः। पद्मरागोपशोभितायै नमः। वराभयप्रदायै नमः। काल्यै नमः। कालरात्रिस्वरूपिण्यै नमः। स्वाधायै नमः। स्वाहायै नमः। वषट्कारायै नमः। शरदिन्दुसमप्रभायै नमः। शरज्ज्योत्स्नायै नमः। संह्लादायै नमः। विपरीतरतातुरायै नमः। मुक्तकेश्यै नमः। छिन्नजटायै नमः। जटाजूट विलासिन्यै नमः। सर्पराज युतायै नमः। भीमायै नमः। सर्पराजोपरिस्थितायै नमः। श्मशानस्थायै नमः। महानन्दिस्तुतायै नमः। सन्दीप्तलोचनायै नमः। शवासन रतायै नमः। नन्दायै नमः। सिद्धचारण सेवितायै नमः। बलिदान प्रियायै नमः।

गर्भायै नमः। भूःभुवःस्वः स्वरूपिण्यै नमः। गायत्र्यै नमः। सावित्र्यै नमः। महानील सरस्वत्यै नमः। लक्ष्म्यै नमः। लक्षणसंयुक्तायै नमः। सर्वलक्षण लक्षितायै नमः। व्याघ्र चर्मावृतायै नमः। मेध्यायै नमः। त्रिवलीवलयाञ्चितायै नमः। गन्धर्व-संस्तुतायै नमः। इन्द्रायै नमः। महापरायै नमः। पवित्रायै नमः। परमायै नमः। मायायै नमः। महामायायै नमः। महोदयायै नमः।

हे महेश्वरि! ये दिव्य शतनामों को तुम्हारे लिए मैंने कहा है।

(इन शतनामों का पाठ श्लोकाबद्ध रूप से न करके यदि चतुर्थ्यन्त नामों के पूर्व 'ॐ' (अथवा 'ह्रीं' अथवा 'क्रीं') तथा पश्चात् में 'नमः' लगाकर पाठ किया जाय तो अधिक श्रेयष्कर होता है।)

।। शतनाम(स्तोत्र) पाठ-फल-श्रुति।।

यः पठेत् प्रातरुत्थाय स तु विद्यानिधिर्भवेत्।
इह लोके सुखं भुक्त्वा देवीसायुज्यमाप्नुयात्।।२३।।
तस्या वश्या भवन्त्येते सिद्धौघाः सचराचराः।
खेचरा भूचराश्चैव तथा स्वर्गचराश्च ये।।२४।।
ते सर्वे वशमायान्ति साधकस्य हि नान्यथा।
नाम्नां वरं महेशानि परित्यज्य सहस्रकम्।।२५।।
पठितव्यं शतं देवि चतुर्वर्गफलप्रदम्।
अज्ञात्वा परमेशानि नाम्नां शतं महेश्वरि।।२६।।
भजते यो महाकालीं सिद्धिर्नास्ति कलौ युगे।
प्रपठेत् प्रयतो भक्त्या तस्य पुण्यफलं शृणु।।२७।।
लक्षवर्षसहस्रस्य कालीपूजाफलं भवेत्।
बहुना किमिहोक्तेन वाञ्छितार्थी भविष्यति।।२८।।

इति श्री बृहन्नीलतन्त्रे भैरवभैरवीसंवादे
(कालीशतनामनिरूपणं) त्रयोविंशः पटलः।।२३।।

जो भी साधक प्रातः उठकर नित्य इस महाकाली के सौ नामों का पाठ करता है, वह सभी विद्याओं का भण्डार हो जाता है तथा इस मर्त्यलोक में सभी ऐच्छिक सुखों का भोग कर मृत्यूपरान्त देवी सायुज्य रूप मोक्ष प्राप्त करता है। सभी सिद्धों के समूह उसके वशीभूत हो जाते हैं, यहाँ तक कि समस्त (जलचर) थलचर, गगनचर तथा स्वर्गस्थ चराचर प्राणी उस साधक के वश में हो जाते हैं। हे देवि महेशानि! काली के सहस्रनाम को छोड़कर केवल शतनाम का ही पाठ करना मेरे विचार से सर्वश्रेष्ठ है क्योंकि इसके

पाठ से ही साधक को चतुर्वर्गों (धर्म-अर्थ-काम तथा मोक्ष) की प्राप्ति हो जाती है। जो साधक काली के शतनामों को जाने (पाठ किये) बिना महाकाली का जप-पूजन करते हैं, उन्हें इस कलियुग में कभी भी सिद्धि की प्राप्ति नहीं होती। जो साधक नित्य आत्म संयमी होकर श्रद्धा-पवित्रता तथा भक्तिभाव सहित इस स्तोत्र का पाठ करता है, उसे एक लाख हजार वर्षों तक किये गये काली पूजन के फल की प्राप्ति होती है। अधिक क्या कहें उसकी समस्त कामनायें अवश्य ही पूरी होती हैं।

।। श्री बृहन्नील तन्त्र के भैरव भैरवी संवाद के अन्तर्गत
काली-शतनाम निरूपण नामक तेईसवें पटल की
'आशा-सुशीला' हिन्दी व्याख्या पूर्ण हुई।।

* * *

॥ चतुर्विंशः पटलः॥

(अन्नदामन्त्रोद्धार-शतनाम-तन्त्रमाहात्म्यनिरूपणम्)

॥ अन्नदा-मन्त्र प्रकाशनाय निवेदनम्॥

श्री देव्युवाच

देवदेव महादेव सृष्टिस्थित्यन्तकारक।
यदुक्तमन्नदाकल्पे तद्वदस्व समाहितः॥१॥
अन्नदायाः परं मन्त्रं विशेषं कथयामि ते।
इति में कथितं भद्र तद्वदस्व समाहितः॥२॥

संसार की सृष्टि-स्थिति तथा संहार करने वाले हे देवाधि देव महादेव! 'अन्नदाकल्प' के वर्णनकाल में 'मैं भगवती अन्नदा के मन्त्र को तुमसे विशेष रूप से कहता हूँ' ऐसा आपने मुझसे कहा था। अतः हे कल्याण स्वरूप प्रभु! मेरे आग्रह पर अब आप कृपया सावधान मनःस्थिति वाला होकर उस मन्त्र का मुझसे वर्णन करें।

॥ अन्नदा (अन्नपूर्णा) मन्त्रोद्धारः॥

श्रीभैरव उवाच

यथा काली तथा नीला तथा चैवान्नदा शिवे।
एतासां मन्त्रमेतस्मिन् कथितं परमेश्वरि॥३॥
एका मूर्तिस्त्रिधा भूत्वा जगतां हितकारिणी।
अन्नदायाः परं कल्पं कथितं तव सुन्दरि॥४॥
मन्त्रराजं महादेवि शृणुष्वैकमनाः प्रिये।
जृम्भणान्तं त्यक्तपार्श्वं यात्रावारणरोहकम्॥५॥
वामाक्षिसंयुतं देवि बिन्दुसंयुतमुत्तमम्।
प्रथमं बीजमेतद्धि कथितं परमेश्वरि॥६॥
ततश्च लोहितं देवि स्वराद्येन विभूषितम्।
अन्नवर्ण महादेवि मकारैकारसंयुतम्॥७॥
नान्नवर्ण महादेवि स्वराद्येन विभूषितम्।
ततश्च परमेशानि त्रिपदं सर्वगोपनम्॥८॥
मन्त्रं गुप्तं महेशानि वह्निजायावधिस्थितम्।
मन्त्रमेतन्महेशानि हठात् सिद्धिप्रदायकम्॥९॥
ध्यानपूजादिकं सर्व कथितं पूर्वकल्पके।

भगवती काली, नीला, (तारा अथवा नील सरस्वती) तथा अन्नदा तीनों का वास्तविक स्वरूप एक है। एक ही देवमूर्ति तीन रूपों में विभक्त होकर विश्व का कल्याण करने वाली है। इस कल्प (अथवा ग्रन्थ) में इन तीनों के मन्त्रों का मेरे द्वारा वर्णन किया गया है। हे सुन्दरि प्रिये! मैं तुमसे अन्नदा के श्रेष्ठ कल्प तथा इसके मन्त्र-राज को कहता हूँ, एकाग्र चित्त होकर सुनो।

(ग्रन्थ में दिये गये मन्त्रोद्धार के श्लोक अशुद्ध तथा अपूर्ण हैं। अन्य ग्रन्थों के आधार पर शुद्ध मन्त्रस्वरूप इस प्रकार होगा-)

मन्त्र स्वरुप - **'ह्रीं अन्नमहि अन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा'**।

यह मन्त्र शीघ्र ही निश्चित रूप से सिद्धिदायक है। इसके ध्यान-पूजनादि पहले ही हे गये कल्पों (तारा-पूजनादि विधान) के अनुसार ही किये जायेंगे।

।।अन्नदा-शतनाम-वर्णनम्।।

शतनाम प्रवक्ष्यामि सर्वसारस्वतप्रदम्।।१०।।
बिना येन महादेवीमन्नदां भजते नरः।
शतवर्षसहस्रेण तस्य सिद्धिर्न जायते।।११।।
तस्मात् सर्वप्रयत्नेन सावधानावधारय।
नाम्नां सहस्रं कथितं परमं तव सुन्दरि।।१२।।
इदानीं शृणु देवेशि अन्नदाशतनामकम्।
यस्मात् परतरं नास्ति तन्त्रमध्ये महेश्वरि।।१३।।
अन्नदा परमा माया महादेवी शिवप्रिया।
भवानी जगतामाद्या प्राणदा प्राणवल्लभा।।१४।।
जगज्जीवमयी (१०) गौरी त्रयी वेदमयी परा।
काशीपुरनिवासा च काशीपुरविनाशिनी।।१५।।
कैलासनिलया काली कल्पज्ञा कल्पदा (२०) शुभा।
महादेवप्रपूज्या च महादेवरतातुरा।।१६।।
पायसान्नप्रिया देवी पीनोन्नतपयोधरा।
त्रिवलीवलयोपेता नयनोत्तमसत्तमा।।१७।।
अन्नपात्रधृतानन्ता (३०) अन्नवेषनतत्परा।
गङ्गा गया विशालाक्षी विशालरूपयौवना।।१८।।
मदोन्मत्ता स्वरूपाङ्गी पूर्णचन्द्रनिभानना।
शिवप्राणा शिवरता (४०) सदाशिवमहाधना।।१९।।

महादेवप्रिया साध्वी सती कामालसा प्रिया।
कोमलाङ्गी कामकला कला काष्ठा(५०) यशस्विनी॥२०॥
प्रफुल्लपद्मवदना तथा पद्मालया शिवा।
भवानी भवनप्रीता पद्मासनसमाश्रया॥२१॥
वेष्टिता सिद्धगन्धर्वैः संस्तुता ऋषिभिस्तथा।
शिवेन सह संविष्टा (६०) शिवक्रीडनतत्परा॥२२॥
युवती यौवनप्रीता नित्ययौवनतत्परा।
सदा षोडशवर्षीया सदाशिवमनोरमा॥२३॥
चारुरूपधरा चारुवक्त्रा चारुपराक्रमा।
चार्वङ्गी(७०) कनकाङ्गी च कनकोपरि-संस्थिता॥२४॥
अन्नपूर्णा सदापूर्णा भूषणा स्वर्णकङ्कणा।
भक्तप्राणा भक्तरता भक्तभोजनतत्परा॥२५॥
आज्यप्रिया(८०) विरूपाक्षी काकपक्षधरा शुभा।
शुभदा शोभना शुद्धा निष्कला परमागतिः॥२६॥
दीनप्रिया दीनरता (९०) दीनभोजनतत्परा।
साधकप्रेमसंपन्ना साधकाभीतदायिनी॥२७॥
साधकैः सह संविष्टा साधकप्रेमतोषिता।
साधकानन्ददात्री च साधकप्रेमगोचरा॥२८॥
जगद्धात्री जगत्त्रात्री जगतां जयकारिणी(१००)।
इति ते कथितं दिव्यमन्नपूर्णाशतं शुभम्॥२९॥

अब मैं भगवती महादेवी अन्नदा के शतनामों का वर्णन करता हूँ। इन नामों का जप व पाठ किये बिना साधक को सौ वर्षों में भी मन्त्र जप करने से सिद्धि नहीं प्राप्त हो सकती। अतः सावधान होकर इन नामों को अपने चित्त में धारण करो। हे सुन्दरि! तुमसे मैं पहले ही (तारा तथा काली के) सहस्र नाम का वर्णन कर चुका हूँ। अब अन्नदा के शतनामों को सुनो।

ॐ अन्नदायै नमः, परमायै नमः, मायायै नमः, महादेव्यै नमः, शिवप्रियायै नमः, भवान्यै नमः, जगतामाद्यायै नमः, प्राणदायै नमः, प्राणवल्लभायै नमः, जगज्जीव मय्यै नमः, गौर्यै नमः, त्रय्यै नमः, वेदमय्यै नमः, परायै नमः, काशीपुर निवासायै नमः, काशीपुरविनासिन्यै नमः, कैलास निलयायै नमः, काल्यै नमः, कल्पज्ञायै नमः, कल्पदायै नमः, शुभायै नमः, महादेवप्रपूज्यायै नमः, महादेव रतायै नमः, आतुरायै नमः, पायसान्नप्रियायै नमः, पीनोन्न्तपयोधरायै नमः,

त्रिवलीवलयोपेतायै नमः, नयनोत्तमसत्तमायै नमः, अन्नपात्रधृतायै नमः, अनन्तायै नमः, अन्वेषनतत्परायै नमः, गङ्गायै नमः, गयायै नमः, विशालाक्ष्यै नमः, विशालरूपयौवनायै नमः, मदोन्मत्तायै नमः, स्वरूपाङ्ग्यै नमः, पूर्णचन्द्रनिभाननायै नमः, शिवप्राणायै नमः, शिवरतायै नमः, सदाशिवमहाधनायै नमः, महादेव प्रियायै नमः, साध्व्यै नमः, सत्यै नमः, कामालसायै नमः, प्रियायै नमः, कोमलाङ्ग्यै नमः, कामकलायै नमः, कलायै नमः, काष्ठायै नमः, यशस्विन्यै नमः, प्रफुल्लपद्मवदनायै नमः, पद्मालयायै नमः, शिवायै नमः, भवान्यै नमः, भवनप्रीतायै नमः, पद्मासनसमाश्रयायै नमः, वेष्टितायै नमः, सिद्धगन्धर्वऋषिभिः संस्तुतायै नमः, शिवेनसहसंविष्टायै नमः, शिवक्रीडनतत्परायै नमः, युवत्यै नमः, यौवनप्रीतायै नमः, नित्ययौवनतत्परायै नमः, सदाषोडशवर्षीयायै नमः, सदाशिवमनोरमायै नमः, चारुरूपधरायै नमः, चारुवक्त्रायै नमः, चारुपराक्रमायै नमः, चार्वङ्ग्यै नमः, कनकाङ्ग्यै नमः, कनकोपरिसंस्थितायै नमः, अन्नपूर्णायै नमः, सदापूर्णायै नमः, भूषणायै नमः, स्वर्णकङ्कणायै नमः, भक्तप्राणायै नमः, भक्तरतायै नमः, भक्तभोजनतत्परायै नमः, आज्यप्रियायै नमः, विरूपाक्ष्यै नमः, काकपक्षधरायै नमः, शुभायै नमः, शुभदायै नमः, शोभनायै नमः, शुद्धायै नमः, निष्कलायै नमः, परमागत्यै नमः, दीनप्रियायै नमः, दीनरतायै नमः, दीनभोजन तत्परायै नमः, साधकप्रेमसम्पन्नायै नमः, साधकभीतिदायिन्यै नमः, साधकैः सहसंविष्ययै नमः, साधकप्रेमतोषितायै नमः, साधकानन्ददात्र्यै नमः, साधकप्रेमगोचरायै नमः, जगद्धात्र्यै नमः, जगत्त्रात्र्यै नमः तथा जगताञ्जयकारिण्यै नमः। ये भगवती अन्नपूर्णा के दिव्य सौ नाम हैं, जिसे हे देवि! तुम्हारे लिए मैंने कहा है।

॥शतनाम-पाठ(जप) फल-श्रुति॥

